गीतनृत्यैर्बहुविधैराख्यातैश्च शिवात्मकैः ॥४४॥

त्यस विद्यामण्डपका माझमा शरयन्त्रको आसनमा राखिएको पूजनीय पुस्तकको दिनदिनै पूजा गर्नू र वाचन गर्नू वा लेख्नू ।४०।

चारै कुना मिलेका, बराबर डीका भएका, न धेरै मोटा न धेरै मसीना, सम्पूर्ण अवयवहरूले युक्त भएका, चम्किला, एक अर्कासँग न धेरै समीप न धेरै टाढा रहेका, परस्पर नटाँसिएका, मात्रा अनुस्वार संयुक्त अक्षर तथा ह्रस्व दीर्घ आदि सबै स्पष्ट बुझिने गरी नन्दीनागरकलिपिका अक्षरहरूद्वारा शिवागमको पुस्तकलाई लेखाउनू वा लेख्नू ।४१-४२।

अन्तमा ग्रन्थ वाचन वा लेखनको प्रारम्भमा गरे जस्तै उपवासका साथ शिव, अग्नि, गुरु र शिवागमको यत्नपूर्वक पूजा गर्नू ।४३।

वेदघोषैश्च विविधैः प्रेक्षणकैश्च शोभनैः ।
क्रीडायन्त्रप्रयोगाद्यैरित्येवं क्षपयेन्निशाम् ॥४५॥

शिवविद्याविमानञ्च कुर्यात् प्रातः शुशोभनम् ।
पञ्चाण्डकं त्रिभूमञ्च दारुवंशादिनिर्मितम् ॥४६॥

विचित्रवस्त्रसञ्छन्नं सर्वशोभासमन्वितम् ।
विद्यासनस्थं तन्मध्ये शिवज्ञानस्य पुस्तकम् ॥४७॥

हेमरत्नचितं दिव्यमथवा दन्तशोभितम् ।
विचित्रचित्रयुक्तं वा बहिरूत्कीर्णकम्विकम्[२९] ॥४८॥

मीठो शब्द भएका बाजागाजाहरू, धेरै किसिमका नाचगानहरू, शिवसम्बन्धी विविध आख्यानहरू सुन्दै सुनाउँदै जागरण बस्नू । ४४।

वेदध्वनिहरू राम्रा भक्तिभावपूर्ण अनेक किसिमका दृश्य अवलोकनहरू र शिवागमको महत्ता झल्काउने खेलहरूको प्रयोगद्वारा जागरणको त्यो रात बिताउनू ।४५।

बिहान शोभायात्राका लागि पाँचवटा गजूर भएको, तीन तले र काठ, बाँस आदिले अत्यन्त मनोज्ञ शिवागम राख्ने विमान वा रथ बनाउनू ।४६।

---

२८ ख. स्वरैः ।

२९ ग. कम्विके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अनेक रङका कपडाले बेरिएको र सम्पूर्ण किसिमका साजसज्जाले युक्त त्यस विमान वा रथमा विद्यासनको माझमा शिवज्ञानको पुस्तक राख्नू ।४७।

त्यो पुस्तकको खोल सुन र रत्नजडित दिव्य अथवा हात्तीका दाँत जडिएको हुनुपर्दछ। अनेक किसिमका रङ्गिबिरङ्गी चित्रहरूले युक्त र बाहिरतिर थोप्ला थोप्लाहरू कुँदिएको हुनुपर्दछ ।४८।

पार्श्वे चर्मसमायुक्तं दृढसूत्रनिबन्धनम् ।
सम्पूज्य गन्धपुष्पाद्यैः पूर्वोक्तविधिना बुधः ॥४९॥

समुत्क्षिप्यानयेद् भक्त्या तद्विमानं शिवाश्रमम् ।
सुस्थितं रथ[३०]मुख्येन पुरुषैर्वावलम्बितैः[३१] ॥५०॥

छत्रध्वजपताकाद्यैर्विमानैस्तुर्यनिस्वनैः ।
मङ्गलैर्वेदघोषाद्यैः सुधूपैः कलशैः सितैः ।५१॥

चारणैर्वन्दिभिर्वाद्यैः स्त्रीसङ्गीतैर्विभूषितम्[३२] ।
चारुचामरहस्ताभिश्चित्रदण्डैश्च दर्पणैः ॥५२॥

महता जनसङ्घेन पुरतश्च महीपतिः[३३] ।
धर्मवृद्ध्यै स्वयं गच्छेत्[३४] सर्वशोभासमन्वितः ॥५३॥

पार्श्व भाग अर्थात् किनारामा मृग अथवा व्याघ्र आदिको छाला गाँसिएको र बलियो धागाले बाँधिएको त्यस शिवागमको पुस्तकलाई विद्वान् वाचक वा लेखकले पहिले भनिएकै तरिकाअनुसार चन्दन पुष्प आदिले पूजा गर्नू ।४९।

भक्तिपूर्वक त्यो विमानलाई माथि उठाएर अथवा मानिसहरूले उठाएको मुख्य रथमा राम्रोसँग राखेर शिवाश्रममा ल्याउनू ।५०।

छत्र र ध्वजा-पताकाहरूले युक्त विमानहरू, बाजागाजाका ध्वनिहरू, माङ्गलिक वेदपाठहरू, धूपदीपहरू, सेता कलशहरू, भाट र गाईनेहरू, बाजाहरू र स्वास्नीमानिसहरूका गीतहरू, सुन्दर चमरहरू हातमा लिएका स्त्रीहरू र विचित्र दण्ड भएका ऐनाहरूले विभूषित त्यस शोभा यात्रामा ठूलो जनसमुदायका अघि अघि धर्मको अभिवृद्धिका लागि सम्पूर्ण साजसज्जाका साथ राजा स्वयं पनि जानू ।५१-५३।

अथवा हस्तियानस्थं कृत्वा पुस्तकमानयेत् ।

३० ग . रथ्य ।

३१ ग . अवलम्बितम् ।

३२ घ . विभूषितैः ।

३३ ग . महीयतेः ।

३४ ख . धर्मवृद्यैश्च सङ्गच्छेत् । ग. धर्मवृद्धै स्वयं गच्छेत् । घ. धर्मवृद्धैश्च स्वयं गच्छेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

राजमार्गेण महता नगरान्तं प्रदक्षिणम् ॥५४॥ CC0. In Public Domain. Digitization by eGangotri

सर्वायतनपूजाञ्च स्वधनैः कारयेन्नृपः ।
दशदिक्षु बलिन्दत्वा[३५] नगरस्य समन्ततः ॥५५॥

मार्गेऽपि पुरतो गच्छेद् बलिन्दद्या[३६]न्निरन्तरम् ।
गन्धपुष्पाक्षतोन्मिश्रमुदकञ्च तदानुगम् ॥५६॥

गच्छेत्पूर्वं ततः पश्चात्[३७] सर्वायतनवासिनः ।
पुरतः शिवविद्यायाः शिवमन्त्रमनुस्मरेत्[३८] ॥५७॥

अथवा हात्तीमा राखेर पुस्तक ल्याउनू र फराकिलो राजमार्गबाट नगरको अन्तिम सीमासम्म शोभा यात्रा गर्दै शहरका दशै दिशाहरूमा सबैतिर सम्पूर्ण पूजाहरू राजाले आफ्ना धनले गराउनू ।५४-५५।

बाटामा अघि अघि जानू र पछि पछि ल्याइएको गन्ध, पुष्प र अक्षता मिलाइएका पानीले युक्त बलि निरन्तर दिनू ।५६।

त्यसपछि सबैतिर छरिएर रहेका मानिसहरूसहित पहिले पूर्वदिशा र त्यसपछि पश्चिमदिशातिर जानू। शिवविद्याका अगाडि शिवमन्त्रको स्मरण गर्नू ।५७।

शुक्लाम्बरधराः सर्वे भवेयुः पुरवासिनः ।
उच्छ्रयेयुः[३९] पताकाश्च जनास्तद्देश[४०]वासिनः ॥५८॥

गृहदेवाँश्च सम्पूज्य[४१] कार्यश्चाप्युत्सवो गृहे ।
ब्राह्मणान् भोजयेयुश्च गृहेषु गृहमेधिनः ॥५९॥

अन्नपानैर्जनपदा[४२] यात्रां कुर्युः शिवाश्रमे ।
अच्छेद्यास्तरवः कार्याः सर्वां हिंसान्निवारयेत् ॥६०॥

---

३५ ख. दद्यात् ।
३६ क. दत्वा ।
३७ ग. अग्रे पश्चाश्च गच्छेयुः ।
३८ ग. मराः शुभाः ।
३९ ग. उच्छ्रेयेयुः
४० ग. ते देश ।
४१ ग. सम्पूज्याः ।
४२ क, घ. जनपद । ग. जानपदा ।

 Dr. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
बन्धनस्थाश्च मोक्तव्या बद्धाः क्रोधेन[४३] शत्रवः ।
अकालकौमुदीं कुर्याद् दिवसद्वयमीश्वरे ॥६१॥

शिवायतनमासाद्य विमानस्थन्तमर्पयेत्[४४] ।
पुण्याहजयशब्दैश्च महता तुमुलेन च[४५] ॥६२॥

सबै नगरवासीहरूले सेता लुगा लगाउनू र त्यो देशका बासिन्दाहरूले चारैतिर ध्वजा पताका फहराउनू ।५८।

गृहदेवताहरूको पूजा गरेर घरमा उत्सव मनाउनू र गृहस्थीहरूले ब्राह्मणहरूलाई घरमा खानपान गराउनू । नगरवासीहरूले शिवाश्रमसम्म यात्रा गर्नू । रूखहरू नकाट्नू र कुनै किसिमको हिंसा पनि नगर्नू ।५९-६०।

रीसले जेलमा हालिएका शत्रुहरूलाई पनि मुक्त गरिदिनू । दुई दिनसम्म भगवान् शिवजीमा असमयमै जूनको स्थिति पैदा गर्नू अर्थात् जून लागेको जस्तो चारैतिर प्रकाशको व्यवस्था गर्नू ।६१।

स्थाने सुसंस्कृते रम्ये शिवस्य पुरतः शनैः ।
स्थापयित्वा गुरुं भक्त्या तं प्रणम्य निवेदयेत् ॥६३॥

शान्त्यर्थमेकमध्यायं गोब्राह्मणमहीभृताम् ।
राष्ट्रिय[४६]नगराणाञ्च वाचयेद् वाचकोत्तमः ॥६४॥

छन्दोलक्षणतत्त्वज्ञः सत्कविर्मधुरस्वनः ।
गान्धर्वविद्विदग्धश्च श्रेष्ठः पुस्तकवाचकः ॥६५॥

शान्तितोयेन राजानं समुत्थाय गुरुस्ततः ।
शिरस्यभ्युक्षयेदीष[४७]त्तत्रस्थञ्च जनं[४८] ततः ॥६६॥

शिवाश्रममा पुगेर पुण्याहवाचन र जयजयकारको ठूलो खलबलका साथ विमानमा रहेको त्यो शिवागमलाई समर्पण गर्नू ।६२।

---

४३ ग. क्रोशेन ।
४४ क, ग, ङ. अर्घयेत् ।
४५ ग. वा ।
४६ घ . राष्ट्रीय ।
४७ क, ख. ईशम् ॥ ङ. दीपम् ।
४८ ग. जलम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0 in Public Domain. Digitization by eGangotri

शिवका अगाडि सफा गरिएको रमणीय ठाउँमा रथ राखेर गुरुलाई भक्तिपूर्वक प्रणाम गरेर निवेदन गर्नू ।६३।

गाई, ब्राह्मण, राजा, राष्ट्र र शहरको शान्तिका लागि उत्तम वाचकले एक अध्यायको वाचन गर्नू ।६४।

छन्दका लक्षणहरू र तत्त्वलाई राम्रोसँग बुझेका क्रान्तदर्शी अथवा राम्रो वर्णन गर्न सक्ने मीठो बोली भएका सङ्गीतज्ञ विद्वानूलाई श्रेष्ठ वक्ता भनिन्छ ।६५।

त्यसपछि गुरुले उठेर शान्तिजलले पहिले राजाको शिरमा अलिकति र त्यसपछि त्यहाँ भएका मानिसको शिरमा सेचन गर्नू ।६६।

अवधार्य जगच्छान्तिं पुनरन्ते नृपस्य च ।
आचार्यभोजनञ्चात्र नृपः कुर्यात् सदक्षिणम् ॥६७॥

स्वयमत्रैव भुञ्जीत सान्तः पुरपरिच्छदः ।
कार्या च विविधा प्रेक्षा[४९] भुक्तवत्सु जनेषु च ॥६८॥

एवं कृते महाशान्तिर्नृपस्य नगरस्य च ।
देशस्य च समस्तस्य जायते नात्र संशयः ॥६९॥

ईतयश्च प्रशाम्यन्ति न च मारी प्रवर्तते ।
शाम्यन्ति सर्वघोराणि प्रशमन्ति भयानि च ॥७०॥

उन्मूल्यन्ते ग्रहाः सर्वे प्रणश्यन्ति च शत्रवः ।
उपसर्गाः प्रलीयन्ते न दुर्भिक्षभयं भवेत् ॥७१॥

त्यसपछि संसारको शान्तिको कामना गरेर अन्तमा फेरि राजाको शिरमा जल सेचन गर्नू र राजाले समुचित दक्षिणाका साथ आचार्यलाई भोजन गराउनू । ६७।

स्वयं राजाले पनि आफ्ना रानीहरू र सेवकहरूसहित त्यहीं भोजन गर्नू र सबै मानिसहरूले भोजन गरिसकेपछि अनेक किसिमका नाटकादि दृश्य देखाउने व्यवस्था गर्नू ।६८।

यसो गर्नाले राजामा, त्यस शहरमा र सम्पूर्ण राष्ट्रमा समेत शान्ति छाउँछछ। यसमा कुनै सन्देह छैन ।६९।

यसो गर्दा अतिवृष्टि आदि उपद्रवहरू शान्त हुन्छन्, महामारी हुँदैन, सम्पूर्ण विपदाहरू शान्त हुन्छन् र कुनै किसिमको डर रहँदैन ।७०।

सबै ग्रहहरू शान्त हुन्छन्, शत्रुहरू नष्ट हुन्छन्, आइलाग्ने विपत्तिहरू नष्ट हुन्छन् र अनिकाल पर्दैन ।७१।

विनायकाश्च[५०] नश्यन्ति सौभाग्यं परमं भवेत् ।

---

४९ ग. प्रोक्ता ।

५० ख. शिनायका ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

राज्यवृद्धिश्च विपुला नित्यञ्च विजयी नृपः ॥७२॥

वर्द्धते पुत्रपौत्रैश्च मतिर्धर्मे च वर्द्धते[५१] ।
विद्यादानप्रसादेन नृपस्य च जनस्य च ॥७३॥

अनेन विधिना राजा यः शिवज्ञानपुस्तकम् ।
दद्यात्तदभियुक्ताय विद्यादानफलं लभेत् ॥७४॥

यो वाऽन्यः पुरुषः कश्चिच्छ्रद्धावित्तानुसारतः ।
कुर्याद् विधिमिमं स्त्री वा विद्यादानफलं लभेत् ॥७५॥

दरिद्रश्चानुसारेण वित्तशाठ्यविवर्जितः ।
कृत्वा विधिमिमम्भक्त्या विद्यादानफलं लभेत् ॥७६॥[५२]

विघ्न बाधाहरू नष्ट हुन्छन्, परम सौभाग्य फैलिन्छ, राज्यको ठूलो विस्तार हुन्छ र राजाको सधैं जित् हुन्छ ।७२।

विद्यादानको प्रसादले राजा र जनताका छोरा नातिहरूद्वारा कुल बढ्दछ र बुद्धि धर्ममा लाग्दछ ।७३।

यस किसिमले राजाले शिवागमको पुस्तकलाई त्यसका लागि उपयुक्त वा योग्य मानिस वा सत्पात्रलाई दिएर विद्यादानको फललाई प्राप्त गर्दछ ।७४।

राजा बाहेक अरू स्त्री वा पुरुषले पनि आफ्नो धन-सम्पत्तिअनुसार यस तरिकाले पुस्तक दिएर वा लेखाएर विद्यादानको फल प्राप्त गर्न सक्दछन् ।७५।

दरिद्रले पनि धन-सम्पदामा कत्ति धूर्त्याइँ नगरेर शक्तिअनुसार यो विधिको भक्तिपूर्वक अनुसरण गरेमा विद्यादान गरे सरह फल पाउँछ ।७६।

यस्य यावद् भवेद् वित्तं स तस्येहानुसारतः ।
अशाठ्येनाचरेत् पुण्यमाढ्यतुल्यफलं लभेत् ॥७७॥

यावदक्षरसंख्यानं शिवज्ञानस्य पुस्तके[५३] ।
तावद्वर्षसहस्राणि दाता शिवपुरे वसेत् ॥७८॥

---

५१ ग. प्रवर्त्तते ।

५२ ख. पद्यमिदं नास्ति ।

५३ घ. पुस्तकम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

दश पूर्वान् समुद्धृत्य दश वंश्यांश्च पश्चिमगान् । CC0. In Public Domain. Digitization by eGangotri
मातापितृधर्मपत्नीः स्वर्गे स्थाप्य शिवं व्रजेत् ॥७९॥

सान्तः पुरपरिवारः सर्वभृत्यसमन्वितः ।
राजा शिवपुरङ्गच्छेद् विद्यादानप्रभावतः ॥८०॥

विमानयानैः श्रीमद्भिः सर्वकामसमन्वितैः[५४] ।
मनोरम्यैरसंख्यातैः क्रीडते कालमक्षयम् ॥८१॥

जससँग जति सम्पत्ति हुन्छ, कत्ति धूर्त्याइँ नगरी शक्तिअनुसार पुण्य गर्छ भने उसले धनी व्यक्तिले धुमधामसँग गरेको पुण्य सरह नै फल पाउँछ ।७७।

शिवागममा जति अक्षरहरू छन्, शिवशास्त्रको दाता त्यतिहजार वर्षसम्म शिवलोकमा बस्न पाउँछ ।७८।

शिवागमको दाता आफ्ना पूर्वका दश र आफूभन्दा पछिका दश कुल र आमा, बुबा एवं धर्मपत्नीलाई स्वर्गलोकमा प्रतिष्ठित गरी आफू शिवलोक जान्छ ।७९।

विद्यादानका प्रभावले रानी, परिवार, सम्पूर्ण सेवकहरूसहित राजा शिवलोकमा जान्छ ।८०।

शोभाले सम्पन्न, मनोरम, असंख्य विमानहरूद्वारा सम्पूर्ण चाहनाहरू पूरा गरेर अनन्त समयसम्म शिवलोकमा रमाउँछ ।८१।

परमाष्टगुणैश्वर्येरुपेतः सर्वतः प्रभुः ।
सर्वज्ञः परिपूर्णात्मा द्वितीय इव शङ्करः ॥८२॥

यथाऽमराणां सर्वेषां परमः परमेश्वरः ।
तथैव सर्वदानानां विद्यादानं परं स्मृतम् ॥८३॥

अनेनैव विधानेन यः शिवज्ञानपुस्तकम् ।
कुसुमगृहके स्थाप्य पूजयीत शिवाश्रमे ॥८४॥

आषाढ्यां पौर्णमास्यां[५५] तु दीपमालाविबोधनैः ।
वैशाख्याञ्चापि सम्पूज्य विद्यादानफलं लभेत् ॥८५॥

यः श्रीमत्पुस्तकवरमालेख्य विनिवेदयेत् ।
<u>शिवज्ञानाभियुक्ताय</u> तस्य पुण्यफलं श्रृणु ॥८६॥

५४ ग. समन्वितः ।
५५ ग. पूर्णिमास्याम् ।

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिवशास्त्रको दाता अणिमादि आठ ऐश्वर्यहरूले हरप्रकारले युक्त भएर सर्वसमर्थ सबै कुरा जान्ने र परिपूर्ण भई अर्का शिवझैं सुशोभित हुन्छ।८२।

जसरी सम्पूर्ण देवताहरूमा भगवान् शिव सबभन्दा पर अर्थात् माथि हुनुहुन्छ, त्यसैगरी सम्पूर्ण दानहरूमा विद्यादान सबभन्दा माथि मानिएको छ।८३।

यसै विधिद्वारा जसले शिवाश्रममा फूलको घरमा राखेर असारको पूर्णिमा वा वैशाखको पूर्णिमामा दीपमाला बालेर शिवागमको पूजा गर्दछ, उसले विद्यादान बराबर फल पाउँछ।८४-८५।

जसले शोभासम्पन्न शिवशास्त्रको पुस्तक सारेर शिवशास्त्रका ज्ञातालाई दान दिन्छ, त्यस पुण्यको फल सुन।८६।

यावत् तत्पत्रसंख्यानं [५६]सञ्चकेऽतीवशोभनम्।
तावद्युगसहस्राणि शिवलोके महीयते ॥८७॥

यत्पत्रं यन्त्र[५७] सूत्राद्यं मषीभाजनलेखनी।
शरयन्त्रासनाभ्यङ्गशय्यूर्या[५८]सद्भक्तवेतनम् ॥८८॥

इत्येवमादि यच्चान्यत्तदर्थमुपयुज्यते।
यद्वा तद्वा महत् सूक्ष्मं विधानेन तु पूजयेत्[५९] ॥८९॥

तदेकमपि विद्याङ्गं श्रद्धावित्तानुसारतः।
निवेद्य स महाभोगैः शिवलोके महीयते ॥९०॥

पुस्तकास्तरणन्दत्वा सद्वस्त्रञ्च प्रमाणतः।
तद्वासनवितानं वा शिवलोके महीयते ॥९१॥

शिवागम लेखिएका पत्रहरूको खातमा अत्यन्त शोभनीय जति पत्रहरूको संख्या रहन्छ, त्यति हजार युगसम्म शिवागमको दाता शिवलोकमा प्रतिष्ठित हुन्छ।८७।

लेख्ने कागज, तिनलाई सिउने यन्त्र (सियो, पञ्चिङ आदि), तिनीहरूलाई जोड्ने धागो आदि, मसीको भाँडो, कलम, शरयन्त्र अर्थात् कलम ताछ्ने छुरा आदि यन्त्रहरू, लेख्दा बस्ने आसन, अक्षर ज्यादा हुँदा मेट्ने वा पोत्ने वस्तुहरू, लेख्न प्रयुक्त हुने हातका औंलाहरू, सेवा पुर्याउने भक्तको वेतन ज्याला आदि, यी र शिवागम लेख्दा ठूला-साना अन्य जे जे वस्तुहरूको प्रयोग हुन्छ, ती सबैको विधिपूर्वक पूजा गर्नू।८८-८९।

---

५६ ग. मञ्चके।
५७ क. यत्र।
५८ ङ. शय्या।
५९ ग. यद् भवेत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

त्यसमा शिवागमको यौटा अङ्ग पनि श्रद्धा र शक्तिअनुसार लेखी शिवजीलाई चढाउने मानिस ठूला ठूला सुखभोगहरूका साथ शिवलोकमा प्रतिष्ठित हुन्छ ।९०।

CC0. In Public Domain. Digitization by eGangotri

यावत्तद्वस्त्रतन्तूनां परिसंख्या समन्ततः ।
तावद्युगसहस्त्राणि महाभोगानवाप्नुयात् ॥९२॥

शिवज्ञानाभियुक्ताय भक्ताच्छादं ददाति यः ।
आसमाप्तेरविच्छिन्नं विद्यादानफलं लभेत् ॥९३॥[६०]

उपानच्छत्रकौपीनं शयूया[६१] प्रावरणासनम् ।
पादस्नेहाञ्जनाभ्यङ्गं स्नानभोजनभैषजम् ॥९४॥

यतिमात्रोपकरणं मठसम्मार्जनाञ्जनम् ।
दीपाग्नितोयपुष्पाद्यं शिवपुस्तकवाचनम् ॥९५॥

यः कुर्यादेतदखिलं शिवज्ञानरतात्मनाम् ।[६२]
पञ्चानां पञ्च वर्षाणि विद्यादानफलं लभेत् ॥९६॥

पुस्तक राख्ने चौकी वा आसन आदि, लम्बाइ चौडाइ अनुसारको पुस्तक बाँध्ने राम्रो कपडा र बेठन वा चँदुवा दान गरेर शिवलोकमा प्रतिष्ठा पाइन्छ ।९१।

दान गरिएका कपडा वा बेठनहरूमा चारैतिरबाट गन्दा जति त्यसको धागाहरूको संख्या हुन्छ, त्यति हजार युगसम्म शिवलोकमा ठूला ठूला सुखभोगलाई दाताले प्राप्त गर्दछ ।९२।

शिवज्ञान राख्ने योगीलाई जसले भोजन तथा लत्ताकपडा दान गर्दछ, उसले सृष्टिको समाप्तिसम्म निरन्तर विद्यादानको फल पाउँछ ।९३।

जुत्ता, छाता, कौपीनवस्त्र, खाट, ओड्ना, बिछ्यौना, खुट्टामा र शरीरमा तेलको लेपन, नुहाउने र खानेकुरा, औषधोपचार, योगीहरूका कमण्डलु आदि उपकरणहरू, शिवाश्रमलाई सफा गर्ने र

त्रिःसप्तकुलमुत्तार्य स्थापयेदैष्वरे[६३] पुरे ।

तत्र[६४] तद्विपुलैर्भोगैः क्रीडन्त्याचन्द्रतारकम् ॥९७॥

---

६० ख. ८५ पद्यस्योत्तरार्द्धादारभ्य ९३ पद्यस्य पूर्वार्द्धं यावत् नास्ति ।
६१ क. शय्या ।
६२ क, ग, घ. रतात्मकम् ।
६३ क, ख. वेष्णवे ।
६४ ग. तेत्र ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कलत्रपुत्रसद्भृत्यैर्युक्तः शिवपुरे नरः।
CC0. In Public Domain. Digitization by eGangotri
अक्षयं मोदते कालं विमानैः सार्वकामिकैः ॥९८॥

विद्यामण्डलकं वृत्तं यदि वा चतुरस्रकम्।
द्विहस्तमधिकं वापि कृत्वा सद्गोमयाम्भसा[६५] ॥९९॥

सितरक्तादिभिश्चूर्णैः समन्तादुप[६६]शोभितम्।
सितपद्मयुतं मध्ये सद्वितान[६७]विभूषितम् ॥ १००॥

र पोत्ने सामग्री, बत्ती, आगो, पानी, फूल आदि र शिवागमको पाठ यी सबैको व्यवस्था शिवज्ञानमा संलग्न पाँचजना योगीहरूका लागि पाँचवर्षसम्म जसले गर्दछ, त्यसले विद्यादान बराबरको फल प्राप्त गर्दछ।९४-९६।

उसले आफ्ना एक्काइसकुललाई तारेर शिवलोकमा स्थापित गर्दछ र उनीहरू चन्द्र र ताराहरू रहँदासम्म ठूला ठूला सुखभोगहरू भोग गरी रमाउँछन्।९७।

ऊ आफू पनि पत्नी, पुत्र र असल सेवकहरूसहित सम्पूर्ण कामनाहरू पूरा गर्ने विमानहरूद्वारा अनन्त कालसम्म शिवलोकमा रमाउँदछ।९८।

गोलाकार अथवा चारकुने विद्यामण्डल बनाइन्छ भने दुईहातभन्दा बढी लामो र चाक्लो विद्यामण्डल बनाएर राम्रो गोबर र पानीले लिप्नू।९९।

विचित्रकुसुमाकीर्णं प्रदीपाक्षत[६८]संयुतम्।
सम्पूज्यैवं शिवज्ञानं श्रद्धया वाचयीत यः ॥१०१॥

आद्यन्ततः[६९] क्रमात्सर्वमेकरूपं शनैः शनैः।
सर्वलोकोपकारार्थमात्मनश्च समृद्धये ॥ १०२॥

तत्समाप्तौ शिवं विद्यामाचार्यञ्च प्रपूजयेत्।
कल्पयेद् भोजनं पश्चात् सर्वेषां शिवयोगिनाम् ॥१०३॥

य एवं भक्तितः[७०] कुर्याच्छिवज्ञानस्य वाचनम्।

---

६५ ङ. सद्गोमयाम्भसा।
६६ ङ. विप।
६७ ङ. सवितान।
६८ ङ. कृत।
६९ ग. आद्यन्तन्तत्।
७० ङ. उक्तितः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मूल्येन[७१] कारयेद् वापि विद्यादानफलं लभेत् ॥१०४॥ CC0. In Public Domain. Digitization by eGangotri

विद्यामण्डलको चारैतिर सेतो, रातो, पहेंलो आदि रङ मिसिएको पीठोले रेखाहरू बनाई सुशोभित ठाउँमा माझमा श्वेत कमलको चित्र बनाउनू। राम्रो अखण्डित तथा सफा चँदुवा टाँगूनू ।१००।

धूप, दीप, अक्षता आदिले र अनेक थरी फूलहरूले पूजा गरेर श्रद्धापूर्वक शिवज्ञानको वाचन गर्नू ।१०१।

जसले शिवागमको श्रद्धापूर्वक वाचन गराउँछ वा गर्छ, उसले सम्पूर्ण लोकको उपकारका लागि र आफ्नो समृद्धिका लागि शुरुदेखि अन्तिमसम्म क्रमैसँग एकरूपताका साथ कत्ति हतार नगरेर सुस्त सुस्त वाचन गर्नू गराउनू ।१०२।

त्यसको समाप्तिमा शिव, शिवशास्त्र तथा आचार्यको पूजा गर्नू र त्यसपछि शिवयोगीहरू लगायत सबैको भोजनको व्यवस्था गर्नू ।१०३।

अपि श्लोकं तदर्द्धं वा शिवज्ञानस्य यः पठेत् ।[७२]
वाचयेच्चिन्तयेद्वापि लेखयेल्लिखयीत[७३] वा ॥१०५॥

श्रृणुयादेकचित्तश्च तदर्थञ्च विचारयेत् ।
जनेभ्यः श्रावयेद्यश्च तस्य पुण्यफलं श्रृणु ॥१०६॥

यः प्रदद्यान्महीं पूर्णां सर्वरत्नैस्तु यत्फलम् ।
श्लोकार्द्धं शिवज्ञानस्य पाठात्तत्फलमाप्नुयात् ॥१०७॥

यः श्रीपर्णीसमुद्भूतं निम्नखातं सुसञ्चयम् ।
दद्यात् सम्पुटकं कृत्वा चर्मणा वापि निर्मितम् ॥१०८॥

शिवज्ञानाभियुक्ताय तदध्ययनहेतुना ।
सुश्लक्षणफलकं वापि विद्यादानफलं लभेत् ॥१०९॥

यसरी जसले भक्तिपूर्वक शिवज्ञानको वाचन गर्दछ अथवा मूल्य दिएर शिवज्ञानको वाचनको व्यवस्था मिलाउँछ, उसले विद्यादानको फल प्राप्त गर्दछ ।१०४।

शिवज्ञानको एउटा श्लोक अथवा आधा श्लोक श्रद्धापूर्वक जसले पढ्दछ, वाचन गर्न लगाउँछ, त्यसबारे चिन्तन गर्छ, लेख्दछ अथवा लेखाउँछ, मन लगाएर सुन्दछ, त्यसको अर्थको विषयमा चिन्तन गर्दछ र अरूलाई सुनाउँदछ, त्यसको पुण्यको फलका सन्दर्भमा सुन ।१०५-१०६।

७१ ख. मूलेन।

७२ ग. १०३ र १०४ पद्ये न स्तः।

७३ ग. लिपयीत।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जसले शिवशास्त्रको आधा श्लोकमात्रको पनि पाठ गर्दछ उसले सम्पूर्ण रत्नहरूले भरिभराउ पृथ्वीको दान गर्दा जो फल पाइन्छ, त्यही फल प्राप्त गर्दछ।१०७।

जसले कमलहरू उम्रेको पूर्णरूपमा पानी सञ्चित हुने गहिरो पोखरी अथवा छालाले बनाएको धेरै पानी अट्ने थैलो अथवा राम्रा फलहरूले युक्त सुपारीको बोट शिवागमको अध्ययनका लागि शिवज्ञानीलाई प्रदान गर्दछ, उसले विद्यादान बराबरको फल प्राप्त गर्दछ।१०८-१०९

महाविमानैः श्रीमद्भिः सर्वकामसमन्वितैः ।
क्रीडते परमं कालं रुद्रलोके व्यवस्थितः ॥११०॥

ततः कालात् क्षितिं प्राप्य राजा भवति धार्मिकः ।
सुरूपः सद्द्विजो[७४] वापि सर्वविद्यार्थपारगः ॥१११॥

यः सौवर्णं सुसम्पूर्णं सर्वरत्नोपशोभितम् ।
सपिधानं समञ्जूषं[७५] विद्याकोषसमाश्रयम् ॥११२॥

कारयेद्वापि रौप्येण ताम्रेण चतुरस्रकम् ।
कांस्यारकूटलोहैर्वा दारुवंशादिनिर्मितम् ॥११३॥

तत्कषायानुरक्तेन चर्मणाभिनवेन च ।
अन्तर्बहिश्च मथये[७६]द्विद्यावासगृहं नवम् ॥११४॥

उपर्युक्त दान गर्ने मानिस सम्पूर्ण मनोरथहरूलाई पूरा गर्न सक्ने सम्पदाहरूले परिपूर्ण विमानहरूद्वारा शिवलोकमा सुव्यवस्थित भएर अत्यधिक लामो समयसम्म रमाउँछ।११०।

त्यसपछि समयअनुसार पृथ्वीमा आएर धार्मिक राजा हुन्छ अथवा सौन्दर्यले युक्त सम्पूर्ण विद्यामा पारङ्गत राम्रो ब्राह्मणका रूपमा जन्म लिन्छ।१११।

जसले सुन, चाँदी, तामा, काँस, पित्तल, फलाम अथवा काठ अथवा बाँस आदिले बनाएको, सबै अङ्गले परिपूर्ण तथा सम्पूर्ण रत्नहरू जडित बिर्को भएको बाकसले युक्त शिवागमको ग्रन्थ राख्ने सानो चारकुने मन्दिर बनाउँछ, उसले त्यसलाई गेरु मिसिएको पदार्थ अथवा नयाँ छालाले बाहिर भित्र त्यो नयाँ ग्रन्थ राख्ने गृहलाई घोटेर टल्काउनु पर्दछ।११२-११४।

सर्वाश्मकटकोपेतं दृढसूत्रनिबन्धनम् ।

७४ क, घ, ङ. सुद्विजः । ख. सद्विजः ।
७५ घ. समञ्जीषम् ।
७६ ग, घ, ङ. मठयेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कुर्यात्तालकसंयुक्तं विद्यारत्नकरण्डकम् ।।११५।।

CC0. In Public Domain. Digitization by eGangotri

एवं वित्तानुसारेण कारयित्वानुरूपतः ।
प्रक्षाल्य गन्धतोयेन विद्यावासगृहं परम्[७७] ।।११६।।

कृत्वा वस्त्रवरं दिव्यमन्तः पुष्पं गृहान्वितम्[७८] ।
विद्यासिंहासनन्तत्र सम्पूज्य विधिवद् बुधः ।।११७।।

तस्मिन् पुण्याहशब्देन विद्याकोषगृहन्न्यसेत् ।
ततश्चन्दनकर्पूरैः कुङ्कुमाद्यैः प्रलेपयेत् ।।११८।।

अन्तर्वस्त्रयुतं धूपैः[७९] सत्पुष्पैरभिपूजयेत्[८०] ।
ततो वादित्रनिर्घोषैर्विद्याकोषं प्रपूरयेत्[८१] ।। ११९।।

सबै किसिमका मणिहरू तथा कटक आदि आभूषणहरूले युक्त बलिया तार, धागा आदिले जोडिएको ताला लगाउने व्यवस्था समेत भएको शिवागमरूप रत्न राख्ने पेटारो बनाउनू ।११५।

विद्वान् मानिसले यसरी आफ्नो सम्पत्तिअनुसार शिवशास्त्रलाई राख्न अनुकूल हुने उत्कृष्ट विद्यावासगृह बनाएर त्यसलाई सुगन्धित पानीले धोएर राम्रो दिव्य कपडा र भित्र फूलले युक्त भएको सानो मन्दिरले युक्त विद्यासिंहासनको विधिवद् पूजा गरेर पुण्याह वाचनका साथ किताब राख्ने पहिले भनेअनुसार बनाइएको पेटारोलाई राख्ने र त्यसपछि चन्दन, कपूर, कुङ्कुम आदिद्वारा त्यसलाई सिँगार्नू ।११६-११८।

ततः सम्पूजयेद् विद्यां महाविभवविस्तरैः ।
कृत्वा प्रदक्षिणञ्चान्ते नमेत् सर्वाङ्गिकं बुधः ।।१२०।।

विद्याकोषगृहस्यापि विद्यायतनमुत्तमम् ।
भवेत् सुशोभनन्तस्य चाष्टहस्तप्रमाणतः ।।१२१।।

शिलेष्टकामृण्मयं वा सद्दारुकृतमेव वा ।
कपाटार्गलसंयुक्तं प्राकाराराम[८२]शोभितम् ।।१२२।।

---

७७ ग. गृहस्य दः ।
७८ ख. इयं पङ्क्तिर्नास्ति ।
७९ क, ख, ग, घ. धूपम् ।
८० ङ. अपिपूजयेत् ।
८१ ख, ग, ङ. प्रपूजयेत् ।
८२ ग. प्राकारासन ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पताकाध्वजसंयुक्तं सद्वितानसुशोभनम्[८३] ।
घण्टाचामरसंयुक्तं किङ्किणीरवकान्वितम् ॥१२३॥

त्यसपछि धूप तथा राम्रा राम्रा फूलहरूले भित्र वस्त्रले युक्त भएको विद्याकोषको पूजा गर्नु र बाजा-गाजा आदिको ध्वनिले त्यसलाई गुञ्जायमान गर्नू ।११९।

त्यसपछि अनेक किसिमका सम्पदाहरूद्वारा विस्तारपूर्वक शिवविद्याको पूजा गर्नू र अन्तमा प्रदक्षिणा गरेर सबै अङ्गहरूले प्रणाम गर्नू ।१२०।

विद्यालाई राख्ने त्यस सानो मन्दिरका बाहिर पनि आठ हात लामो र चाक्लो सबै किसिमका सुविधाले युक्त विद्यामण्डप बनाउनू ।१२१।

त्यो विद्यामण्डप ढुङ्गा, ईट्टा, माटो अथवा राम्रो काठले बनाइएको, ढोका, आग्लोले युक्त र पर्खाल तथा बगैंचाले समेत शोभायमान हुनुपर्दछ ।१२२।

त्यो विद्यामण्डप ध्वजा-पतकाहरूले युक्त, अखण्डित तथा सुन्दर चँदुवाले सुशोभित, घण्ट तथा चामर हरूले युक्त तथा घुँघुराका शब्दहरूले मनोरम हुनुपर्दछ ।१२३।

चन्दनागुरुगन्धाद्यैरनुलिप्तं समन्ततः ।
नित्यं सुगन्धकैर्धूपैः पुष्पैश्चैवापि वासयेत्[८४] ॥१२४॥

तत्र तं तूर्यघोषेण मङ्गलैर्विविधैरपि ।
आनीय स्थापयेद् भक्त्या विद्यारत्नकरण्डकम् ॥१२५॥

ततः सुगन्धपुष्पाद्यैः शिववत् प्रतिपूजयेत् ।
शिवविद्यां सदाकालं त्रिसन्ध्यमुपचारतः ॥१२६॥

ततः समागतान् सर्वान् भोजयेच्छिवयोगिनः ।
दीनान्धकृपणाद्यांश्च भक्षयित्वा[८५] क्षमापयेत् ॥१२७॥

एवं यः शिवविद्यायाः कुर्यादायतनं शुभम् ।
स मुक्तः पातकैः सर्वैर्विद्यादानफलं लभेत् ॥१२८॥

चन्दन, वृक्षविशेषको खोटो तथा यस्तै अन्य सुगन्धित द्रव्यहरूद्वारा चारैतिर लेप गर्नू र सधैं सुगन्धित धूपहरू र फूलहरूले समेत सुगन्धमय बनाउनू ।१२४।

---

८३ ख. विभूषितम् ।
८४ ग ङ. अधिवासयेत् ।
८५ क, ग, घ, ङ. दक्षयित्वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

त्यस विद्यामण्डपमा बाजा-गाजा, अनेक किसिमका मङ्गल ध्वनिका साथ विद्यारूपी रत्न शिवशास्त्रको पेटारो भक्तिपूर्वक स्थापना गर्नू ।१२५।

CC-0. In Public Domain. Digitization by eGangotri

त्यसपछि सुगन्धित चन्दन आदि र फूल आदिद्वारा त्यस शिवविद्याको शिवको पूजा गरे झैं निरन्तर प्रातः मध्याह्न र साँझको सन्ध्यामा उपचारका साथ पूजा गर्नू ।१२६।

त्यसपछि त्यहाँ आएका सबै शिवयोगीहरूलाई र दुःखी, अन्धा तथा गरीब आदिलाई समेत भोजन गराएर उनीहरूसँग क्षमा माग्नू ।१२७।

कुलैकविंशदुत्तार्य सभृत्यपरिबारितः ।
प्राप्याष्टगुणमैश्वर्यं शिवलोके महीयते ॥१२९॥

यस्तत्र ज्ञानमासाद्य विषयान् विषवत् त्यजेत् ।
स प्राप्नोति पराम्मुक्तिं रागी भोगानवाप्नुयात् ॥१३०॥

सृष्ट्यन्तरे पुनः प्राप्ते पृथिव्यामेकराड् भवेत् ।
सर्वैश्वर्यगुणोपेतः सर्वज्ञानार्थपारगः ॥१३१॥

यः कारयेन्महारम्यं सुवेदी[८६]संस्थितं पुरम् ।
पञ्चभौमं त्रिभौमं वा शिवज्ञानरतात्मनाम् ॥१३२॥

यसरी जसले शिवविद्याको कल्याणकारी मण्डप बनाउँछ उसले सबै पापहरूबाट मुक्त भएर विद्यादान सरहको फल पाउँछ ।१२८।

ऊ आफ्ना एक्काइस कुलहरूलाई तारेर सेवक तथा परिवारसहित आठवटा गुणहरूले युक्त अणिमादि ऐश्वर्य प्राप्त गरेर शिवलोकमा प्रतिष्ठित हुन्छ ।१२९।

त्यस शिवलोकमा जसले ज्ञानलाई प्राप्त गरेर भोगका साधनहरूलाई विष त्यागेझैं त्याग्दछ, उसले अन्तिम मुक्ति पाउँछ भने विषयमा आसक्त व्यक्तिले सुखभोगहरूलाई प्राप्त गर्दछ ।१३०।

पुनः अर्को सृष्टि प्रारम्भ भएपछि सम्पूर्ण सम्पदाहरू र गुणहरूले युक्त समस्त ज्ञान र शास्त्रार्थमा पारङ्गत पृथ्वीको एक मात्र सम्राट बन्दछ ।१३१।

जसले शिवज्ञानमा संलग्न योगीहरूलाई बस्नका लागि घर बनाउँछ उसले अधो निर्दिष्ट प्रकारले घर बनाउनु पर्दछ - त्यो घर अत्यन्त रमणीय राम्रो भूँइ (फर्स भएको) पाँचतले अथवा तीनतले हुनु पर्दछ ।१३२।

गुहा[८७]प्रवरकैर्युक्तं मैत्रस्थानसमन्वितम् ।
वास्तुविद्याविभक्तञ्च प्राकारपरिवारितम् ॥१३३॥

८६ घ. सवेदीम् । ङ. स्ववेदीम् ।
८७ ख. गृहा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

तस्य वेदी द्विहस्तोच्चा पर्यन्तस्तम्भसंयुता[८८] ।
Public Domain. Digitization by eGangotri
पक्वेष्टकापरिच्छन्ना तत्सुरम्यं समन्तकम्[८९] ॥१३४॥

सुवीथ्यः[९०] पुरतः कार्यं दिश्याग्नेयां महानसम् ।
धूमनिर्गमनोपेतं पूर्वतः सत्रमण्डपम् ॥१३५॥

गन्धपुष्पगृहं कार्यमैशान्यां पटसंयुतम् ।
भाण्डागारञ्च कौवेर्यां कोष्ठागारञ्च वायवे ॥१३६॥

उदकाश्रयश्च वारूण्यां वातायनसमन्वितम् ।
समित्कुशेन्धनस्थानमायुधानाञ्च नैर्ऋते ॥१३७॥

श्रेष्ठ गुफाहरू तथा भेटघाट गर्ने वा बैठक गर्ने ठाउँले युक्त, वास्तुशास्त्रअनुसार सबै कुराको लागि अलग अलग विभाग भएको र चारैतिरबाट पर्खालले युक्त त्यो भवन हुनुपर्दछ ।१३३।

त्यस भवनको भूँइ दुई हात अग्लो र किनारहरूमा खम्बाहरू भएको, पाको ईट्टा बिछ्याइएको र त्यसका किनाराहरू आकर्षक हुनुपर्दछ ।१३४।

अगाडि राम्रा बाटाहरू र आग्नेय कोणमा भान्सा बनाउनू । भान्सामा धुवाँ जानका लागि स्थान र भवनको पूर्वपट्टि यज्ञमण्डप बनाउनु पर्दछ ।१३५।

ऐशान्य कोणमा पर्दाले युक्त सुगन्धित द्रव्य तथा फूलहरूको घर वा पूजाकोठा बनाउनू र उत्तरदिशामा भण्डार र वायव्य कोणमा भित्री बस्ने कोठा बनाउनू ।१३६।

अभ्यागतालयं रम्यं शय्यासनसपादुकम् ।
तोयाग्निदीपसद्भृत्यैर्युक्तं दक्षिणतो भवेत् ॥१३८॥

गृहान्तराणि सर्वाणि जलजैः कदलीगृहैः ।
पञ्चवर्णैश्च कुसुमैः शोभितानि प्रकल्पयेत् ॥ १३९॥

प्राकारान्तर्बहिर्दद्यात्पञ्चहस्तप्रमाणतः ।
प्राकाराच्च बहिः कुर्यात्सर्वदिक्षु समन्ततः ॥१४०॥

दिव्यं शिवाश्रमारामं नानापुष्पोपशोभितम् ।
सर्वर्तुकगुणोपेतं नानावृक्षसमन्वितम् ॥१४१॥

---

८८ ग. संयुतम् । ङ. संयुताम् ।
८९ ग. मन्तरम् । क, घ, ङ. सुरम्यं त्रमन्तकम् ।
९० क, घ. सुवीथ्याः । ख. स्ववीथ्याः। ग. सविध्याः । ङ. सुवीष्याः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

पश्चिमदिशामा पानीटङ्की, कुवा वा पानी संग्रह गर्ने ठाउँ बनाउनू र नैऋत्यकोणमा हावाको प्रवेश मार्ग झ्याल आदि तथा दाउरा, कुश तथा अन्य इन्धनहरू र हतियारहरू राख्ने ठाउँ बनाउनू ।१३७।

CC0. In Public Domain. Digitization by eGangotri

दक्षिण दिशातर्फ सुन्दर पाहुना कोठा बनाउनू, जसमा सुत्नलाई शय्या, बस्नलाई आसन कुर्सी आदि र बाहिर भित्र गर्दा लगाउनका लागि पादुका या चप्पल आदि, पानी, आगो, प्रकाश र सेवकहरूको व्यवस्था गर्नू ।१३८।

यस्तै अन्य सबै घरहरू पनि कमल, केराका झाडीहरू र पाँच वर्णका फूलहरूले सुशोभित तुल्याउनू ।१३९।

पर्खालभन्दा भित्र पाँच हात र बाहिर पाँच हात चाक्लो फूलबारी बनाउनू । भित्र ठाउँअनुसार बनाए पनि बाहिरतिर पर्खालका चारैतिर सबैदिशामा फूलबारी बनाउनू ।१४०

शिवाश्रमको बगैंचा दिव्य र अनेक किसिमका फूलहरूले सुशोभित, सबै ऋतुहरूका गुणहरूले युक्त र अनेक थरी वृक्षहरूले सुसज्जित हुनुपर्दछ ।१४१।

प्रियङ्गुशिरीषाशोकपुत्रञ्जीवक[९१]रञ्जकैः ।
पुन्नागनागबकुलैः पाटलाबिल्वचम्पकैः ॥१४२॥

श्वेतमन्दारविजयैर्जातीतगर[९२]कुञ्जकैः ।
सुवर्णश्वेतयूथीभिर्बाणाम्रातकुरण्टकैः[९३] ॥१४३॥

करवीरकर्णिकारैर्नानावर्णैरनेकशः ।
स्थानविन्यासरचितैस्सन्मार्गाधारसंयुतैः ॥१४४॥

पुष्पैर्बहुविधैर्युक्तं दिग्विदिक्षु जलान्वितम् ।
सितरक्तार्ककुसुमैर्नीलरक्तोत्पलैर्युतम् ॥१४५॥

लतावितानगृहकैः क्वचिद् क्वचिदवस्थितैः ।
कदलीस्तम्भषण्डैश्च[९४] दाडिमाद्यैर्विराजितम् ॥१४६॥

दहिगुहेंलो, शिरीष, अशोक, पुत्रजीवी नाम गरेको फूल विशेष, मेहदी, जाइफल, नागकेशर, मौलसिरी, रातो गुलाफ, बेल, चाँप, सेतो धतुरो, विजयसाल, जाई, पाँचपाते र दशपाते फूल हुने तगर वृक्षका कुञ्जहरूले तथा पहेंलो श्रीखण्ड, सहिजन, जुही, कण्टकारी, अमारो, पहेंलो कटसरैयाहरूले युक्त शिवाश्रमको बगैंचा हुनुपर्दछ ।१४२-१४३।

---

९१ क, घ . पत्रञ्जीवक । ग. पुञ्जीव ।

९२ ख. तमाल ।

९३ क, ङ. कुरुण्ठकैः । ख . कुरुठकै । ग. कुरुण्टकैः । घ. कुरुण्डकैः ।

९४ ख, घ, ङ. खण्डैश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यसैगरी त्यस बगैंचामा करवीर, अनेक रङ्का सयपत्रीहरू अनेक ठाउँमा विशेष विन्यासका साथ बाटाहरू र क्यारीहरू हुनुपर्दछ।१४४।

त्यस्तै सबै दिशा र कोणहरूमा धेरै किसिमका फूलहरूले युक्त पानीको व्यवस्था भएको र सेता राता आदि सूर्यमुखीका फूलहरू, नीला र राता कमलहरूले युक्त त्यो बगैंचा हुनुपर्दछ।१४५।

इति कृत्वा बहिस्तस्य प्राकारं कल्पयेन्महत् ।
कपाटगोपुरोपेतं परिखावंशसंयुतम् ॥१४७॥

तृतीयाच्च[९५] पुरादूर्ध्वं विद्याव्याख्यानमण्डपम् ।
गवाक्षनिर्गमोपेतं विचित्रं परिकल्पयेत् ॥१४८॥

पुरार्द्धं[९६] पञ्चमं कार्यं शिवस्य वडभीगृहम् ।
षड्ढस्तमष्टदीर्घं[९७] वा चारुपट्टविनिर्मितम् ॥१४९॥

तत्र मृद्दारुशैलं वा स्थापयेद्विधिवच्छिवम् ।
सर्वविद्याविधातारं सर्वज्ञं लकुलीश्वरम् ॥१५०॥

त्यो बगैंचा कतै लताकुञ्जहरूले, कतै केराका थामका झाडीहरू र कतै दाडिमका बोटहरूले पनि सुशोभित हुनुपर्दछ।१४६।

यसरी शिवाश्रमको बगैंचा बनाएर त्यसको बाहिर पल्लाहरूसहितको मूल द्वारले युक्त अग्लो पर्खाल तथा गहिरा खाइहरू र कतै बाँसका बारहरू बनाउनु पर्दछ।१४७।

तेस्रो तलाभन्दा माथि झ्याल तथा ढोकाहरूले युक्त भएको शिवशास्त्रको प्रवचनका लागि विचित्र प्रकारको मण्डप बनाउनू।१४८।

घरको पाँचौ तलामा माथिल्लो आधा भागमा छ हात चाक्लो र आठ हात लामो सुन्दर मुकुट भएको भगवान् शिवको माथिल्लो आवास बनाउनू।१४९।

त्यहाँ माटो, काठ वा ढुङ्गाबाट निर्मित सम्पूर्ण विद्याहरूका प्रतिष्ठान सर्वज्ञ लकुली (पाशुपत) दर्शनका प्रतिपादक भगवान् शिवको (प्रतिमा)को विधिवत् स्थापना गर्नू।१५०।

---

९५ ग. तृतीयाच्च।

९६ ग. परार्द्धम्।

९७ ख. षड्यष्टमं सुदीर्घम्। ग. षड्ढतमष्ठपट्टम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वृतं शिष्यैः प्रशिष्यैश्च[९८] व्याख्यानोद्यतपाणिकम् ।
पद्मासनस्थं सुश्वेतं प्रसन्नवदनं गुरुम्[९९] ॥१५१॥

एवं शिवाश्रमं कृत्वा भक्त्या वित्तानुसारतः ।
तत्प्रतिष्ठान्ततः कुर्यात्पूजासंस्कारलक्षणम् ॥१५२॥

विद्यादानोक्तविभवैः शोभां कृत्वा तथाग्रतः ।
पञ्चभिः पञ्चगव्येन स्नाप्यै[१००]शान्यां शिवं[१०१] क्रमात् ॥१५३॥

स्नापयेद् गन्धतोयाद्यैः स्नानवस्त्रेण संयुतम् ।
तूर्यघोषैस्तमानीय स्थापयेत्पुष्पमण्डपे ॥१५४॥

ततश्चन्दनपुष्पाद्यैः पूजयित्वाऽधिवासयेत् ।
जप्त्वा पञ्चविधं स्तोत्रं शिवं विज्ञापयेत्ततः ॥१५५॥

यसैगरी शिष्यप्रशिष्यहरूद्वारा घेरिएका शास्त्रीयप्रवचनका लागि हातमाथि उठाएका, पद्मासनमा बसेका, श्वेतवस्त्रधारी, हँसिलो मुहार भएका गुरुको स्थापना गर्नू ।१५१।

यसरी आफूसँग भएको धनअनुसार भक्तिपूर्वक शिवाश्रम बनाएर पूजा तथा संस्कारका लक्षणहरूले युक्त त्यस शिवाश्रमको प्रतिष्ठा गर्नू ।१५२।

विद्यादान प्रकरणमा भनिएका सामग्रीहरूद्वारा पहिले सबै शोभा प्रकल्प तयार गरेर ऐशान्य दिशामा पञ्चगव्यद्वारा क्रमैसँग पाँचपटक स्नान गराएर स्नानवस्त्रले युक्त शिवलाई सुगन्धित जल आदिले स्नान गराउँनू र बाजा-गाजाका साथ शिवलाई ल्याएर पुष्पमण्डपमा राख्नू ।१५३-१५४।

अद्याधिवासनं देव ! श्वः प्रतिष्ठाविधिस्तव ।
भक्तानामनुकम्पायै सान्निध्यमुपकल्पये[१०२] ॥१५६॥

प्रातः स्नाप्य पुनर्देवं पूजयित्वा प्रकल्पयेत् ।
पवित्रैः स्थापयेद् वेद्यां पादादारभ्य पञ्चभिः ॥१५७॥

ततः सुगन्धगन्धाद्यैर्नित्यं भाव्यं शिवालये ।

---

९८ क, घ. शिष्यप्रशिष्यैश्च । ङ. वृत्तशिष्यप्रशिष्यञ्च ।
९९ ग. शुभम् ।
१०० ग. स्थाप्य ।
१०१ ग. शिवाम् ।
१०२ ग. उपकल्पये ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिवञ्च पूजयेत् पुष्पैः स्नानमघूर्य[१०३] सुगन्धिभिः ॥१५८॥

सशिष्यस्तं प्रणम्येशं गुरुर्व्याख्यां प्रवर्तयेत् ।
प्राङ्मुखोदङ्मुखो वापि पुण्याहार्थं शिवाग्रतः ॥१५९॥

चन्दन, फूल आदिले पूजा गरेर धूप आदिद्वारा संस्कार गर्नू र द्रव्य, कर्म, विधि, अभिजन र ब्रह्म यी पाँच स्तोत्रहरूको जप गरी भगवान् शिवलाई निवेदन गर्नू ।१५५।

हे भगवन् सदाशिव ! आज तपाईंको अधिवासनसंस्कार गरें, भोलि तपाईंको प्रतिष्ठाको कार्य सम्पन्न हुनेछ। भक्तहरू माथि कृपा गर्नका लागि तपाईंको सान्निध्यको तयारी गरेको छु ।१५६।

अर्को दिन बिहान स्नान गराएर विधिवत् पूजा गरेर पाँचवटा कुशका पवित्रहरूद्वारा खुट्टादेखि लिएर शिरसम्म वेदीमा भगवान् शिवलाई प्रतिष्ठित गर्नू ।१५७।

त्यसपछि शिवालयमा सधैं सुगन्धित द्रव्यहरूद्वारा स्नान तथा अघूर्यका साथ सुगन्धित पुष्पहरूद्वारा शिवको पूजा गर्नू ।१५८।

शिवका अगाडि शिष्यहरूसहित पूर्व अथवा उत्तर फर्केका गुरुले पुण्याह वाचनका साथ परमेश्वर शिवलाई प्रणाम गरेर शिवशास्त्रको प्रवचन गर्नू ।१५९।

ततः सम्पूजयेद् भक्त्या यजमानः स्वयं गुरुम् ।
दक्षिणाभिर्विचित्राभिर्भोजनाद्यैश्च पूर्ववत् ॥१६०॥

निवेदयेत्ततः स्थानं सर्वेषां शिवयोगिनाम् ।
सर्वोपकरणोपेतं प्रणिपत्य पुनः पुनः ॥१६१॥

एवं यः कारयेदाद्यः श्रीमच्छिवपुरम्महत् ।
स सर्वपापनिर्मुक्तः[१०४] शिवलोके महीयते ॥१६२॥

स गोत्रत्रिंशकोपेतः सभृत्यपरिवारितः ।
पुत्रमित्रादिसंयुक्तः सान्तःपुरपरिच्छदः ॥१६३॥

सुविचित्रैर्महायानैरसंख्यैः सार्वकामिकैः ।
शिववत् क्रीडते भोगैरणिमादिगुणान्वितः ॥१६४॥

---

१०३ क, ग, ङ. वर्ज्यम् ।
१०४ क, ख, ग, घ. सर्वपापविनिर्मूक्तः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्यसपछि यजमानले स्वयं विभिन्न प्रकारका वस्त्र, आभूषणसहितका दक्षिणाहरू तथा पहिले झैं भोजन आदिद्वारा गुरुको पूजा गर्नू ।१६०।

त्यसपछि सम्पूर्ण शिवयोगीलाई आफूले बनाएको सबै उपकरणहरूले युक्त भएको वासस्थान बार बार प्रणाम गरेर निवेदन गरोस् ।१६१।

यसरी जसले समग्र शोभाहरूले सम्पन्न ठूलो शिवगृह बनाउँदछ, ऊ सम्पूर्ण पापहरूबाट मुक्त र पहिलो भएर शिवलोकमा प्रतिष्ठित हुन्छ ।१६२।

यसरी शिवभवन बनाउने मानिस तीस पुस्ताहरूसहित सेवक, पुत्र, मित्र आदि र स्त्री एवं उनका परिचारकहरूसहित विचित्रका असंख्य सम्पूर्ण चाहनाहरू पूरा गर्ने ठूला ठूला विमानहरूद्वारा अणिमा आदि गुणले युक्त भई विविध सुखभोगहरूद्वारा शिव झैं रमाउँछ ।१६३-१६४।

ततः कालेन महता विद्यादानप्रभावतः ।
ज्ञानयोगं समासाद्य तत्रैव परिमुच्यते ॥१६५॥

स्थपतिः स्थापका वृक्षावलीवर्दाः सुकर्मिणः ।
यान्ति रुद्रपुरं सर्वे तदध्यक्षाश्च ये नराः ॥१६६॥

ये चापि वृत्तिभृतकाः शिवायतनकर्मणा ।
तेऽपि यान्ति मृताः स्वर्गं[१०५] शिवकर्मानुभावतः ॥१६७॥

शिवदासत्वमापन्ना नरनारीनपुंसकाः ।
तेऽपि तन्नामसंयोगाद्यान्ति रुद्रपुरं महत् ॥१६८॥

दत्ताः क्रीताः प्रविष्टाश्च दण्डोत्पन्ना बलाहृताः ।
विज्ञेया रुद्रगणिकाः शिवायतनयोषितः[१०६] ॥१६९॥

समयको ठूलो अन्तरालपछि विद्यादानका प्रभावले ज्ञानयोगलाई प्राप्त गरेर त्यहीं नै मुक्त हुन्छ ।१६५।

शिवभवन बनाउने कर्मी, शिवप्रासादका संस्थापकहरू, त्यहाँ रहेका रूखहरू, साँढेहरू र त्यहाँका राम्रो काम गर्ने सेवकहरू र ती सबै मानिसहरू जो त्यस शिवभक्तको अधीनमा रहेका हुन्छन्, ती सबै शिवलोक जान्छन् ।१६६।

जुन वेतनभोगीहरू वेतन लिएर शिवाश्रमको काम गर्दछन्, ती पनि शिवकार्यको प्रभावले मरेपछि स्वर्ग जान्छन् ।१६७।

---

१०५ ग. स्वर्गा ।
१०६ ख ग. योगतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिवको दासत्व प्राप्त गरेका पुरुष, स्त्री र नपुंसकहरू ती सबै शिवको नाममात्रको संयोगले पनि महान् रुद्रलोकलाई प्राप्त गर्दछन् ।१६८।

या रुद्रगणिकोत्पन्ना पुत्रपौत्रादिसन्ततिः[१०७] ।
सापि याति मृता स्वर्गं मातुरेवानुभावतः ॥१७०॥[१०८]

शिवायतनपर्यन्ते म्रियन्ते येऽपि जन्तवः ।
तेऽपि यान्ति शिवं लोकं किं पुनस्तत्समाश्रिताः ॥१७१॥

अत्यल्पमपि यः कुर्यादतिरम्यं[१०९] शिवाश्रमम् ।
द्विरेकवसतिमात्रं सोऽपि याति शिवं पुरम् ॥१७२॥

कृत्वा सुकुट्टिमां भूमिमीश्वरायतनाग्रतः[११०] ।
तत्र मण्डलकं कुर्यात् सुवृत्तं गोमयाम्भसा ॥१७३॥

शिवालयमा चढाइएका, किनिएका, कुनै प्रकारले शिवालयमा प्रवेश भएका, दण्डाबाट उत्पन्न र बलपूर्वक ल्याइएका शिवाश्रममा बस्ने स्वास्नी मानिसहरूलाई रुद्र गणिका भनिन्छ ।१६९।

रुद्रगणिकाबाट जुन छोरा, नाति आदि सन्तान पैदा हुन्छन्, ती सन्तानहरू पनि आमाको प्रभावले मरेपछि स्वर्ग जान्छन् ।१७०।

शिवाश्रमको परिसरमा जुनसुकै प्राणीहरू प्राण त्याग्दछन्, ती पनि सबै शिवलोक जान्छन् भने शिवमा नै आश्रित भएका मानिसहरूको के कुरा गर्नु ।१७१।

अत्यन्त सानो भए पनि जसले अत्यन्त मनोज्ञ शिवाश्रम र एउटा दुईटाको मात्र पनि बस्ने कोठा बनाउँछ उसले पनि शिवलोकलाई प्राप्त गर्दछ ।१७२।

सूत्रेण सुमितङ्कृत्वा नानावर्णकशोभितम् ।
विचित्रं कुसुमाकीर्णं मध्ये पङ्कजशोभितम् ॥१७४॥

प्रदीपाक्षतसंयुक्तमुदकं भ्राम्य पाणिना ।
मूर्ध्ना प्रणम्य मेदिन्यां शिवाय विनिवेदयेत् ॥१७५॥

---

१०७ ग. सर्वतः ।

१०८ ख. १६९ पद्यस्योत्तरार्द्धं १७० पद्यञ्च नास्ति । घ १६८ पद्यादारभ्य १७० पद्यं यावत् नास्ति ।

१०९ क, ग. रम्यैः ।

११० ङ. आयतनं गतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

यः कुर्यात् सकृदप्येवं शिवमण्डलकं नरः ।
CC-0. In Public Domain. Digitization by eGangotri
स सर्वकामसंयुक्तः शिवलोके महीयते ॥१७६॥[१११]

कालात्पुनरिहायातः श्रीमानर्थपतिर्भवेत् ।
ज्ञानवान् रूपवान् भोगी[११२] सुप्रियः सुद्विजः सुखी ॥१७७॥

विद्यामण्डलकं कृत्वा विद्याव्याख्यानमण्डपे ।
तत्राभ्यर्च्य शिवज्ञानं तद्व्याख्यां श्रृणुयात्ततः ॥१७८॥

शिवमन्दिरका अगाडि फर्श वा राम्रो भुँइ बनाएर त्यसमा गोबर र पानीले गोलाकार मण्डल बनाउनू र धागाले नापेर अनेक वर्णहरूले शोभायमान विभिन्न खाले फूलहरूले सजाइएको र बीचमा कमलद्वारा सुशोभित बनाइएको त्यस मण्डलमा बत्ती र अक्षताले युक्त पानीलाई हातले घुमाएर भूमिमा शिर राखेर ढोग्नू र शिवलाई चढाउनू ।१७३-१७५।

यसरी जसले एकपटक पनि शिवमण्डल बनाएर शिवलाई चढाउछ उसले सम्पूर्ण चाहनाहरू पूर्ण गरी शिवलोकमा प्रतिष्ठा पाउँछ ।१७६।

समयवश पुनः यस पृथ्वीमा झरेपछि शोभाले सम्पन्न, धनी, ज्ञानी, सुन्दर, सबै चिज भोग गर्ने क्षमता राख्ने, सबैको प्यारो, सुखसम्पन्न, ब्राह्मण बन्दछ ।१७७।

शिवमण्डलकाद्येन विधिनातीव शोभनम् ।
गुरुमण्डलकं कृत्वा शिवलोके महीयते ॥१७९॥

शिवविद्यागुरूणाञ्च कृत्वा मण्डलकं त्रयम् ।
यः श्रृणोति शिवज्ञानं तस्य विद्या प्रसीदति ॥१८०॥

अनेन विधिना ज्ञानं यः श्रृणोति प्रवक्ति च ।
स सम्प्राप्य श्रियं सौख्यं देहान्ते मुक्ति[११३]माप्नुयात् ॥१८१॥

आरोग्यशालां यः कुर्यान्महावैद्यपुरस्कृताम् ।
सर्वोपकरणोपेतां तस्य पुण्यफलं श्रृणु ॥१८२॥

शिवशास्त्रको व्याख्यान गरिने मन्दिरमा विद्यामण्डल बनाएर शिवज्ञानको पूजा गरी त्यसको व्याख्या वा प्रवचन सुन्नू ।१७८।

पहिलो शिवमण्डलका साथमा विधिपूर्वक अत्यन्त मनोज्ञ गुरुमण्डल बनाएमा शिवलोकमा प्रतिष्ठा

१११ ख. १७५,१७६ पद्ये न स्तः ।
११२ घ. भोगवान् ।
११३ घ. मोक्ष ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पाइन्छ ।१७९।

शिवमण्डल, विद्यामण्डल र गुरुमण्डल यी तीनै मण्डल बनाएर जसले शिवशास्त्र सुन्दछ, त्योसँग विद्याकी देवी प्रसन्न हुन्छिन् । १८०।

यस विधिद्वारा जसले शिवशास्त्र सुन्दछ अथवा जसले त्यसको प्रवचन गर्दछ, उसले लक्ष्मी र सुख प्राप्त गर्नुका साथै देहत्याग गरेपछि मोक्ष प्राप्त गर्दछ ।१८१।

जसले अत्यन्त राम्रा चिकित्सकहरूलाई अघि सारेर सम्पूर्ण उपकरणहरूले युक्त चिकित्सालय या अस्पताल बनाउँदछ, त्यस पुण्यको फल सुन ।१८२।

धर्मार्थ[११४]काममोक्षाणामारोग्यं साधनं यतः[११५] ।
तस्मादारोग्यदानेन दत्तं स्यात्तच्चतुष्टयम्[११६] ॥१८३॥

अप्येकमार्त्तं विद्वांसं स्वस्थीकृत्य[११७] प्रयत्नतः ।
प्राप्नोति सुमहत्पुण्यमनन्तं क्षयवर्जितम् ॥१८४॥

ज्ञानयोगरतं शान्तं रोगार्तं शिवयोगिनम् ।
यः करोति नरः स्वस्थं सर्वदानफलं लभेत् ॥१८५॥

ब्रह्मविष्णुसुराः सर्वे व्याधयः स्वजना नृपाः ।
योगस्यैते महाविघ्ना व्याधयस्तेन योगिनाम् ॥१८६॥

ब्रह्मक्षत्रविशः शूद्रान् रोगार्तान् यान् प्रयत्नतः ।
यत्पुण्यं महदाप्नोति न तत्सर्वैर्महामखैः ॥१८७॥

आरोग्य धर्म, अर्थ, काम र मोक्ष यी चारै पुरुषार्थहरूको साधन हो, त्यसैले आरोग्य दान गर्दा चारै पुरुषार्थ दान गरेको ठहरिन्छ ।१८३।

एउटा पनि रोगले पीडित विद्वान्लाई स्वस्थ बनाएर अनन्त अविनाशी ठूलो पुण्य प्राप्त हुन्छ ।१८४।

ज्ञानयोगमा संलग्न शान्त रोगार्त शिवयोगीलाई जुन मानिसले स्वस्थ बनाउँदछ उसले सबैप्रकारका दानको फल प्राप्त गर्दछ ।१८५।

ब्रह्मा, विष्णु, देवताहरू, सबै रोगहरू, आफन्तहरू र राजाहरू यी सबै योगका लागि ठूला विघ्न हुन् ।

११४ घ. सर्वार्थ ।
११५ क, घ. मति ।
११६ ङ. चतुर्गुणम् ।
११७ ख. स्वस्थकृत्य । ग . सुस्थीकृत्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

त्यसैले यी सबै योगीहरूका रोग हुन् ।१८६।

CC0. In Public Domain. Digitization by eGangotri

आकाशस्य यथा नान्तः सुरैरप्युपलभ्यते ।
तद्वदारोग्यदानस्य नान्तः संविद्यते तथा ॥१८८॥

पुण्येनानेन[११८] महता गत्वा शिवपुरं नरः ।
मोदते विविधैर्भोगैर्विमानैः सार्वकामिकैः ॥१८९॥

एकविंशकुलोपेतः सभृत्यपरिवारितः ।
आस्ते शिवपुरे तावद्यावदाभूतसम्प्लवम् ॥१९०॥

ततस्तत्कर्मशेषेण सम्प्राप्ते प्रलये तथा ।
ज्ञानमुत्पद्यते तस्य रुद्रेभ्यः परिवारितः ॥१९१॥

ज्ञानाद् विरक्तः संसारे शिवध्यानमुपाश्रितम् ।
स्वदेहं तृणवत् त्यक्त्वा सर्वदुःखान्तमाप्नुयात् ॥१९२॥

रोगग्रस्त ब्राह्मण, क्षत्रिय, वैश्य र शूद्रहरूलाई यत्नपूर्वक स्वस्थ गर्दा जुन ठूलो फल पाइन्छ, त्यो फल ठूला ठूला सबै यज्ञहरूद्वारा पनि पाइँदैन ।१८७।

देवताहरूले पनि जसरी आकाशको अन्तलाई प्राप्त गर्न सक्दैनन्, त्यसै गरी आरोग्य दानबाट प्राप्त हुने पुण्यको पनि अन्त्य भेटिँदैन ।१८८।

यस आरोग्यदानरूपी ठूलो पुण्यद्वारा मानिस सम्पूर्ण कामनाहरू पूरा गर्ने विमानहरूद्वारा शिवलोक गएर नानाथरी सुखभोगहरूबाट रमाउँछ ।१८९।

एक्काइस कुलहरूसहित सेवक तथा परिवारले युक्त भई तबसम्म शिवलोकमा रहन्छ, जबसम्म महाभूतहरू पानीमा विलीन हुँदैनन् ।१९०।

समस्तदुःखनिर्मुक्तः शुद्धः स्वात्मव्यवस्थितः ।
सर्वज्ञः परिपूर्णश्च मुक्त इत्यभिधीयते ॥१९३॥

तस्माद् भोगापवर्गार्थी रोगार्तं समुपाचरेत् ।
विशेषेण च योगीन्द्रमात्मना च धनेन च ॥१९४॥

---

११८ ग. पुण्मानेन । ङ . पुण्यदानेन ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रोगिणो[११९] नोद्विजेत् प्राज्ञस्तन्मलानाञ्च सर्वतः ।
सम्पश्येद् गुरुवन्नित्यमेवं धर्मः प्रवर्तते ॥१९५॥

योऽनुगृहीतमात्मानं मन्यमानो दिने दिने ।
उपसर्पति रोगार्तं तीर्णस्तेन भवार्णवः ॥१९६॥

एवमेतद् बहुविधं विद्यादानं प्रकीर्तितम् ।
सर्वेषामेव वर्णानां विधिनानेन तद्भवेत् ॥१९७॥

त्यसपछि प्रलयकाल आउँदा बाँकी रहेका कर्महरूका कारण उसलाई ज्ञान प्राप्त हुन्छ र रुद्रहरूबाट परिवृत भएर ज्ञानबाट वैराग्य प्राप्त गर्दै संसारमा शिवध्यानको आश्रय लिएर आफ्नो देहलाई सिन्को झैं त्यागेर सम्पूर्ण दुःखहरूबाट मुक्त हुन्छ ।१९१-१९२।

सम्पूर्ण दुःखबाट मुक्त भएको शुद्ध आफ्नै आत्मामा व्यवस्थित सर्वज्ञ र परिपूर्ण नै मुक्त कहलाउँछ ।१९३।

त्यसैले भोग तथा मोक्षका लागि रोगले पीडित मानिसहरूको सेवा गर्नू, विशेष गरेर आफूले र धनले रोगी योगिराजहरूको सेवा गर्नू ।१९४।

बुद्धिमान् मानिस रोगी तथा रोगीका फोहोरहरूका कारणले कुनै किसिमले उद्विग्न हुनुहुँदैन। सधैं रोगीलाई गुरुझैं हेर्नु पर्दछ। यसरी नै धर्म प्रवृत्त हुन्छ ।१९५।

जसले दिनदिनै आफूलाई कृतार्थ ठानेर रोगीको सेवा गर्दछ, त्यसले संसार सागर सजिलै तर्दछ ।१९६।

यसरी धेरै प्रकारको विद्यादान बताइएको छ। यसै विधिअनुसार ब्राह्मण, क्षत्रिय, वैश्य र शूद्र सबै वर्णहरूका लागि विद्यादानद्वारा त्यो पुण्यफल प्राप्त हुन्छ ।१९७।

इति श्रीशिवधर्मोत्तरे विद्यादानो नाम द्वितीयोऽध्यायः ।

शिवधर्मोत्तरमा विद्यादान नामक दोस्रो अध्याय सकियो ।

---

११९ घ. योगिनः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ ज्ञानयोगमाहात्म्यवर्णनं नाम तृतीयोऽध्यायः

अथ ये सततं भक्ता भवन्ति शिवयोगिनाम् ।
ते विन्दन्ति महाभोगानन्ते योगञ्च शाङ्करम् ॥ १॥

भोगयोगार्थिभिस्तस्मात् सम्पूज्याः शिवयोगिनः ।
प्रतिश्रयान्नपानेन शयूयावस्त्रासनादिभिः ॥२॥

यः स्थानगात्रशुश्रूषां प्रकुर्याच्छिवयोगिनाम् ।
दरिद्रः सततं भक्त्या तस्य पुण्यफलं श्रृणु ॥३॥

सूर्यतेजः प्रतीकाशैर्विमानैः सार्वकामिकैः ।
मृतः शिवपुरं गच्छेत् त्रिसप्तकुलसंयुतः ॥४॥

तत्र दिव्यैर्महाभोगैः स्त्रीसहस्रैर्मनोरमैः ।
कल्पकोटिशतं दिव्यं सेव्यमानः स तिष्ठति ॥५॥

अब ज्ञानयोगमाहात्म्यवर्णन नाम गरेको तृतीय अध्याय प्रारम्भ हुन्छ ।

जो शिवयोगीहरूका निरन्तर भक्त हुन्छन्, तिनीहरूले ठूला ठूला सुखभोगहरू प्राप्त गर्दछन् र अन्तमा शिवयोग प्राप्त गर्दछन् ।१।

त्यसैले भोग विलास तथा योगको चाहना राख्नेहरूले आवास, अन्नपान, शयूया, लत्ताकपडा तथा आसनादिद्वारा शिवयोगीको पूजा गर्नु पर्दछ ।२।

जसले शिवयोगीहरूको आश्रम तथा शरीरको निरन्तर भक्तिपूर्वक सेवा गर्दछ त्यो दरिद्र भए पनि त्यसको पुण्यफल सुन ।३।

त्यसले सूर्यको जस्तो तेज भएको सम्पूर्ण इच्छाहरूलाई पूरा गर्ने विमानहरूद्वारा २१ कुलहरूसहित मरेपछि शिवलोकलाई प्राप्त गर्दछ ।४।

त्यस शिवलोकमा ऊ दिव्य ठूला ठूला भोग, विलासहरू र हजारौं सुन्दर स्त्रीहरूद्वारा सुसेवित भएर दिव्य अरबौं कल्पसम्म रहन्छ ।५।

तदन्ते विष्णुभवने तावत्कालं वसेत् पुनः ।
वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैश्च पूजितः ॥६॥

विष्णुलोकाद् ब्रह्मलोकं सम्प्राप्य क्रीडते पुनः ।[१]
भोगैः सुविपुलैः सूक्ष्मैस्तावत्कालमनुत्तमैः ॥७॥

---

१ घ. ६ पद्यस्योत्तरार्द्धं ७ पद्यस्य पूर्वार्द्धं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
प्रजापतीन्द्रगन्धर्वयक्षलोकेष्वनुक्रमात् ।
भोगान्नानाविधान् भुक्त्वा पृथिव्यां जायते क्रमात् ॥८॥

कुले महति विप्राणां प्रज्ञाशीलगुणान्वितः ।
ततः स पूर्वभावेन योगीन्द्रान् पर्युपासते ॥९॥

तत्सम्पर्काच्छिवज्ञानं प्राप्य योगं निषेवते ।
योगाद् विरक्तः संसारात् प्राप्नोति परमं पदम् ॥१०॥

इति यः कुरुते भक्तिं सततं शिवयोगिनाम् ।
स द्वितीये तृतीये वा देहे योगमवाप्नुयात् ॥११॥

त्यसपछि त्यत्तिनै समयसम्म विष्णुलोकमा प्राप्त हुने विविध भोग-विलासका साथ हजारौं स्त्रीहरूद्वारा पूजित भएर रहन्छ ।६।

विष्णुलोकको भोगपछि ब्रह्मलोकलाई प्राप्त गरेर ठूला ठूला, अत्यन्त सूक्ष्म र अत्यन्त श्रेष्ठ भोग-विलासहरूलाई त्यत्तिनै समयसम्म प्राप्त गरी रमाउँछ ।७।

त्यसपछि क्रमशः प्रजापति, इन्द्र, गन्धर्व र यक्षलोकहरूमा नानाथरी भोग-विलासहरूलाई भोग गरेर पृथ्वीमा जन्म लिन्छ ।८।

त्यसपछि ब्राह्मणहरूको उच्चकुलमा जन्मेर बुद्धि, राम्रो बानी र विविध गुणहरूले युक्त हुँदै पहिलेकै संस्कारका कारण योगिराजहरूको सेवा गर्दछ ।९।

शिवयोगीहरूको सान्निध्यको संस्कारबाट शिवज्ञान प्राप्त गरेर योगको सेवन गर्दछ। योग गर्नाले संसारदेखि विरक्त भएर शिवको परम पदलाई प्राप्त गर्दछ ।१०।

अथ पूजादिकार्याद्यैर्भेदैर्बहुविधैः स्थितः ।
कर्मयोगः समाख्यातस्तपश्चान्द्रायणादिकः ॥१२॥

स्वाध्यायश्च जपः प्रोक्तः शिवमन्त्रश्च स द्विधा ।
ध्यानयज्ञः समाख्यातः शिवचिन्ता मुहुर्मुहुः ॥१३॥

अध्यापनमध्ययनं व्याख्याश्रवणचिन्तनम् ।
इति पञ्चप्रकारोऽयं ज्ञानयज्ञः प्रकीर्तितः ॥१४॥

उत्तरोत्तरवैशिष्ट्यं सर्वेषां परिकीर्तितम् ।
पञ्चानामपि यज्ञानां ध्यानयज्ञो विमुक्तिदः ॥१५॥

नास्ति ज्ञानं विना ध्यानं नास्ति ज्ञानमयोगिनः ।
ज्ञानं ध्यानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ॥१६॥

ज्ञानं प्रसन्नमेकाग्रमशेषोपाधिवर्जितम् ।
योगाभ्यासेन सततं विरक्तस्योपजायते ॥ १७॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यसरी जसले निरन्तर शिवयोगीहरूको भक्ति गर्दछ, ऊ दोस्रो वा तेस्रो जन्ममा योगलाई प्राप्त गर्दछ ।११।

पूजा आदि अनेक किसिमका कार्यहरू कर्मयज्ञ र चान्द्रायणादि व्रत तपोयज्ञ कहलाउँछन् ।१२।

स्वाध्याय जपयज्ञ हो भने जप शिवमन्त्रात्मक हुन्छ। एकाक्षर र षडक्षर दुई किसिमको शिवमन्त्र बताइएको छ। पटक पटक शिवको चिन्तन गर्नुलाई ध्यानयज्ञ भनिन्छ ।१३।

पढ्नु, पढाउनु, व्याख्या गर्नु, सुन्नु र चिन्तन गर्नु पाँच किसिमको ज्ञानयज्ञ कहलाउँछ ।१४।

कर्म, जप, तप, ध्यान र ज्ञान यी पाँच यज्ञहरूमा अघिल्लो अघिल्लोको अपेक्षा पछिल्लो पछिल्लो विशेष मानिएको छ। यी पाँच यज्ञहरूमा ध्यानयज्ञ मोक्षदायक मानिन्छ ।१५।

ज्ञान विना ध्यान हुन सक्दैन र अयोगीलाई ज्ञान हुन सक्दैन। जसले ज्ञान र ध्यान दुबै प्राप्त गर्न सक्दछ त्यसले संसारसागर तर्दछ ।१६।

श्रुतञ्चिन्तामयं ज्ञानं विकल्पबहुलं यतः ।
तस्मात्तदप्रसन्नत्वाच्चञ्चलन्न विमुक्तिदम् ॥१८॥

श्रुताद् विवर्द्धते प्रज्ञा प्रज्ञातश्चिन्तयेत् पुनः ।
विमलन्तत् प्रसन्नञ्च चिन्त्यमानं भवेच्छनैः ॥१९॥

आरम्भकालः श्रवणं क्रियाकालश्च चिन्तनम् ।
चिन्तया भावना तस्य निष्ठा काले प्रसन्नता ॥२०॥

ज्ञानं विकल्पबहुलं रागाद्यैः कलुषीकृतम् ।
नाज्ञानमलशुद्ध्यर्थं कलुषोदकवद् भवेत् ॥२१॥

निःसारमतिकष्टञ्च भवं भावयतः शनैः ।
अम्भसीव शरत्काले तत्प्रसन्नं क्रमाद् भवेत् ॥२२॥

स्वच्छ, एकाग्र र सम्पूर्ण उपाधिहरू रहित ज्ञान निरन्तर योगाभ्यासद्वारा वैराग्ययुक्त व्यक्तिले प्राप्त गर्न सक्दछ ।१७।

चिन्तायुक्त तथा धेरै विकल्प भएको जो ज्ञान हो, त्यो अस्वच्छ र चञ्चल भएकाले मोक्षदायक छैन भनेर शास्त्रहरूले भनेका छन् ।१८।

शास्त्रश्रवणबाट बुद्धि बढ्दछ, बुद्धिबाट चिन्तन गर्नु पर्दछ, चिन्तनबाट सुस्त सुस्त ध्यान निर्मल र स्वच्छ हुन्छ ।१९।

श्रवण प्रारम्भिक अवस्था हो, चिन्तन क्रिया काल हो, चिन्तनद्वारा भावना, निष्ठा र समय बित्दै जाँदा प्रसन्नता प्राप्त हुन्छ ।२०।

धेरै विकल्पहरू भएको र रागद्वेषहरूद्वारा कलुषित ज्ञान कलुषित पानीले कुनै वस्तुलाई सफा गर्न नसके झैं अज्ञानरूपी मैलोलाई पखाल्न सक्दैन ।२१।

संसारलाई सारहीन र अत्यन्त कष्टयुक्त भएको भावनाबाट सुस्तरी शरद् ऋतुमा पानी सङ्लेझैं ज्ञान

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

सङ्लिदै जान्छ।२२।

CC0. In Public Domain. Digitization by eGangotri

यदा प्रसन्नमेकाग्रं स्तिमितोदकवत्[२] स्थितम्।
तदा ज्ञानमिति प्रोक्तमज्ञानमिति चेतरत्॥ २३॥

इति प्रसन्नं यज्ज्ञानं भावनामयमुत्तमम्।
रागाद्यैरपरामृष्टन्तद् विज्ञेयं विमुक्तिदम्॥२४॥

अज्ञानपाशबद्धत्वादमुक्तः पुरुषः स्मृतः।
तस्माज्ज्ञानेन मुक्तिः स्यादज्ञानस्य परिक्षयात्॥२५॥

संसारबीजमज्ञानं संसारज्ञः पुमान् यतः।
ज्ञानात्तस्य निवृत्तिः स्यात् प्रकाशात्तमसो यथा॥२६॥

अज्ञाने सति रोगाद्या धर्माधर्मौ च तद्वशौ।
धर्माधर्मवशात्पुंसः शरीरमुपजायते॥२७॥

शरीरे सति संक्लेशैः सर्वैः संयुज्यते यतः।
ततः क्लेशप्रहाणार्थं पुनर्देहन्न कामयेत्॥२८॥

जब ज्ञान स्वच्छ र जमिरहेको पानी झैं एकाग्र रूपमा स्थिर रहन्छ, तब त्यो ज्ञान कहलाउँछ। त्यसभन्दा भिन्न अर्थात् अस्वच्छ र अस्थिर अज्ञान कहलाउँछ।२३।

यसरी जो ज्ञान स्वच्छ भावनाले परिपूर्ण, श्रेष्ठ र रिसरागहरूद्वारा अस्पृष्ट रहन्छ, त्यसले नै मुक्ति प्रदान गर्दछ भनी जान्नू।२४।

अज्ञानरूपी पाशोले जेलिएको मानिस मुक्त हुँदैन। त्यसैले अज्ञानको नाशबाट ज्ञान प्राप्त हुन्छ र ज्ञानद्वारा मुक्तिप्राप्त हुन्छ।२५।

अज्ञान संसारको बीज हो, त्यसकारण मानिसले संसारलाई बुझ्नु पर्दछ। जसरी प्रकाशबाट अन्धकारको नाश हुन्छ, त्यसै गरी ज्ञानबाट अज्ञानको नाश हुन्छ।२६।

अज्ञानले रोगादि हुन्छन्। धर्म र पाप अज्ञानका अधीन हुन्छन्। धर्म र पापकै कारणबाट मानिसको शरीर उत्पन्न हुन्छ।२७।

जगतस्तत्त्वसम्बोधादज्ञानं विनिवर्तते।
अज्ञानविनिवृत्तौ च रागादीनामसम्भवः॥२९॥

रागाद्युपशमात्पुंसः पुण्यपापपरिक्षयः।
तत्क्षयाच्च शरीरेण न पुनः सम्प्रयुज्यते॥३०॥

अशरीरश्च संक्लेशैः सर्वैरेव न बाध्यते।
क्लेशमुक्तः प्रसन्नत्वान्मुक्त इत्यभिधीयते॥३१॥

---

२ ग. दधिवत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्मादज्ञानमूलानि सर्वदुःखानि देहिनाम् ।
ज्ञानेन च तदज्ञानन्निवर्तेत न कर्मभिः ॥३२॥

नास्ति ज्ञानादृते पुंसां पुण्यपापपरिक्षयः ।
मोक्षार्थी पुरुषस्तस्माज्ज्ञानमेव सदाभ्यसेत् ॥३३॥

मार्ज्यमानः सदा यद्वद् दर्पणो निर्मलो भवेत् ।
ज्ञानाभ्यासात्तथा पुंसां बुद्धिर्भवति निर्मला ॥३४॥

शरीर रहँदा सबै किसिमका क्लेशहरूले युक्त भइन्छ त्यसैले क्लेशहरूको विनाशका लागि फेरि शरीरको चाहना गर्नु हुँदैन ।२८।

संसारको तत्त्वज्ञानबाट अज्ञान हट्दछ । अज्ञान हटेमा रागद्वेष आदिको सम्भावना हुँदैन ।२९।

रिस, राग आदिको शमनबाट धर्म र पाप नष्ट हुन्छन् । धर्म र पाप दुबै नष्ट भएपछि पुनः शरीर प्राप्त हुँदैन ।३०।

शरीररहित हुँदा सबै क्लेशहरूको बाधा रहँदैन । क्लेशरहित हुँदा प्रसन्नता प्राप्त हुन्छ र त्यसैलाई मुक्ति भनिन्छ ।३१।

त्यसकारण शरीरीहरूका सबै दुःखहरू अज्ञानबाट उत्पन्न हुन्छन् । ज्ञानबाट अज्ञानको निवृत्ति हुन्छ, कर्मबाट होइन ।३२।

मानिसहरूका धर्म र अधर्महरूको नाश ज्ञानविना हुन सक्दैन । यदि मानिस मोक्षको चाहना राख्छ भने सधैं ज्ञानार्जनमा अभ्यस्त रहोस् ।३३।

ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ।
स सर्वकार्याण्युत्सृज्य तत्रैव परिधावति ॥३५॥

ज्ञानामृतरसः[३] प्रायस्तेन नास्वादितो भवेत् ।
येनान्यत्राभिरमते तद् विहायैव दुर्मतिः ॥३६॥

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥३७॥

लोकद्वयेऽपि कर्तव्यं किञ्चित्तस्य न विद्यते ।
इहैव स विमुक्तः स्यात् सम्पूर्णप्रियदर्शनः ॥३८॥

नास्ति ज्ञानात्परं किञ्चित् पवित्रं पापनाशनम् ।
तत् सदाऽभ्यासयोगेन शनैरात्मनि विन्दति ॥३९॥

जसरी सधैं पुछिएको ऐना निर्मल हुन्छ, त्यसै गरी ज्ञानको अभ्यासबाट मानिसको बुद्धि निर्मल हुन्छ ।३४।

जुन मानिसले ज्ञानरूपी अमृतरसको एक पटक आस्वादन गर्दछ, त्यो सबै कामहरू त्यागी त्यसैमा

---

३ क, घ, ङ. रसम् ।

दौडिरहन्छ ।३५।

CC0. In Public Domain. Digitization by eGangotri

जसले ज्ञानरूपी अमृतरस पान गरेको छैन त्यो दुर्बुद्धि ज्ञानामृतरसलाई छोडेर अन्यत्र रमाउँछ ।३६।

सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा महेश्वराः ।
शिवतुल्यबलाः सिद्धाः परं शिवपुरं गताः ।।४०।।

कन्यारूपिणी, शान्त स्वभाव भएकी र करोडौं सूर्यको जस्तो कान्ति भएकी उमाको भक्तिपूर्वक ध्यान गर्दा उमालोक प्राप्त हुन्छ ।३६।

शुद्ध स्फटिक मणिको जस्तो सेतो कान्ति भएका, जटाको मुकुट धारण गरेका, तीनवटा आँखा र चारवटा हात भएका, शान्त र रुद्राक्षमाला धारण गरेका शिवको ध्यान गर्दा शिवलोक प्राप्त हुन्छ ।३७।

वरद र अभय शक्तिहरू हातमा भएका र एक हातमा त्रिशूललाई धारण गरेका शिवको नित्य ध्यान गर्दा शिवस्थान प्राप्त हुन्छ ।३८।

---

२१ ख. शक्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ज्ञानयोगमा संलग्न जुन मानिसहरूले शिवस्थानलाई प्राप्त गर्दछन्, तिनीहरूले फेरि यस घनघोर संसारसागरमा जन्म लिनु पर्दैन ।३९।

माथिल्लो शिवलोक गएका मानिसहरू सबै कुरा जान्ने, सबै ठाउँमा जान सक्ने, शुद्ध, परिपूर्ण, ठूलो सामर्थ्यले युक्त भएका र शिवको जस्तो बल भएका सिद्ध बन्दछन् ।४०।

योगं प्रवेदयिष्यामि पृथगध्यायसम्मितम् ।
उपरिष्टाच्च लोकानां स्वरूपं चाप्यनुक्रमात् ॥४१॥

तत्राष्टगुणमैश्वर्यं पार्थिवं पिशिताशिनाम् ।
तत्सायुज्यगतानाञ्च नराणां तत्समं स्मृतम् ॥४२॥

रक्षस्सु षोडशकलं पार्थिवानाञ्च तद् द्विधा ।
एतच्च निरवशेषं यक्षेष्वन्यच्च तैजसम् ॥४३॥

गान्धर्वाणाञ्च वायव्यं याक्षञ्च सकलं स्मृतम् ।
पाञ्चभौतिकमिन्द्रस्य चत्वारिंशद्गुणं महत् ॥४४॥

सोमस्य मानसं दिव्यं यच्चाधः पाञ्चभौतिकम् ।
सौम्यं प्रजापतिस्थानमहङ्कारगुणान्वितम् ॥४५॥

छुट्टै अध्यायमा समावेश गरेर योगको बारेमा बताउने छु । त्यसभन्दा पहिले क्रमशः लोकहरूको स्वरूप बताउँछु ।४१।

ती लोकहरूमा मांसाहारी पिशाचहरूको पार्थिव लोक हो जो आठगुणा ऐश्वर्यले युक्त हुन्छ । पिशाचको समान आहार विहार भएका मानिसहरूका लागि पनि त्यही पार्थिव लोक समानरूपमा भोगभूमि मानिएको छ ।४२।

राक्षसहरूको पार्थिव लोक सोह्रगुणा ऐश्वर्यले बढी हुन्छ । त्यो पनि दुई किसिमको छ राक्षसहरूका लागि सामान्य र यक्षहरूका लागि तैजस मानिएको छ ।४३।

गन्धर्वहरूको र यक्षहरूको वायुनिर्मित लोक बताइएको छ भने इन्द्रलोक पृथ्वी, जल, तेज, वायु र आकाश यी पञ्चमहाभूतले बनेको छ र चालीस गुणा ठूलो छ ।४४।

चन्द्रलोक मानस र अलौकिक छ, त्यसको तल्लो भाग पञ्चभूतले बनेको छ । प्रजापतिको स्थान सौम्य र अहङ्कारले युक्त छ ।४५।

चतुष्षष्टिगुणं ब्राह्मं बौद्धमैश्वर्यमुत्तमम् ।
विष्णोः प्राधानिकं सूक्ष्ममैश्वर्यं ब्रह्मणः पदम्[२२] ॥४६॥

श्रीमच्छिवपुरे नित्यमैश्वर्यं सार्वकामिकम् ।

---

२२ ख, ग. परम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शिवेन शिवभक्तानां कल्पितं वैष्णवात्परम् ॥४७॥

स्कन्दस्य भगवत्याश्च वैष्णवात् परमम्महत् ।
सूक्ष्ममव्यक्तिकं दिव्यमैश्वर्यं सार्वकामिकम् ॥४८॥

अनन्तगुणमैश्वर्यं[२३] शिवस्यात्मगतं महत् ।
आदिमध्यान्तरहितं विशुद्धं तत्त्वलक्षणम् ॥४९॥

सर्वाभिभासकं सूक्ष्ममनौपम्यं परात्परम् ।
सुसम्पूर्णं जगद्धेतुः पशुपाशविमोक्षणम् ॥५०॥

चौसट्ठीगुणा ठूलो बुद्धितत्त्वसँग सम्बद्ध ऐश्वर्यपूर्ण र उत्तम ब्रमलोक छ। विष्णुको लोक प्रधानतत्त्वले युक्त, सूक्ष्म र ब्रह्माको लोकभन्दा माथि र ऐश्वर्ययुक्त छ।४६।

शोभायमान शिवलोकमा सधैं सम्पूर्ण कामनाहरूलाई पूरा गर्ने सबै ऐश्वर्य रहन्छन्। यो शिवद्वारा आफ्ना भक्तहरूका लागि निर्मित र विष्णुलोक भन्दा माथि छ।४७।

स्कन्दलोक र उमालोक विष्णुलोक भन्दा पर र ठूला छन्। यिनीहरू सूक्ष्म, अव्यक्त र दिव्य ऐश्वर्यले युक्त र सम्पूर्ण चाहनाहरू पूरा गर्न सक्षम छन्।४८।

त्यसमाथिको शिवलोक अनन्तगुण तथा ऐश्वर्यले युक्त र ठूलो छ। यसको आदि, मध्य र अन्त्य छैन। विशुद्ध र तत्त्वस्वरूपले युक्त छ।४९।

सम्पूर्ण लोकहरूलाई प्रकाशित गर्ने सूक्ष्म, अनुपम, सबैभन्दा माथि, पूर्ण, संसारको कारणभूत र अज्ञानरूपी जालबाट मोक्ष दिने शिवलोक छ।५०।

यो यं स्थानमनुप्राप्तस्तस्य भोगास्तदात्मकाः ।
ऐश्वर्यं तत्प्रमाणञ्च भवेदीशप्रसादतः ॥५१॥

तारारूपविमानानां भीमा दृश्यन्ति कोटयः ।
अष्टाविंशतिरेवोर्ध्वं सुदीप्ताः सुहृदात्मनाम् ॥५२॥

ये कुर्वन्ति नमस्कारमीश्वराय क्वचित् क्वचित् ।
सम्पर्कात्कौतुकाल्लोभात्तद्विमानं लभन्ति ते ॥५३॥

नामसङ्कीर्तनाद्वापि प्रसङ्गेन शिवस्य यः ।
कुर्याद्वापि नमस्कारं तत्तस्यापि फलं भवेत् ॥५४॥

इत्येता गतयः प्रोक्ता महत्यः शिवकर्मणाम् ।
अत्यल्पाल्पतरेणापि पुंसामीशानुभावतः ॥५५॥

२३ ख, ग. मैश्वरम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इति श्री शिवधर्मोत्तरे शिवपुरधर्मगतिर्नाम पञ्चमोऽध्यायः।

जसले जुन संस्था वा लोकलाई प्राप्त गर्दछ त्यसले त्यसमा रहेका भोगहरूलाई प्राप्त गर्दछ। यी लोकहरूको ऐश्वर्य र इयत्ता शिवको कृपाले निर्धारित हुन्छ।५१।

भयङ्कर अट्ठाइस करोड ताराारूपी विमानहरू देखिन्छन्। जो माथि प्रकाशमान र सौहार्दले युक्त छन्। ।५२।

जस-जसले कहिले काँही कसैको सम्पर्कले, औत्सुक्यले वा लोभले भगवान् शिवलाई नमस्कार गर्दछ तिनीहरूले ती विमानहरूलाई प्राप्त गर्दछन् ।५३।

कसैले प्रसङ्गवश शिवको नामोच्चारण गर्दछ वा नमस्कार गर्दछ भने पनि उसले त्यसको फल अवश्य पाउँछ ।५४।

भगवान् शिवको कृपाले मानिसहरूले सानो भन्दा सानो शिवकर्मबाट प्राप्त गर्ने महान् गतिहरूलाई यहाँसम्म बताइयो ।५५।

शिवधर्मोत्तरमा शिवपुरधर्मगति नाम गरेको पाँचौं अध्याय समाप्त भयो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ पापभेदनिरूपणं नाम षष्ठोऽध्यायः

अथाधः पतनात् पुंसामधर्मः परिकीर्तितः ।
नरकादौ महाघोरे पापानां यातनाः स्मृताः ॥१॥

अधर्मभेदा विज्ञेयाश्चित्तवृत्तिप्रभेदतः ।
स्थूलाः सूक्ष्माः सुसूक्ष्माश्च कोटिभेदैरनेकधा ॥२॥

तत्र ये पापनिचयाः स्थूला नरकहेतवः ।
ते समासेन कथ्यन्ते मनोवाक्कायसाधनाः ॥३॥

परस्त्रीद्रव्य[१]सङ्कल्पश्चेतसोऽनिष्टचिन्तनम् ।
अकार्या[२]भिनिवेशश्च चतुर्द्धा कर्म मानसम् ॥४॥

अनिबद्धप्रलापित्वमसत्यञ्चाप्रियञ्च यत् ।
परापवादः पैशुन्यं चतुर्द्धा कर्म वाचिकम् ॥५॥

अब पापभेद नाम गरेको छैटौं अध्याय प्रारम्भ हुन्छ ।

अधोगतिबाट मानिसहरूमा अधर्म छाउँछ र ती अधर्महरूबाट अत्यधिक घोर नरकहरूमा यातनाहरू प्राप्त हुन्छन् ।१।

चित्तवृत्तिका प्रभेदहरूबाट स्थूल, सूक्ष्म, अतिसूक्ष्म आदि अनेक किसिमले अधर्मका करोडौं भेदहरू हुन्छन् ।२।

ती अधर्मका भेदहरूमा जुन पापराशिहरू स्थूल र नरकका कारण हुन्छन् ती मानसिक, वाचिक र कायिक साधनहरूद्वारा उत्पन्न पापहरूलाई संक्षेपमा कहिन्छ ।३।

परस्त्रीका लागि चाहना राख्नु, परधनमा चाहना राख्नु, अर्काको अहित चिताउनु र कुकार्यमा मन लगाउनु यी चार किसिमका मानसिक पाप कर्महरू हुन् ।४।

असम्बद्ध कुरा गर्नु, झुठो र अप्रिय बोल्नु, अर्काको निन्दा गर्नु र अर्काको कुरा लाउनु यी चार प्रकारका वाचिक पापकर्म हुन् ।५।

अभक्ष्यभक्षणं हिंसा मिथ्याकामनिषेवणम्[३] ।
परस्वानामुपादानं चतुर्द्धा कर्म कायिकम् ॥६॥

इत्येतद् द्वादशविधं कर्म प्रोक्तं त्रिसाधनम् ।

---

१ ग. परस्त्रीद्रव्य ।

२ ग. अकाव्या ।

३ ग. निवेदनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

अस्य भेदान् पुनर्वक्ष्ये येषां फलमनुत्तरम्[४] ॥७॥

CC0. In Public Domain. Digitization by eGangotri

ये द्विषन्ति महादेवं संसारार्णवतारणम्[५] ।
सुमहत्पातकोपेतास्ते यान्ति नरकाग्निषु ॥८॥

दूषयन्ति शिवज्ञानं ये सर्वार्थप्रसाधकम् ।
सुमहत् पातकन्तेषां निरयार्णवगामिनाम् ॥९॥

ये शिवज्ञानवक्तारं विद्विषन्ति गुरुन्नराः ।
सुमहत्पातकोपेतास्ते यान्ति नरकार्णवम् ॥१०॥

नखाने कुरा खानु, हिंसा गर्नु, असत्य भोग गर्नु र अरूको धन लिनु यी चारप्रकारका कायिक पापकर्महरू हुन् ।६।

मन, वचन र शरीरले गरिने यी बाह्र प्रकारका कर्महरू बताइएका छन् । यिनका भेदहरू र फेरि तुरुन्तै तिनका फलहरू बताउने छु ।७।

जुन मानिसहरूले संसाररूपी सागरका तारक भगवान् शिवप्रति द्वेष राख्दछन्, तिनीहरू महापापले युक्त भएर नरकरूपी अग्निहरूमा पर्दछन् ।८।

जुन मानिसहरूले सम्पूर्ण पुरुषार्थलाई सिद्ध गर्ने शिवज्ञानलाई दूषित गर्दछन्, ती व्यक्तिहरूलाई ठूलो पाप लाग्दछ र तिनीहरू नरकरूपी सागरमा पर्दछन् ।९।

जुन मानिसहरूले शिवज्ञानको व्याख्या गर्ने गुरुप्रति द्वेष राख्दछन्, ती महापापले युक्त भएर नरकरूपी सागरमा पर्दछन् ।१०।

शिवनिन्दा गुरुनिन्दा शिवज्ञानस्य दूषणम्[६] ।
देवद्रव्यापहरणं गुरुद्रव्यविनाशनम् ॥११॥

हरन्ति ये च सम्मूढाः शिवज्ञानस्य पुस्तकम् ।
सुमहत्[७]पातकान्याहुरनन्तानि फलानि षट्[८] ॥१२॥

नाभिनन्दन्ति ये दृष्ट्वा शिवपूजां प्रकल्पिताम् ।
न नमन्त्यर्चितं दृष्ट्वा पूजितन्न स्तुवन्ति च ॥१३॥

यथेष्टचेष्टा निःशङ्काः सन्तिष्ठन्ति रमन्ति च ।
उपचारविनिर्मुक्ताः शिवाग्निगुरुसन्निधौ ॥१४॥

---

४ घ. अनुत्तमम् ।

५ घ. तारकम् ।

६ क. शिवनिन्दा गुरुदूषणम् ।

७ ग. सुमहा ।

८ ग. च ।

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्थानसंस्कारपूजाञ्च ये न कुर्वन्ति पर्वसु ।
शिवविद्यागुरूणाञ्च कर्मयोगव्यवस्थिताः ॥१५॥

ये त्यजन्ति शिवाचारं शिवभक्तान् द्विषन्ति च ।
शिवनिन्दासमा ह्येते[९] महान्तः[१०] पातकोत्तमाः[११] ॥१६॥

जुन मानिसहरूले शिवको निन्दा गर्दछन्, गुरुको निन्दा गर्दछन्, शिवज्ञानमा दोष देखाउँछन्, देवालय आदिको धन ग्रहण गर्दछन्, गुरुको सम्पत्ति हिनामिना गर्दछन् र जुन मूर्ख व्यक्तिहरूले शिवज्ञानको पुस्तक चोर्दछन्, यी छवटा महापातकहरू बताइएका छन्, जसको तिनले अनन्त फल भोग्नु पर्दछ ।११,१२।

जुन मानिसहरूले शिवको पूजा भैरहेको देखेर त्यसको सम्मान गर्दैनन्, पूजित शिवजीलाई देखेर प्रणाम र स्तुति गर्दैनन्, शिव, अग्नि तथा गुरुका समीपमा आफ्नो रुचिअनुसारको चेष्टा देखाउँछन्, संकोच विना नै व्यवहार गर्दछन्, रमाउँछन् र कुनै पनि शिष्टाचारको निर्वाह गर्दैनन्,

असंपूज्य शिवज्ञानं येऽधीयन्ते लिखन्ति च[१२] ।
अन्यायतः प्रयच्छन्ति श्रृण्वन्त्युच्चारयन्ति च ॥१७॥

विक्रीणन्ते[१३] च लोभेन कुज्ञाननियमेन च ।
असंस्कृतप्रदेशेषु यथेष्टं स्थापयन्ति च ॥१८॥

शिवज्ञानकथाक्षेपं यः कृत्वाऽन्यत् प्रभाषते ।
नाधीयीत समर्थश्च यः प्रमादं करोति च ॥१९॥

अशुचिश्चाशुचौ स्थाने यः प्रवक्ति श्रृणोति च ।
इति सर्वं समासेन ज्ञाननिन्दासमं स्मृतम् ॥२०।

गुरुपूजामकृत्वैव यः शास्त्रं श्रोतुमिच्छति ।
न करोति च शुश्रूषामाज्ञां भक्तिञ्च भावतः ॥२१॥

नाभिनन्दति तद्वाक्यमुत्तरञ्च प्रयच्छति ।
गुरुकर्मणि शाठ्यञ्च तदुपेक्षां करोति च ॥२२॥

जुन कर्मयोगमा रहेका व्यक्तिहरूले चाडपर्वहरूमा शिव, शिवविद्या र गुरुहरूका स्थानहरूको सरसफाइ र पूजा गर्दैनन्, शिवशास्त्रअनुसारको आचरणलाई त्याग्दछन् र शिवभक्तहरूको डाह गर्दछन्, ती सबै कार्यहरू शिवनिन्दातुल्य महापातक हुन् । १३-१६।

९ ग. न्येव ।

१० ग. महान्ति ।

११ ग. पातकानि हि ।

१२ ख. वा ।

१३ ग. विक्रीयन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

जुन मानिसहरूले शिवशास्त्रको पूजा नगरेरै पाठ गर्दछन्, लेख्दछन्, अनुचित तरिकाले उपदेश गर्दछन् र उच्चारण गर्दछन्, लोभले अथवा गलत तरिकाले शिवशास्त्रलाई बिक्री गर्दछन् वा आफ्नो इच्छाअनुसार अपरिष्कृत ठाउँमा राख्दछन्, अनि जसले शिवशास्त्रको पाठ गर्दागर्दै त्यसलाई रोकेर अरू कुरा गर्दछ अथवा अध्ययन गर्ने क्षमता हुँदाहुँदै पनि शिवशास्त्रको अध्ययन गर्दैन अर्थात् त्यसमा प्रमाद गर्दछ, एवं जुन अपवित्र मानिसले अपवित्र ठाउँमा शिवशास्त्रको प्रवचन वा श्रवण गर्दछ, संक्षेपमा भन्नुपर्दा यो सबै शिवनिन्दा तुल्य मानिएको छ ।१७-२०।

CC0. In Public Domain. Digitization by eGangotri

गुरुं शान्तमशक्तं वा विदेशप्रस्थितन्तथा ।
अरिभिः परिभूतं वा यः सन्त्यजति पापकृत् ।।२३।।

तद्भार्यापुत्रमित्रेषु यश्चावज्ञाङ्करोति च ।
इत्येतत् पातकं ज्ञेयं गुरुनिन्दासमं महत् ।।२४।।

ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ।
महापातकिनस्त्वेते[१४] तत्संयोगी[१५] च पञ्चमः ।।२५।।

क्रोधाद् द्वेषाद् भयाल्लोभाद् ब्राह्मणस्य वदेत्तु[१६] यः ।
मर्मान्तिकं महादोषं ब्रह्मघ्नः स प्रकीर्तितः ।।२६।।

ब्राह्मणं यः समाहूय याचमान[१७]मकिञ्चनम् ।
पश्चान्नास्तीति च ब्रूयात्स वै ब्रह्महणः स्मृतः ।।२७।।

जसले भावनाका साथ गुरुको आदेश पालन गर्दैन, र उनीप्रति भक्ति राख्दैन, जसले गुरुका वचनको सम्मान गर्दैन र जवाफ लगाउँछ, गुरुको काममा धूर्त्याइँ र त्यसको उपेक्षा गर्दछ, जुन पापीले शान्त, असमर्थ अथवा परदेश गएका वा शत्रुहरूबाट तिरस्कृत भइरहेका गुरुको साथ छोड्दछ र जसले गुरुपत्नी, पुत्र वा मित्रहरूको तिरस्कार गर्दछ त्यो पापी हो, किनभने यी सबै गुरुनिन्दा समान महापाप हुन् ।२१-२४।

ब्रह्महत्या गर्ने, मदिरा पान गर्ने, चोरी गर्ने र गुरुको बिछ्यौनामा बस्ने यी चारै महापातकी हुन् भने यिनीहरूको संसर्गमा रहने पाँचौ पातकी हो ।२५।

रीसले, द्वेषले, भयले र लोभले जसले ब्राह्मणलाई मर्म पुग्ने गरी दोष लाउँछ त्यो ब्रह्मघ्न हो ।२६।

जसले मागिरहेको गरीब ब्राह्मणलाई बोलाएर छैन भन्दछ त्यो पनि ब्रह्महत्यारो मानिएको छ ।२७।

यश्च विद्याभिमानेन निस्तेजयति[१८] सद्द्विजम् ।
उदासीनं सभामध्ये ब्रह्महा स प्रकीर्तितः ।।२८।।

१४ ग. त्वेति ।
१५ ग, घ. तत्संसर्गी ।
१६ ग. वदेच्च ।
१७ ग, ङ. याच्यमानं
१८ ख, ग, ङ. उद्वेजयति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मिथ्यागुणैः स्वमात्मानं नयत्युत्कर्षणं बलात् ।
गुरूणाञ्च विरुद्धो यः स वै ब्रह्महणः स्मृतः ॥२९॥

क्षुत्तृट्सन्तप्तदेहानां द्विजानां भोक्तुमिच्छताम् ।
यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ॥३०॥

पिशुनः सर्वलोकानां रन्ध्रान्वेषणतत्परः ।
उद्वेगजननः क्रूरः स वै ब्रह्महणः स्मृतः ॥३१॥

गवां तृष्णा[१९]भिभूतानां जलार्थमुपसर्पताम् ।
यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ॥३२॥

जसले विद्वत्ताको घमण्डले सभामा बीचमा तटस्थ सद्ब्राह्मणलाई निस्तेज तुल्याउने प्रयास गर्दछ, त्यो ब्रह्महत्यारा हो ।२८।

आफ्नो मिथ्या गुण देखाएर बलपूर्वक आफूलाई उत्कृष्ट घोषित गर्ने र गुरुहरूको विरोध गर्ने पनि ब्रह्महत्यारा मानिएको छ ।२९।

भोक र प्यासले पीडित खाना खान उद्यत भएका ब्राह्मणहरूका सामु जसले विघ्न उपस्थित गर्दछ त्यसलाई पनि ब्रह्महत्यारा भन्दछन् ।३०।

सम्पूर्ण व्यक्तिहरूका कुरा गर्दै हिंड्ने, सबैका छिद्रहरू खोज्ने र सबैलाई उद्विग्न गर्ने मानिस पनि ब्रह्महत्यारो मानिएको छ ।३१।

तीर्खाले पीडित पानीका लागि जलाशयतिर जाँदै गरेका गाईहरूको बाटोमा जसले बाधा पुर्याउँछ त्यसलाई ब्रह्महत्यारा भन्दछन् ।३२।

परदोषं परिज्ञाय नृपकर्णे जपेत्तु यः ।
पापीयान् पिशुनः क्षुद्रः स वै ब्रह्महणः स्मृतः ॥३३॥

देवद्विजगतां भूमिं पूर्वभुक्तां हरेत्तु यः ।
प्रणष्टामपि कालेन तमाहुर्ब्रह्मघातकम् ॥३४॥

द्विजवृत्त्यपहरणे न्यायतः समुपार्जिते[२०] ।
ब्रह्महत्यासमं ज्ञेयं पातकं नात्र संशयः ॥३५॥

अधीत्य[२१] यः शिवज्ञानं परित्यजति मूढधीः ।
सुरापानसमं ज्ञेयं तस्य पातकमुत्तमम्[२२] ॥३६॥

---

१९ ख, ग. तृषा ।
२० ग. समुपार्जतम् ।
२१ ग. अधीश ।
२२ ग. मुल्वणम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

अग्निहोत्रपरित्यागी पञ्चयज्ञी च[२३] कर्मणाम् ।
मातापितृपरित्यागी कूटसाक्षी सुहृद्वधः[२४] ॥३७॥

CC0. In Public Domain. Digitization by eGangotri

जसले अर्काको दोष थाहा पाएर राजाको कान फुक्दछ अर्थात् राजालाई सुनाउँछ, त्यो कुरा लाउने पापिष्ठ नीच मानिस पनि ब्रह्महत्यारा कहलाउँछ ।३३।

देवाश्रमहरू र ब्राह्मणहरूले पहिले उपभोग गरेको भूमिलाई समयवश नष्ट भइसकेको भएता पनि जसले हरण गर्दछ, त्यसलाई ब्रह्महत्यारा भनिन्छ ।३४।

जसले न्यायपूर्वक आर्जन गरेको ब्राह्मणवृत्तिलाई हरण गर्दछ, त्यसलाई पनि ब्रह्महत्या समान पाप लाग्दछ । यसमा कुनै सन्देह छैन ।३५।

जुन मूर्ख मानिसले शिवज्ञानको अध्ययन गरेर त्याग गर्दछ, त्यसलाई मदिरापान गरे तुल्य धेरै पाप लाग्दछ ।३६।

अप्रियः शिवभक्तानामभक्ष्यस्य च भक्षणम् ।
वने निरपराधानां प्राणिनाञ्च निपातनम् ॥३८॥

गवालये वने चाग्निं पुरे ग्रामे च दीपयेत् ।
इति पापानि घोराणि सुरापानसमानि तु[२५] ॥३९॥

दीनसर्वस्वहरणं नरस्त्रीगजवाजिनाम् ।
गोभूरत्नरजतानामोषधीनां रसस्य च ॥४०॥

चन्दनागुरुकर्पूरकस्तूरीपटवाससाम् ।
हस्तन्यासापहरणं रुक्मस्तेयसमं स्मृतम् ॥४१॥

कन्यानां वरयोग्यानामदानं सदृशे वरे ।
पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥४२॥

कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणम् ।
स्ववर्णायाञ्च[२६] गमनं गुरुतल्पसमं स्मृतम् ॥४३॥

भूत, पितृ, देव, ब्रह्म र मनुष्य यी पाँच महायज्ञहरूसँग संबद्ध अग्निहोत्रको परित्याग गर्ने, आमा बाबुको परित्याग गर्ने, झुटो गवाही दिने, मित्रको वध गर्ने, शिवभक्तहरूसँग रुखो बोल्ने, अखाद्य कुराहरू खाने, वनमा विचरण गर्ने निर्दोष प्राणीहरूलाई मार्ने तथा गोठ, वन, नगर र गाउँमा आगो लगाउने यी सबै कार्यहरू मदिरा पान गरे तुल्य घोर पापहरू हुन् ।३७- ३९।

---

२३ ग. य ।

२४ ग. सुकृद्वधः।

२५ ग. च ।

२६ क, घ. स्ववर्णानाञ्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दुःखीको सर्वस्व हरण गर्नु, नरनारी, हात्ती, घोडा, गाई, भूमि, रत्न, चाँदी, ओषधिहरू र रस आदिको अपहरण गर्नु, चन्दन, कालोधूपी, कपूर, कस्तूरी, अत्तर र हातमा रहेको धितो अपहरण गर्नु यी सबै सुनको चोरी समान पापकर मानिएका छन् ।४०-४१।

वरयोग्य कन्याहरूलाई उपयुक्त वर भेटिँदा पनि नदिनु, छोरा र साथीका स्त्रीहरू र बैनीहरूसँग गमन गर्नु, कुमारीत्व लुट्नु, शूद्रस्त्रीको सेवन गर्नु र सवर्णा स्त्रीमा गमन गर्नु गुरुको बिछ्यौनामा (मान्य स्त्री समागम) गए समान पाप मानिएका छन् ।४३।

महापातकतुल्यानि पापान्युक्तानि तानि च ।
तानि पातकसंज्ञानि तद्भूतान्युपपातकम् ॥४४॥

द्विजायार्थं प्रतिज्ञाय न प्रयच्छति यः पुनः ।
न च स्मारयते विप्रस्तुल्यं तदुपपातकम् ॥४५॥

द्विजद्रव्यापहरणं मर्यादाया व्यतिक्रमः ।
अतिमानोऽतिकोपश्च दाम्भिकत्वं कृतघ्नता ॥४६॥

अत्यन्तविषयासक्तिः कार्पण्यं शाठ्यमत्सरम् ।
परदाराभिगमनं साध्वीकन्यार्थदूषणम्[२७] ॥४७।

परिवित्तिः परिवेत्ता यया च परिविद्यते ।
तयोर्दानञ्च कन्यायास्तयोरेव च याचनम् ॥४८॥

माथिका महापातक बराबरका पापहरू हुन् जसलाई पातक पनि भनिन्छ र यिनीहरूबाट उत्पन्न उपपातकहरू पनि हुन्छन् ।४४।

ब्राह्मणलाई यो वस्तु वा धन दिन्छु भनेर वाचा गरी नदिनु उपपातक हो भने जुन ब्राह्मणलाई दिन्छु भनिएको थियो त्यस ब्राह्मणले दिन्छु भनेका थियौ बिर्सियौ कि ? भनेर नसम्झाउनु पनि त्यसै समानको उपपातक हो ।४५।

ब्राह्मणको धन खोस्नु, मर्यादाको अतिक्रमण गर्नु, अत्यन्त मान खोज्नु, अत्यन्त रीस गर्नु, घमण्ड गर्नु र कृतघ्नता यी सबै उपपातक हुन् ।४६।

विषयहरूमा अत्यन्त आसक्त हुनु, अत्यन्त लोभी हुनु, धुर्त्याइँ, अरूको ईर्ष्या, अर्काकी स्त्रीसँग संसर्ग र साध्वी कन्यालाई दूषित गर्नु यी सबै उपपातक हुन् ।४७।

भाइको विवाह हुँदा पनि विवाह नभएको दाजु र दाजुको विवाह नहुँदै विवाह गर्ने भाइ यी दुबैसँग विवाह गर्ने कन्या उपपातकी हुन् भने दुबैका लागि कन्या दिनु र कन्या माग्नु पनि उपपातक हो ।४८।

पुत्रमित्रकलत्राणामदोषे स्वामिनस्तथा ।

---

२७ ग. कन्याप्रदूषणम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

सहायानाञ्च सन्त्यागः[२८] साधुबन्धुतपस्विनाम् ।।४९।।

CC0. In Public Domain. Digitization by eGangotri

गवां क्षत्रियवैश्यानां स्त्रीशूद्राणां च घातनम्[२९] ।
शिवाश्रमतरूणाञ्च पुष्पारामविनाशनम् ।।५०।।

यः पीडामाश्रमस्थानामाचरेदल्पिकामपि ।
तद्भृत्यपरिवर्गस्य पशुधान्यधनस्य च ।।५१।।

कुप्यधान्यपशुस्तेयमयाच्यानाञ्च याचनम् ।
यज्ञारामतडागानां दारापत्यस्य विक्रयः ।।५२।।

तीर्थयात्रोपवासानां व्रतायतनकर्मणाम् ।
स्त्रीधनान्युपजीवन्ति स्त्रीभिरत्यन्तनिर्जिताः ।।५३।।

अरक्षणञ्च नारीणां मद्यपस्त्रीनिषेवणम् ।
ऋणानामप्रदानञ्च धान्यवृद्ध्युपसेवनम् ।।५४।।

पुत्र, मित्र, पत्नी, स्वामी, सहयोगी, साधु, बान्धव र तपस्वीहरूलाई दोष विना नै परित्याग गर्नु उपपातक हो ।४९।

गाई, क्षत्रिय, वैश्य, स्त्री र शूद्रहरूलाई मार्नु र शिवाश्रममा रहेका रूखहरू, फूलहरू र बगैँचाहरूलाई नष्ट गर्नु उपपातक हो ।५०।

जसले आश्रममा रहेका व्यक्तिहरू, उनका नोकर-चाकरहरू, परिवारजन, पशु र धनधान्य आदिलाई थोरै पनि नोक्सान पुऱ्याउँछ, त्यो उपपातकी हो ।५१।

पित्तल, तामो आदि सुन-चाँदी बाहेकका धातुहरू, धनधान्य तथा पशुहरूलाई चोर्नु, माग्न नहुने ठाउँ वा व्यक्तिबाट माग्न नहुने वस्तु माग्नु, यज्ञ, बगैँचा, जलाशय, पत्नी तथा सन्तानहरूलाई बिक्री गर्नु यी सबै उपपातक हुन् ।५२।

तीर्थयात्रा, उपवास तथा व्रत आदि कार्यहरूको र स्त्रीहरूको धनमा निर्भर हुने र स्त्रीहरूको वशमा रहने मानिसहरू उपपातकी हुन् ।५३।

निन्दिताच्च धनादानमवश्यानाञ्च विक्रयः ।
विषमारणमन्त्राणां प्रयोगो मूलकर्मणाम् ।।५५।।

उच्चाटनाभिचारश्च गरविद्वेषणक्रिया ।
जिह्वाकामोपभोगार्थं यस्यारम्भः स्वकर्मसु ।।५६।।

मूल्येना[३०]ध्यापयेद्यस्तु मूल्येना[३१]प्यधीते च यः ।

---

२८ ग. सहायानं परित्यागः ।

२९ ग. घातने ।

३० ख. मूलेना ।

३१ ख. मूलेना ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्रात्यता व्रतसन्त्यागः[३२] सर्वाकार्यनिषेवणम्[३३] ॥५७॥

असच्छास्त्राधिगमनं शुष्कतर्कावलम्बनम् ।
देवाग्निसाधुसाध्वीनान्निन्दा गोब्राह्मणस्य च ॥५८॥

प्रत्यक्षं वा परोक्षं वा राज्ञां मण्डलिनामपि ।
कुत्सनं पितृदेवेज्यास्वकर्मत्यागिनश्च ये ॥५९॥

नारीहरूको रक्षा नगर्नु, मद्यपान गर्ने व्यक्तिकी स्त्रीसँग संसर्ग गर्नु, ऋण लिएर न फर्काउँनु, ब्याजको उपभोग गर्नु यी सबै उपपातक हुन् ।५४।

निन्दित व्यक्तिबाट धन लिनु, आफ्नो अधीनमा नभएको कुरालाई बेच्नु, विष, मारक मन्त्र र जादु टुनाको प्रयोग गर्नु उपपातक हुन् ।५५।

उच्चाटन, मारण, विष तथा शत्रुता बढाउन तान्त्रिक क्रियाको प्रयोग गर्नु र जिब्राको स्वाद र इच्छापूर्वक उपभोगका लागि मात्र आफ्ना कामहरू आरम्भ गर्नु उपपातक हुन् ।५६।

शुल्क लिएर पढाउनु वा शुल्क तिरेर पढ्नु, निर्दिष्ट समयमा उपनयन संस्कार नहुनु, आफूले गर्न लागेको व्रतलाई पूरा नगरेरै त्याग्नु र सबै खाले अनुचित काम गर्नु पनि उपपातक हो ।५७।

असत् शास्त्रहरू पढ्नु, शुष्क तर्कहरूको आश्रय लिनु तथा देवता, अग्नि, साधु, साध्वी, गाई र ब्राह्मणहरूको निन्दा गर्नु उपपातक हो ।५८।

दुःशीला नास्तिकाः पापास्तदसच्छून्यवादिनः ।
पर्वकाले दिवा वाप्सु वियोनौ पशुयोनिषु ॥६०॥

रजस्वलाया योनौ च मैथुनं यः समाचरेत् ।
स्त्रीपुत्रमित्रसम्प्रीतेराशायाश्छेदकाश्च ये ॥६१॥[३४]

जनस्याप्रियवक्तारः क्रूराः समयभेदिनः ।
भेत्ता तडागवप्राणां संक्रमाणां रथस्य च ॥६२॥

एकपङ्क्तिस्थितानाञ्च पाकभेदं करोति यः ।
इत्येतैः स्त्रीनराः पापैरुपपातकिनः स्मृताः ॥६३॥

युक्तास्तद्भूतकैः क्षुद्रैः[३५] पापैः पापकराः स्मृताः ॥६४॥

प्रत्यक्ष वा परोक्षरूपमा राजाहरू वा शासकवर्गको निन्दा गर्ने मानिस र पितृकार्य, देवकार्य, यज्ञयागादिकार्य र आफ्नो कर्तव्यलाई त्याग्ने मानिसहरू उपपातकी हुन् । ५९।

३२ ङ. व्रतसंस्कारः ।
३३ ग. सर्वकार्यनिषेवणम् ।
३४ ग. ६० पद्यं ६१ पद्यञ्च न स्तः ।
३५ ग. क्षदैः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नराम्रो स्वभाव भएका, नास्तिक, ईश्वरको अस्तित्व स्वीकार नगर्ने र शून्यवादीहरू पापी हुन्छन् । पर्वमा, दिउँस, पानीमा, निम्न योनिमा, रजस्वला भएका स्त्रीको योनिमा सम्भोग गर्ने र पशुयोनिमा करणी गर्ने मानिसहरू पापी कहलाउँछन् ।६०।

रजस्वला स्त्रीसँग जसले सम्भोग गर्दछ त्यो तथा जसले पत्नी, पुत्र र मित्र आदिको प्रसन्नता र आशामा कुठाराघात गर्दछन् ती सबै उपपातकी हुन् ।६१।

मान्छेहरूसँग नमीठो बोल्ने, क्रूर, स्वीकृत शर्तहरूको उल्लङ्घन गर्ने, जलाशय, खेतहरू, पुलहरू र रथ तथा यातायातका साधनहरूलाई नष्ट गर्ने उपपातकी हुन् ।६२।

एउटै पङ्क्तिमा रहेका मानिसहरूमा खानेकुरा कम ज्यादा गरेर जसले पस्कन्छ, त्यो पनि उपपातकी हो र यी उपर्युक्त पापहरूद्वारा युक्त भएका सबै नरनारीहरू उपपातकी कहलाउँछन् । यी उपपातकहरूबाट उत्पन्न भएका साना साना पापहरूद्वारा युक्त मानिसहरू पापी कहलाउँछन् ।६३ -६४।

ये गोब्राह्मणकन्यानां स्वामिमित्रतपस्विनाम् ।
अन्तरं यान्त्यकार्येषु ते[३६] स्मृता नारका नराः ॥६५॥

परश्रि[३७]याभितप्यन्ते ये परद्रव्यसूचकाः ।
परव्यापारनिरताः परस्त्रीनरदूषकाः ॥६६॥

द्विजाय दुःखं यः कुर्यात् प्रहारमुद्गिरेच्च यः ।
यः सेवते द्विजः शूद्रं सुरामाघ्राति कामतः ॥६७॥

ये पापाभिरताः क्रूरा ये च हिंसाप्रिया नराः ।
पङ्क्त्यर्थं[३८] ये च कुर्वन्ति दानयज्ञादिकां क्रियाम् ॥६८॥

गोष्ठाग्निजलरथ्यासु तरुच्छायानगेषु च ।
त्यजन्ति ये पुरीषादीनारामायतनेषु च ॥६९॥

जुन मानिसहरू गाई, ब्राह्मण, कन्या, स्वाामी, मित्र र तपस्वीहरूको काम बिगार्नमा सहयोगी बन्दछन्, ती नरकका भागी मानिन्छन् ।६५।

जुन मानिसहरू अर्काको सम्पत्तिमा डाह गर्दछन्, अर्काको धनको सूचना दिन्छन्, अर्काको व्यापारमा हस्तक्षेप गर्दछन् र अन्य स्त्री र पुरुषहरूलाई वृथा दोष लगाउँछन्, ती पनि नरकका भागी हुन्छन् ।६६।

जसले ब्राह्मणलाई दुःख दिन्छ, जसले ब्राह्मणमा प्रहार गर्दछ, जुन ब्राह्मणले शूद्रको सेवा गर्दछ वा स्वेच्छापूर्वक मदिरा पान गर्दछ ती सबै नरकका भागी हुन्छन् ।६७।

---

३६ ग. ते इति पदं नास्ति ।

३७ ग. परस्त्रि ।

३८ ग. प्रव्यर्थां ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जुन मानिसहरू पापकर्ममा संलग्न क्रूर र हिंसाप्रिय हुन्छन्, जुन मानिसहरूले दान, यज्ञादि कार्यहरू प्रसिद्धिका लागि मात्र गर्दछन्, ती सबै नरकका भागी हुन्छन् ।६८।

जुन मानिसहरूले गोठ, अग्नि, पानी, बाटो, रूखको छाँया, पर्वतहरू, बगैँचा र चैत्यपरिसरहरूमा मल-मूत्रादि त्याग गर्दछन्, ती सबै नरकका भागी हुन्छन ।६९।

मद्यमांसरता नित्यं गीतवाद्यरता नराः ।
केलिकीला भुजङ्गाश्च रन्ध्रान्वेषणतत्पराः ॥७०॥

वंशेष्टकाशिलाकाष्ठैः श्वभ्रैः[३९] शङ्कुभिरेव वा ।
ये मार्गमुपरुन्धन्ति परसीम्नो हरन्ति च ॥७१॥

कूटशासनकर्तारः कूटकर्मक्रियारताः ।
कूटयुद्धाः कुशस्त्राणि कूटसंव्यवहारिणः ॥७२॥

धनुषः शल्यशस्त्राणां यः कर्ता यश्च विक्रयी ।
निर्दयोऽतीव भृत्येषु[४०] पशूनान्दमकाश्च ये ॥७३॥

मिथ्या प्रवदतो वाचमाकर्णयति यः शनैः ।
स्वामिमित्रगुरुद्रोही मायावी चपलः शठः ॥७४॥

जो मदिरा तथा मासुको सेवन गर्दछन्, र सधैं गाउन बजाउनमा व्यस्त रहन्छन्, कामक्रीडामा लम्पट रहन्छन् एवं अरूको दोष खोज्नमा सदा संलग्न रहन्छन्, ती मानिसहरू पनि नरकका भागी हुन्छन् ।७०।

जो बाँस, इट्टा, ढुङ्गा, काठहरू, धाँजोहरू र किलाहरूद्वारा बाटामा अवरोध पुर्‍याउँछन् वा अरूको सीमा मिच्दछन्, छलपूर्वक शासन गर्दछन्, छलपूर्वक काम गर्दछन्, छलपूर्वक युद्ध गर्दछन्, गलत हतियार बनाउँछन् र छलपूर्वक व्यवहार गर्दछन् , धनुष वा काट्मार् गर्ने हतियार बनाउँछन् अथवा बिक्री गर्दछन् र जो नोकर चाकरहरूमा अत्यन्त निर्दयी छन् र पशुको दमन गर्दछन्, ती सबै नारकी हुन् ।७१-७३।

जो झुठो बोल्दछन् र जो सुस्तरी लुकेर अरूको कुरा सुन्दछन्, जसले स्वामी, मित्र र गुरुको द्रोह गर्दछन्, जसले छलकपट गर्दछन्, जो चञ्चल र धूर्त छन्, ती सबै नरकका भागी हुन्छन् ।७४।

ये भार्यापुत्रमित्राणि[४१] बालवृद्धकृशातुरान् ।
भृत्यानतिथिबन्धूंश्च त्यक्त्वाऽश्नन्ति बुभुक्षितान्॥७५॥

यः स्वयं मृष्ट[४२]मश्नाति विप्रायान्यत् प्रयच्छति ।

---

३९ ग. स्व(ख)भ्रैः ।

४० ग. नृत्येषु ।

४१ क. ७० पद्यस्य अन्तिमचरणात् ७५ पद्यस्य प्रथम चरणपर्यन्तं नास्ति ।

४२ ख. मिष्ट ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0 In Public Domain. Digitization by eGangotri
वृथापाकः स विज्ञेयो ब्रह्मवादिषु गर्हितः॥७६॥

नियमान् स्वयमादाय ये त्यजन्ति जितेन्द्रियाः ।
प्रव्रज्या[४३] वसिता ये च रहस्यानाञ्च भेदकाः ॥७७॥

ये ताडयन्ति गाश्चैव त्रासयन्ति मुहुर्मुहुः ।
दुर्बलान् न च पुष्णन्ति प्रणष्टान्नान्विषन्ति च ॥७८॥

पीडयन्त्यतिभारेण सक्षतान् वाहयन्ति च ।
सार्द्धयामाच्च परत अभुक्ते[४४] ये च भुञ्जते ॥७९॥

ये भग्नक्षतरोगार्तान् गोरूपांश्च क्षुधातुरान् ।
न पालयन्ति यत्नेन ते गोघ्ना नारकाः स्मृताः[४५] ॥८०॥

जुन मानिसहरू भोकाएका पत्नी, पुत्र, मित्र, बालक, वृद्ध, दुर्बल, रोगी, नोकरहरू र बन्धुबान्धवहरूको बेवास्ता गरी आफूले मात्र खान्छन्, ती पनि नरकका भागी हुन्छन् ।७५।

जो आफूले शुद्ध खाएर आएका ब्राह्मणहरूलाई अशुद्ध खान दिन्छ, व्यर्थमा भान्साको चाँजो गर्ने त्यो व्यक्ति ब्रह्मवादीहरूको माझमा निन्दित हुन्छ ।७६।

जुन जितेन्द्रिय व्यक्तिहरूले स्वयं नियम बनाएर त्याग्दछन्, जसले सन्न्यास लिएर त्यसलाई छोड्दछन्, जसले गोपनीयता भङ्ग गर्दछन् र जसले गाईहरूलाई कुट्दछन् वा पटक पटक डराउन दिन्छन्, दुर्बल गाईहरूलाई पोषिलो घाँस आदि दिँदैनन्, हराएका गाईहरू खोज्दैनन्, गोरुहरूलाई अत्यन्त धेरै भार बोकाएर दुःख दिन्छन् र चोट लागेका गोरुहरूलाई भारी बोकाउँछन्, दिनको साढे एक प्रहर पछि पनि गाईहरूलाई न खुवाएर खान्छन् तथा खुट्टा भाँचिएका, चोट लागेका, रोग लागेका वा

वृषाणां वृषणौ ये च पापिष्ठा गालयन्ति च ।
वाहयन्ति च गां बन्ध्यां महानारकिणो नराः ॥८१॥

आशया समनुप्राप्तान् क्षुत्तृष्णाश्रमपीडितान् ।
येऽतिथीं[४६]श्चावमन्यन्ते ते वै निरयगामिनः ॥८२॥

अनाथं विकलं दीनं बालवृद्धकृशातुरान् ।
नानुकम्पन्ति ये मूढास्ते यान्ति निरयार्णवम् ॥८३॥

अजाविको माहिषिकः सामुद्री वृषलीपतिः ।
शूद्रविट्क्षत्रियवृत्तिर्नारकी[४७] स्याद् द्विजाधमः ॥८४॥

शिल्पिनः कारुका वेश्या हेमकारा नृपाध्वजाः ।

४३ ख. प्रव्रद्य । ग. प्रवक्ष्या (व्रज्या) ।
४४ ख. अभुक्ते ।
४५ ग. न पालयन्ति ते गोघ्ना नारकाः पापिनः स्मृताः ।
४६ ग. येऽतिर्थान् । घ. ये तिथिम् ।
४७ ग. शूद्रविट्क्षत्रवृत्तिश्च नारकी ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भृतकाः शाठ्यसंयुक्तास्तथान्त्या नारकाः स्मृताः ॥८५॥

जो भोकले पीडित गाईगोरुहरूको यत्नपूर्वक संरक्षण गर्दैनन्, ती गाईका हत्यारा नरकका भागी हुन्छन् ।७७-८०।

जुन पापीहरूले वृषभहरूका अण्डकोशहरूलाई गलाउँछन् र जसले बाँझो गाईलाई भार बोकाउँछन् वा जोत्दछन्, ती मानिसहरू महानरकका भागी हुन्छन् ।८१।

जुन मानिसहरूले भोक, प्यास र थकानले पीडित तथा आशापूर्वक आएका अतिथिहरूको तिरस्कार गर्दछन्, ती निश्चित रूपमा नरकमा पर्दछन् ।८२।

अनाथ, बेचैन, दुःखी, बालक, बूढो, निर्बल, रोगी व्यक्तिहरूलाई जुन मूर्खहरूले कृपा गर्दैनन्, तिनी नरकरूपी सागरमा पर्दछन् ।८३।

भेंडा, बाखा र भैंसीबाट जीविकोपार्जन गर्ने, समुद्रबाट जीविकोपार्जन गर्ने, शूद्रजातिकी स्त्रीसँग विवाह गर्ने, शूद्र, वैश्य र क्षत्रियको व्यवहार अपनाउने ब्राह्मण नरकको भागी हुन्छ ।८४।

कालिगड, सिकर्मी, वेश्या र सुनको काम गर्ने, क्षत्रियहरू र नोकरको काम गर्ने एवं धूर्त्याइँका साथ काम गर्ने वैश्य र शूद्रहरू नारकी हुन् ।८५।

यश्चोचितमतिक्रम्य स्वेच्छयावाहयेत्करम्[४८] ।
नरकेषु स पच्येत यश्च दण्डरुचिर्नृपः ॥८६॥

उत्कोचकैरधिकृतैस्तस्करैश्च प्रपीड्यते ।
यस्य राज्ञः प्रजा राष्ट्रे पच्यते नरकेषु सः ॥८७॥

ये द्विजाः प्रतिगृह्णन्ति नृपस्यान्यायवर्तिनः ।
प्रयान्ति तेऽपि घोरेषु नरकेषु न संशयः ॥८८॥

पारदारिकचौराणां यत्पापं पार्थिवस्य तत् ।
भवेदरक्षतः सर्वं घोरं तस्य प्रतिग्रहः[४९] ॥८९॥

अचौरं चौरवत् पश्येच्चौरान् वाऽचौररूपिणः ।
अविचार्य नृपस्तस्माद् घातयन्नरकं व्रजेत् ॥९०॥

जुन राजाले औचित्य विना नै आफ्नो इच्छाअनुसार कर उठाउँछ र जो राजा दण्डनीतिमा मात्र बढी रुचि राख्दछ, त्यसले नरकहरूमा यातना भोग्दछ ।८६।

जुन राजाको राज्यमा घुसखोर अधिकारीहरू र चोरहरूद्वारा प्रजा पीडित हुन्छन्, त्यस राजाले नरकमा यातना भोग्दछ ।८७।

जुन ब्राह्मणहरू न्याय नगर्ने राजाबाट दान लिन्छन्, ती पनि घोर नरकमा पर्दछन् यसमा कुनै सन्देह छैन ।८८।

---

४८ ग. स्वच्छाया बाह्येत्करम् ।
४९ ग. प्रतिग्रहात् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अर्काकी स्त्रीसँग लाग्ने र चोरहरूले जुन पाप भोग्दछन् त्यही पाप प्रजाको रक्षा नगर्ने राजालाई पनि र त्यस राजाबाट दान लिने ब्राह्मणलाई पनि लाग्दछ ।८९।

साधुलाई चोर ठान्ने र चोरहरूलाई साधु ठानेर विचारै नगरी साधुलाई चोरको दण्ड दिने राजा नरक जान्छ ।९०।

घृततैलान्नपानानि मधुमांससुरासवम् ।
गुडेक्षुक्षीरशाकानि दधि मूलफलानि च ॥९१॥

तृणकाष्ठपत्रपुष्पमौषधं कांस्यभाजनम् ।
उपानच्छत्रशकटमासनं शयनं गृहम्[५०] ॥९२॥

ताम्रसीसत्रपुकांस्यशंखाद्यञ्च जलोद्भवम् ।
वार्क्ष्यं वा वेणकाद्य[५१] वा गृहेषु पुष्कराणि च ॥९३॥

ऊर्णाकर्पासकौशेयभङ्गपट्टोद्भवानि च ।
स्थूलसूक्ष्माणि वस्त्राणि ये लोभेन हरन्ति च ॥९४॥

एवमादीनि चान्यानि द्रव्याणि विविधानि च ।
नरकेषु ध्रुवं गच्छेदपहृत्याल्पकान्यपि ॥९५॥

यद्वा तद्वा परद्रव्यमपि सर्षपमात्रकम् ।
अपहृत्य नरो याति नरकन्नात्र संशयः ॥९६॥

एवमाद्यैर्नरः पापैर्व्युत्क्रान्तैः[५२] समनन्तरम् ।
शरीरं यातनार्थीयं पूर्वाकारमवाप्नुयात् ॥९७॥

घ्यू, तेल, अन्न, पेयपदार्थ, मह, मासु, मदिरा, आसव, गुड, उखु, दूध, साग, दही, कन्दमूल, फलहरू, घाँस, दाउरा, पात, पुष्प, औषधिहरू, काँसका भाँडा, जुत्ता, छाता, गाडी, आसन, बिछ्यौना, घर, तामा, सीसा, राङ्ग, काँस, पानीमा उत्पन्न हुने शंख आदि, काठबाट बनेको सामग्री, मुरली आदि, घरमा रहेका पोखरीहरू, ऊन, कपास, रेशम, पाट, मसिनो रङ्गीन कपडाहरूबाट बनेका मोटा मसिना लुगाहरू जो लोभवश चोर्दछन् वा हरण गर्दछन् र यस्तै यस्तै विविध अन्य द्रव्यहरू थोरै मात्रामा पनि चोर्दछन् वा हरण गर्दछन्, तिनीहरू निश्चित रूपमा नरक जान्छन् ।९१-९५।

जेसुकै पनि सर्सिउँको दाना जत्रो पनि अर्काको धन अपहरण गर्छ भने नरक जान्छ, त्यसमा कुनै सन्देह छैन ।९६।

यमलोकं व्रजंस्तेन शरीरेण यमाज्ञया ।

---

५० ग. उपानच्छत्रशकटायेतयेत्मासनं गृहम् ।
५१ ग. वैणवाद्यम् ।
५२ ग. व्याक्रान्तैः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यमदूतैर्महाघोरैर्नीयमानः सुदुःखितः ॥९८॥

देवमानुषतिर्याणामधर्मनिरतात्मनाम् ।
धर्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्वधैः ॥९९॥

विनयाचारयुक्तानां प्रमादात्[५३]स्खलितात्मनाम् ।
प्रायश्चित्तैर्गुरुः शास्ता न वधैरिष्यते यमः ॥१००॥

पारदारिकचौराणामन्यायव्यवहारिणाम् ।
नृपतिः शासकः प्रोक्तः प्रच्छन्नानाञ्च धर्मराट् ॥१०१॥

तस्मात् कृतस्य पापस्य प्रायश्चित्तं समाचरेत् ।
नाभुक्तस्यान्यथा नाशः कल्पकोटिशतैरपि ॥१०२॥

यस किसिमले आफूले गरेका उपर्युक्त पापहरूको लगत्तै पछि मनुष्य पहिलेकै यातनापूर्ण शरीरलाई प्राप्त गर्दछ ।९७।

यमको आदेशअनुसार त्यही यातनीय शरीरद्वारा डरलाग्दा यमदूतहरूबाट अत्यन्त दुःखयुक्त अवस्थामा यमलोकतिर लगिन्छ ।९८।

देवता, मनुष्य र तिर्यक्‌योनिमा रहेका प्राणीहरू जो अधर्ममा सलग्न रहन्छन्, तिनीहरूलाई यमराजले डरलाग्दा विविध यातनाहरूले दण्ड दिन्छन् ।९९।

विनय र आचारले युक्त भएका प्रमादवश स्खलित भएका व्यक्तिहरूलाई प्रायश्चित्तहरूद्वारा गुरुले दण्ड दिन्छन् । यमले यातनाहरूद्वारा दण्ड दिँदैनन् ।१००।

पारदारिक अर्काकी स्त्रीसँग बस्ने, चोर र अनैतिक व्यवहार गर्ने व्यक्तिहरूलाई राजाले दण्ड प्रदान गर्दछ, तर छिपेको त्यस्ता व्यक्तिहरूलाई यमराजले दण्ड दिन्छन् ।१०१।

त्यसैले गरेका पापहरूको प्रायश्चित्त गरिहाल्नु पर्दछ । उपभोग नगरिएका पुण्य-पापहरू करोडौं कल्पसम्म पनि अरू तरिकाले नष्ट हुँदैनन् ।१०२।

यः करोति स्वयं कर्म कारयेद्वानुमोदयेत् ।
कायेन मनसा वाचा तस्योर्द्धाधोगतेः फलम्[५४] ॥१०३॥

इति संक्षेपतः प्रोक्तः पापभेदास्त्रिसाधनाः ।
कथ्यन्ते गतयश्चित्रा नराणां पापकारिणाम् ॥१०४॥

---

५३ ग. प्रमोदः ।
५४ ख. गतफलम् । ग. गोतते फलम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

इति श्री शिवधर्मोत्तरे पापभेदनिरूपणं नाम षष्ठोऽध्यायः ।

CC0. In Public Domain. Digitization by eGangotri

जसले शरीर, मन र वचनले शुभ वा अशुभ कर्म गर्छ वा जसले गर्न लगाउँछ वा जसले त्यो कर्मको अनुमोदन गर्दछ, त्यसका उद्धर्व र अधोगतिरूप फल क्रमैसँग हुन्छन् ।१०३।

यसरी सङ्क्षेपमा मन, वचन र शरीरले हुने पापहरूका भेद बताइए । अब पापकारी मानिसहरूका विचित्र गतिहरू बताइनेछन् ।१०४।

यस शिवधर्मोत्तरमा पापभेदनिरूपण नाम गरेको छैठौं अध्याय समाप्त भयो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ पापगतिविशेषो नाम सप्तमोऽध्यायः

अथ पापैरिमे यान्ति यमलोकं चतुर्विधैः ।
सन्त्रासजननं घोरं विवशाः सर्वदेहिनः ॥१॥

गर्भस्थैर्जायमानैश्च बालैस्तरुणमध्यमैः ।
पुंस्त्री[१]नपुंसकैर्वृद्धैर्यातव्यं सर्वजन्तुभिः ॥२॥

शुभाशुभफलं तत्र देहिनां प्रविचार्यते ।
चित्रगुप्तादिभिः षड्भि[२]र्मध्यस्थैः सर्वदर्शिभिः ॥३॥

न तेऽत्र प्राणिनः सन्ति ये न यान्ति यमालयम् ।
अवश्यं हि कृतं कर्म भोक्तव्यं तद्विचारितम् ॥४॥

तत्र ये शुभकर्माणः सौम्यचित्ता दयान्विताः ।
ते नरा यान्ति सौम्येन पथा यमनिकेतनम् ॥५॥

अब पापगति विशेष नाम गरेको सातौं अध्याय प्रारम्भ हुन्छ ।

चार किसिमका पापहरूद्वारा विवश भएका यी सम्पूर्ण प्राणीहरू डरलाग्दो घनघोर यमलोक जान्छन् ।१।

गर्भमा रहेका, पैदा हुँदै गरेका, बालकहरू, जवान, प्रौढ, बूढाहरू, स्त्री, पुरुष वा नपुंसक सबै प्राणीहरूले यमलोक जानु पर्दछ ।२।

त्यहाँ सम्पूर्ण कुराको साक्षात्कार गर्ने मध्यस्थ चित्रगुप्त आदि छ यमदूतहरूद्वारा ती प्राणीहरूको शुभ तथा अशुभ फलको निरूपण गरिन्छ ।३।

यस लोकमा त्यस्ता कुनै प्राणीहरू छैनन् जसलाई यमलोक जानु पर्दैन । सबैले आफूले गरेको कामको फल शुभ वा अशुभ जे हो, विचार गरिएअनुसार अवश्य भोग्नु पर्दछ ।४।

त्यसमा जुन व्यक्तिहरू शुभ काम गर्दछन्, राम्रो मन र दयाले युक्त हुन्छन्, ती मानिसहरू सौम्य मार्गबाट यमलोक जान्छन् ।५।

यः प्रदद्यात् द्विजेन्द्राणामुपानत्काष्ठपादुके ।
स वराश्वेन महता सुखं याति यमालयम् ॥६॥

छत्रदानेन गच्छन्ति यथा साभ्रेण देहिनः ।
दिव्यवस्त्रपरीधाना यान्ति वस्त्रप्रदायिनः ॥७॥

शिविकाश्वप्रदानेन तद्रथेन सुखं व्रजेत् ।

---

१ ग. स्त्रीपुं ।
२ ग. षद्भि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

शयूयासन[३]प्रदानेन स्वपन् याति च विश्रामम् ।।८।।
CC-0. In Public Domain. Digitization by eGangotri

आरामकर्ता छायासु शीतलासु सुखं व्रजत्[४] ।
यान्ति पुष्पकयानेन पुष्पारामप्रदायिनः ।।९।।

देवायतनकर्ता च यतीनामाश्रयस्य[५] च ।
अनाथमण्डपानाञ्च क्रीडन् याति गृहोत्तमैः ।।१०।।

जसले श्रेष्ठ ब्राह्मणहरूलाई जुत्ता वा काठका खराउ दान गर्दछ, त्यो ठूलो असल घोडामा चढेर सुखपूर्वक यमलोक जान्छ ।६।

छाता दान गर्नाले प्राणीहरू बादलले युक्त भएको जस्तो शीतल अवस्थामा र वस्त्र दान दिने मानिसहरू दिव्यवस्त्रहरूको पहिरनले युक्त भएर यमलोक जाने गर्दछन् ।७।

पालकी तथा घोडा दान गर्नाले रथद्वारा र बिछ्यौना तथा आसन दान गर्नाले सुतिसुती र विश्राम गर्दै यमलोक जान्छन् ।८।

बगैंचा बनाउने मानिस शीतल छायाहरूमा सुखपूर्वक र फूलको बगैंचा दान गर्ने मानिसहरू पुष्पक विमानद्वारा यमलोक जान्छन् ।९।

देवताका मन्दिर हरू बनाउने, योगीहरूको आश्रय र अनाथालय बनाउने मानिस उत्तम घरहरूमा खेल्दै यमलोक जान्छन् ।१०।

देवाग्निगुरुविप्राणां मातापित्रोश्च[६] पूजकाः ।
पूज्यमाना नरा यान्ति कामिकेन यथासुखम् ।।११।।

उद्योतयन्दिशः सर्वा यान्ति दीपप्रदायिनः[७] ।
प्रतिश्रयप्रदानेन सुखं यान्ति गृहे स्वयम् ।। १२।

सर्वकामसमृद्धेन पथा गच्छन्ति गोप्रदाः ।
ये निपानानि[८] कुर्वन्ति ते तृप्ता[९] यान्ति तत्पथा ।।१३।।

आर्तौषधप्रदातारः[१०] सुखं यान्ति निरामयाः ।
विश्राम्यमाना गच्छन्ति गुरुशुश्रूषणे रताः ।।१४।।

---

३ क, ङ. शयूर्यासन ।ख.शैयूयासन । ग. शैयाशन ।
४ क, घ. भवेत् ।
५ ग, ङ. आश्रमस्य ।
६ ग. मातु पितुश्च ।
७ ग. याति दीपप्रदायकः ।
८ ग. येऽन्नपानानि ।
९ ग. तप्ता ।
१० ग. अन्नौषधप्रदातारः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पादशौचप्रदानेन शीतलेन पथा व्रजेत् ।
हेमरत्नप्रदानेन याति दुर्गाणि निस्तरन् ॥१५॥

देवता, अग्नि, गुरु, ब्राह्मण तथा आमाबुवाको पूजा गर्ने मानिसहरू पूजित भएर आफ्नो इच्छाअनुसार सुखपूर्वक यमलोक जान्छन् ।११।

बत्ती दान गर्ने मानिस सम्पूर्ण दिशाहरूलाई प्रकाशित गर्दै यमलोक जान्छ भने यज्ञमण्डप वा सभागृह दान गर्ने मानिसहरू आफ्नै घरमा रहेर यमलोक सुखपूर्वक जान्छन् ।१२।

गाई दान गर्ने मानिसहरू सम्पूर्ण इच्छाहरू पूर्ण गर्ने मार्गबाट यमलोक जान्छन् भने जसले पोखरी, कुवा आदि जलाशय बनाउँदछन्, तिनीहरू तृप्त भएर त्यही बाटोबाट यमलोक जान्छन् ।१३।

बिरामीहरूलाई ओखती प्रदान गर्ने मानिसहरू निरोगी भएर तथा गुरुको सेवामा संलग्न मानिसहरू आराम गर्दै यमलोक जान्छन् ।१४।

रोगीहरूका, गुरुहरूका वा योगीका गोडा धुनाले शीतल बाटोबाट तथा सुन र रत्न दान गर्नाले दुर्गहरूलाई सजिलैसँग पार गर्दै यमलोक गइन्छ ।१५।

पादाभ्यङ्गञ्च यः कुर्यादश्वपृष्ठेन स व्रजेत् ।
रुप्या[११]नड्वाहदानेन नरयानेन[१२] गच्छति ॥१६॥

सर्वकामसमृद्धात्मा भूमिदानेन गच्छति ।
अन्नपानप्रदानेन खादन् पिबंश्च गच्छति ॥ १७॥

इत्येवमादिभिर्दानैः सुखं यान्ति यमालयम् ।
स्वर्गे च विपुलान् भोगान् प्राप्नोति विविधान्नरः ॥१८॥

सर्वेषामेव दानानामन्नदानं परं स्मृतम् ।
सद्यः प्रीतिकरन्दिव्यं बलबुद्धिविवर्द्धनम् ॥१९॥

नान्नपानसमं[१३] दानं त्रिषु लोकेषु विद्यते ।
अन्नाद् भवन्ति भूतानि तदभावे म्रियन्ति च ॥२०॥

रोगी, गुरु वा योगीहरूको खुट्टामा तेल लगाउनाले घोडामा चढेर तथा चाँदीको साँढे दान गर्नाले पालकीबाट यमलोक गइन्छ ।१६।

भूमि दान गर्नाले सम्पूर्ण कामनाहरूको पूर्तिद्वारा समृद्ध भएर तथा खाने पिउने वस्तु दान गर्नाले खाँदै पिउँदै यमलोक गइन्छ ।१७।

११ ग. रुप्या ।

१२ ग. नरो यानेन ।

१३ ग. नान्नदानसमम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यस किसिमका दानहरूद्वारा सजिलैसँग यमलोक गइन्छ र त्यसपछि मानिसले स्वर्गमा धेरै किसिमका ठूला ठूला भोगहरू प्राप्त गर्दछ ।१८।

सम्पूर्ण दानहरूमा अन्नदान प्रमुख मानिन्छ । त्यसबाट तत्काल आनन्दप्राप्ति हुनुका साथै बल र बुद्धिमा वृद्धि हुन्छ ।१९।

अन्न र पानीको दान समान अरू कुनै दान त्रिभुवनमा छैन । अन्नबाट नै सम्पूर्ण प्राणीहरू जीवित रहन्छन् भने अन्न विना सबै मर्दछन् ।२०।

रक्तं मांसं वसा शुक्रं क्रमादन्नात् प्रवर्द्धते ।
शुक्राद् भवन्ति भूतानि तस्मादन्नमिदं जगत् ॥२१॥

हेमरत्नाश्व[१४]नागेन्द्रनारीस्रक्चन्दनादिभिः ।
समस्तैरपि सम्प्राप्तैर्न रमन्ते बुभुक्षिताः ॥२२॥

गर्भस्था जायमानाश्च बालवृद्धाश्च मध्यमाः ।
आहारमभिकांक्षन्ति देवदानवतापसाः ॥२३॥

क्षुधा हि सर्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ।
तस्यान्नौषधि[१५]लेपेन प्रतिकारः प्रकीर्तितः ॥२४॥

नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधा समः ।
नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः ॥२५॥

अन्नबाट रगत, मासु, बोसो र वीर्यको क्रमैसँग वृद्धि हुन्छ भने वीर्यबाट सम्पूर्ण प्राणीहरू जन्मन्छन्, त्यसैले अन्न नै संसार हो ।२१।

सुन, हीरा, मोती, घोडा, हात्ती, नारी, माला तथा चन्दन आदि समस्त कुराहरू पाएर पनि भोकाएका मानिसहरू रमाउँदैनन् ।२२।

गर्भमा रहेका, जन्मदै गरेका, बालक, वृद्ध, युवा, देवता, दानव र तपस्वी सबैले आहारको आकाङ्क्षा राख्दछन् ।२३।

भोकजन्य रोग सबै रोगहरूमा ठूलो रोग हो । त्यसैले अन्नरूपी औषधीको लेपद्वारा त्यसको प्रतिकार गर्नु पर्दछ ।२४।

भोक समान अरू कुनै दुःख हुँदैन र भोक समान अरू कुनै रोग हुँदैन । आहार समान सुख अरू छैन भने क्रोध समान शत्रु अरू कुनै छैन ।२५।

अत एव महत् पुण्यमन्नदानप्रभावतः ।
यतः क्षुधाग्निसन्तप्ता म्रियन्ते सर्वदेहिनः ॥२६॥

१४ ग, ङ. अस्व ।
१५ ग. तस्मान्नौषधि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदः ।
तस्मादन्नप्रदानेन सर्वदानफलं लभेत् ॥२७॥

त्रैलोक्ये यानि रत्नानि भोगाः स्त्रीवाहनानि च ।
अन्नपानप्रदः सर्वानिहामुत्र च ताँल्लभेत् ॥२८॥

यस्यान्नपानपुष्टाङ्गः कुरुते धर्मसञ्चयम् ।
अन्नप्रदातुस्तस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः ॥२९॥

धर्मार्थकाममोक्षाणां देहः परमसाधनम् ।
स्थितिस्तस्यान्नपानाभ्यामतस्तत्[१६]सर्वसाधनम् ॥३०॥[१७]

त्यसैले अन्नदानको प्रभावबाट ठूलो पुण्य प्राप्त हुन्छ किनभने भोकरूपी अग्निले जलेका सबै देहधारीहरू मर्दछन् ।२६।

अन्ददान गर्नु प्राणदान गर्नु हो भने प्राणदान गर्नु भनेको सम्पूर्ण दान गर्नु हो । त्यसैले अन्न दान गरेर सबै दानबाट हुने फल प्राप्त गर्न सकिन्छ ।२७।

अन्नदाताले तीनै लोकमा जति रत्नहरू छन्, भोगहरू छन् र स्त्री वाहनादि छन्, ती सबै यस लोकमा र परलोकमा पाउँछ ।२८

जसको अन्नपानादिबाट शरीर पुष्ट भएको मानिसले जे जति धर्मको सञ्चय गर्दछ, त्यसमा आधा त्यसका अन्नदाताको र आधा त्यसको हुने गर्दछ । यसमा कुनै सन्देह छैन ।२९।

शरीर धर्म, अर्थ, काम र मोक्ष चारवटै पुरुषार्थहरूको ठूलो साधन हो र शरीरको स्थिति अन्नपानहरूबाट नै हुन सक्दछ । त्यसैले अन्नपान नै सबैको साधन हो ।३०।

अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयम् ।
तस्मादन्नसमं दानं न भूतन्न भविष्यति ॥३१॥

त्रयाणामपि लोकानामुदकं जीवितं स्मृतम् ।
पवित्रममृतं दिव्यं शुद्धं सर्वरसाश्रयम् ॥३२॥

अन्नपानाश्वगोवस्त्रशय्याछत्रासनानि च ।
प्रेतलोके प्रशस्तानि दानान्यष्टौ विशेषतः ॥३३॥

एवन्दानविशेषेण धर्मराजपुरन्नराः ।
यस्माद्यान्ति सुखेनैव तस्माद्धर्मं समाचरेत् ॥३४॥

---

१६ ख. मनन्तम् ।
१७ घ. पद्यस्यास्योत्तरार्द्धं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
ये पुनः क्रूरकर्माणो नरा दानविवर्जिताः ।
ते घोरेण पथा यान्ति दक्षिणेन यमालयम् ॥३५॥

अन्न ब्रह्मा हो, साक्षात् विष्णु हो र अन्न स्वयं शिव पनि हो । त्यसैले अन्नदानको बराबरी गर्ने दान न पहिले कहिले भएको थियो, न पछि कहिल्यै हुनेछ ।३१।

स्वर्ग, मर्त्य तथा पाताल तीनै लोकको जीवन पानी हो र त्यो पानी चोखो अमृततुल्य दिव्य, शुद्ध र सम्पूर्ण रसायन पदार्थहरूको आश्रय हो ।३२।

अन्न, पानी, घोडा, गाई, लुगा, शय्या, छाता र आसनहरू यी आठवटाको दान विशेष गरेर प्रेतलोकका लागि प्रशस्त मानिन्छ ।३३।

यसरी दानविशेषका कारणले मानिसहरू सजिलैसँग यमलोक जान्छन् । त्यसैले मानिसले धर्मको आचरण गर्नु पर्दछ ।३४।

किन्तु जुन मानिसहरू क्रूर कर्म गर्दछन् र दान गर्दैनन्, ती डरलाग्दो दक्षिणी बाटोबाट यमलोक जान्छन् ।३५।

षडशीतिसहस्राणि योजनानां व्यतीत्य तत् ।
वैवस्वतपुरं ज्ञेयं[१८] नानारूपमवस्थितम् ॥३६॥

तत्समीपमिवाभाति नराणां शुभकर्मणाम् ।
पापानामपि[१९]दूरस्थं पथा[२०] रौद्रेण गच्छताम् ॥३७॥

तीव्रकण्टकयुक्तेन शर्करानिचितेन च ।
क्षुरधारानिभैस्तीव्रैः पाषाणैर्निचितेन च ॥३८॥

क्वचित्पङ्केन महता दुरुत्तारैश्च खातकैः ।
लोहसूचीनिभैर्दर्भैः सञ्छन्नेन पथा क्वचित् ॥३९॥

ततः प्रयान्ति विषमैः पर्वतैर्वृक्षसंयुतैः ।
प्रतप्ताङ्गारयुक्तेन यान्ति मार्गेण दुःखिताः ॥४०॥

छ्यासी हजार योजन (३ लाख ४४ हजार कोस) को बाटो पार गरेर त्यो अनेक रूपमा व्यवस्थित यमपुरी रहेको छ भनी जान्नु ।३६।

राम्रो काम गर्ने मानिसहरूका लागि ३ लाख ४४ हजार कोसको बाटो सानो जस्तो लाग्दछ भने डरलाग्दो

---

१८ ग. तयम् ।

१९ ग, घ. मति ।

२० ग. यथा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बाटोबाट गइरहेका पापीहरूका लागि अत्यन्त टाढा जस्तो हुन्छ ।३७।

तीखा काँडाहरू युक्त तथा बग्रेटोले बनेको छुराको धार जस्तै तीखा ढुङ्गाहरू भएको बाटो हुन्छ । ३८।

कहीं अत्यधिक हिलो र तर्नै नसकिने खाडलहरूले युक्त हुन्छ भने कहीं त्यो बाटो फलामका सुइरा जस्ता तीखा झारपातहरूले व्याप्त हुन्छ ।३९।

त्यस पछि हिँड्न गाह्रो हुने पर्वतहरू र रूखहरूले युक्त भएको र बलिरहेका आगाका फिलिङ्गाहरूले युक्त भएको बाटोबाट पापीहरू दुःखका साथ यमलोक जान्छन् ।४०।

क्वचिद् विषमगर्ताभिः क्वचिल्लोष्ठैः सुपिच्छिलैः ।
सुतप्तबालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः ॥४१॥

अनेकशाखाविततैर्व्याप्तं वंशवनैः क्वचित् ।
कष्टेन तमसा मार्गमनालम्भेन कुत्रचित् ॥४२॥

अयः शृङ्गाटकै[२१]स्तप्तैः क्वचिद्दावाग्निना पुनः ।
क्वचित्तप्तशिलाभिश्च क्वचित् व्याप्तं हिमेन च ॥४३॥

क्वचिद् बालुकया व्याप्तमाकण्ठान्ते[२२] प्रवेशया ।
क्वचिदुष्णाम्बुना व्याप्तं क्वचिच्च करीषाग्निना[२३] ॥४४॥

क्वचित् सिंहैर्वृकैर्व्याघ्रैर्दंशैः कीटैश्च दारुणैः ।
क्वचिन्महाजलौकाभिः क्वचिच्चाजगरैः पुनः ॥४५॥

कतै विषम पानी न बग्ने नदीहरू, कतै चिप्ला माटाका डल्लाहरू, कतै तातिएका बालुवाहरू र कतै तीखा तीखा किलाहरूले युक्त बाटोबाट पापीहरू यमलोक जान्छन् ।४१।

कतै अनेक हाँगाहरूमा फैलिएका बाँसका रूखहरूले व्याप्त र कतै निराश्रय कष्टकर अन्धकारले आच्छन्न बाटोबाट पापीहरू यमलोक जान्छन् ।४२।

कतै त्यो बाटो फलामका तातेका चौबाटाहरूले, कतै डढेलोले, कतै तातेका ढुङ्गाहरू र कतै हिउँले व्याप्त हुन्छ ।४३।

त्यो बाटो कतै घाँटी घाँटीसम्म आउने गरी राखिएको बालुवाले, कतै तातो पानीले र कतै गुइँठाको आगोले व्याप्त हुन्छ ।४४।

त्यो बाटो कतै सिंह, ब्वाँसा, बाघ, डाँस र अन्य डरलाग्दा कीराहरूले र कतै ठूला ठूला पानी जूका र कतै अजिङ्गरहरूले व्याप्त हुन्छ ।४५।

---

२१ ग. सङ्कटकै ।

२२ ग. कण्ठान्न । घ. कण्ठान्त ।

२३ क. अन्तिमचरणं नास्ति । ग, घ, ङ . करिषाग्निना ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मक्षिकाभिश्च रौद्राभिः क्वचित्सर्पैर्विषोल्वणैः ।
महागजेन्द्रयूथैश्च बलोन्मत्तैः प्रमाथिभिः ॥४६॥

पन्थानमुल्लिखद्भिश्च तीक्ष्णशृङ्गैर्महावृषैः ।
महाशृङ्गैश्च महिषैरुष्ट्रैर्मत्तैश्च खादनैः ॥४७॥

डाकिनीभिर्विकरालै राक्षसैर्भीमरूपिभिः ।
व्याधिभिश्च महाघोरैः पीड्यमाना ब्रजन्ति च ॥४८॥

महाधूलिविमिश्रेण महाचण्डेन वायुना ।
महापाषाणवर्षेण हन्यमाना निराश्रयाः ॥४९॥

क्वचिद् विद्युत्प्रपातेन दार्यमाणा व्रजन्ति च ।
महता बाणवर्षेण भिद्यमानाश्च सर्वतः ॥५०॥

पतद्भिर्वज्रनिर्घातैरुल्कापातैश्च दारुणैः ।
प्रदीप्ताङ्गारवर्षेण दह्यमाना व्रजन्ति[२४] च ॥५१॥

त्यो बाटो कतै डरलाग्दा माखाहरू, विषले व्याप्त सर्पहरू, विध्वंसक प्रवृत्तिका र बलले मात्तिएका ठूला ठूला हात्तीहरूका समूहहरूले युक्त हुन्छ ।४६।

त्यो बाटो तीखा सीङले बाटोमा खनिरहेका ठूला ठूला साँढेहरू, लामा लामा सीङ भएका राँगाहरू र मताएका र ठूला ठूला दाँतहरूले युक्त ऊँटहरूले व्याप्त छ ।४७।

त्यो बाटोबाट पापी मानिसहरू डाइनी, विकराल र डरलाग्दो स्वरूप भएका राक्षसहरूद्वारा र असाध्य रोगहरूद्वारा सताइँदै यमलोक जान्छन् ।४८।

उनीहरू अत्यधिक धूलोले र ठूला ठूला ढुङ्गाहरू वर्षाइरहेको उग्र हावाहरूद्वारा सताइएका आश्रयहीन भएर यमलोक जान्छन् ।४९।

कतै चट्याङ्गद्वारा विदीर्ण हुँदै र कतै चारैतिर भएको ठूलो बाणको वर्षाद्वारा विदीर्ण हुँदै यमलोक जान्छन् ।५०।

महता पांशुवर्षेण घूर्यमाणा रुदन्ति च ।
महामेघरवैर्घोरैः सन्त्रास्यन्ते मुहुर्मुहुः ॥५२॥

निशितायुधवर्षेण चूर्णमानाश्च[२५] सर्वतः ।
महाक्षाराम्बुधाराभिः सिच्यमाना द्रवन्ति च ॥५३॥

महाशीतेन मरुता रुक्षेण परुषेण च ।

---

२४ ग, घ. नशन्ति ।

२५ ग. चूर्णीकृताश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समन्ताद्वास्यमानाश्च शुष्यन्ते सङ्कुचन्ति[२६] च ॥५४॥

इत्थं मार्गेण रौद्रेण पाथेयरहितेन च ।
निरालम्बेन दुर्गेण निर्जलेन समन्ततः[२७] ॥५५॥

अविश्रामेण महता निर्गतापाश्रयेण च ।
तमोरूपेण कष्टेन सर्वदुःखाश्रयेण च ॥ ५६॥

उधुमसँग खसिरहेका वज्रतुल्य कठोर उल्कापातहरूद्वारा र जलिरहेका फिलिङ्गाहरूको वर्षाद्वारा पोलिँदै यमलोक जान्छन् ।५१।

अत्यधिक धूलोको वर्षाले रिँगाइएका पापी मानिसहरू रुन्छन् र डरलाग्दा बादलका ठूला ठूला गर्जनहरूद्वारा पटक पटक डराइन्छन् ।५२।

तीखा तीखा हतियारहरूको वर्षाले चारैतिरबाट धूलोपीठो बनाइएका र ठूला ठूला नूनिलो पानीका धाराहरूद्वारा सिञ्चिएका यताउता दौड्दछन् ।५३।

अत्यन्त चीसो रुखा कठोर हावाद्वारा चारैतिरबाट सताइएका पापीहरू सुक्छन् र खुम्चिन्छन् ।५४।

यसरी सामलविनाको आश्रयहीन दुर्ग र पानीविनाको चारैतिर डरलाग्दो बाटोबाट पापीहरू यमलोक जान्छन् ।५५।

विश्रामरहित, आश्रयरहित गहिरो अन्धकार र सबै दुःखहरूले युक्त भएको बाटोबाट पापीहरू यमलोक लगिन्छन् ।५६।

नीयन्ते देहिनः सर्वे ये मूढाः पापकारिणः ।
यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् ॥५७॥

एकाकिनः पराधीना मित्रबन्धुविवर्जिताः ।
शोचन्तः स्वानि कर्माणि रुदन्तश्च मुहुर्मुहुः ॥५८॥

प्रेतीभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुकाः ।
कृशाङ्गा भीतभीताश्च दह्यमानाः क्षुधाग्निना ॥५९॥

वद्धाः[२८] शृंखलया केचिदुत्तानाः पादयोर्नराः ।
आकृष्यन्ते घृष्यमाणा[२९] यमदूतैर्बलोत्कटैः ॥६०॥

उरसाऽधोमुखाश्चान्ये घृष्यमाणा सुदुःखिताः ।
केशपाशनिबद्धेन समाकृष्यन्ति रज्जुना ॥६१॥

ललाटे चाङ्कुशेनान्ये भिन्नाः कृष्यन्ति देहिनः ।

२६ ग. सद्वचन्ति ।
२७ ग. समन्नतः ।
२८ ग. बृद्धा ।
२९ ख. कृष्यमाणा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उत्तानाः कण्टकपथा केचिदङ्गारवर्त्मना ॥६२॥

मूर्ख पापी मानिसहरू यमराजको आज्ञा पालना गर्ने डरलाग्दा दूतहरूद्वारा यमलोक हठपूर्वक लगिन्छन् ।५७।

एक्लै र पराधीन मित्र तथा बन्धुहरूरहित आफ्ना पाप कर्महरूलाई सम्झदै पटक पटक रुँदै गरेका पापी मानिसहरू यमलोक लगिन्छन् ।५८।

प्रेत भएका, वस्त्रहीन, तथा घाँटी, ओठ र तालु सुकेका, दुर्बल, अत्यन्त डराएका र भोकको आगोमा जलिरहेका पापीहरू यमलोक लगिन्छन् ।५९।

केही साङ्लोले बाँधिएका र खुट्टा माथितिर फर्काइएका पापी मानिसहरू अत्यन्त बलशाली यमदूतहरूद्वारा घिसार्दै तानिन्छन् ।६०।

छातीको बलमा मुख तलतिर बनाइएका अत्यन्त दुःखी अर्काथरी पापी मानिसहरू घिसार्दै डोरीहरूले कपाल बाँधेर लतारिन्छन् ।६१।

पश्चाद् बाहुकबद्धाश्च जठरे च प्रपीडिताः[30] ।
पूरिताः श्रृंखलाभिश्च हस्तयोश्च सुकीलिताः[31] ॥६३॥

ग्रीवापाशेन कृष्यन्ते प्रयान्ति च सुदुःखिताः ।
जिह्वाशङ्कुप्रबद्धेन कृष्टा नीयन्ति रज्जुना ॥६४॥

कृकद्या[32]मर्द्धचन्द्रेण क्षिप्यमाणा इतस्ततः ।[33]
शिश्ने सवृषणे बद्धा नीयन्तेऽन्ये च रज्जुना ॥६५॥

नासाविद्धाश्च रज्ज्वा च समाकृष्यन्ति चापरे ।
भिन्नाः कपोलयो रज्ज्वा कृष्यन्तेऽन्ये तथोष्ठयोः ॥६६।

विभिन्नाश्चोदरे चान्ये तप्तश्रृखलया नराः ।
कृष्यन्ते कर्णयोश्चान्ये भिन्नाश्च चिवुके परे ॥६७॥

अर्काथरी पापी मानिसहरू निधारमा अंकुश लगाएर तानिन्छन् भने केही उत्तानो परेका काँडाले युक्त बाटोबाट र केही आगोयुक्त राता कोइलाहरूको बाटोबाट घिसारिन्छन् ।६२।

पछाडि हात बाँधिएका, पेटमा पीडा पुराइएका, पंक्तिबद्ध राखिएका र हातमा किलाहरू गाडिएका पापी मानिसहरू यमलोक लगिन्छन् ।६३।

घाँटीमा पाशो लगाएर तानिन्छन् र अत्यन्त दुःखले युक्त भएर यमलोक जान्छन् भने केही जिब्रोमा ठोकिएको किलोमा डोरीले बाँधिएका घिसार्दै यमलोक लगिन्छन् ।६४।

३० ग. पश्चाद् बद्धाश्च जठरे पाशेन च प्रपीडिता ।

३१ ग. सुकीर्तिताः ।

३२ ग. कवर्या ।

३३ घ. ६२ पद्यस्योत्तरार्द्धाद् ६५ पद्यस्य पूर्वार्द्धं यावत् नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

घाँटीमा घोक्र्याएर यताउता पछारिएका र अण्डकोषसहित लिङ्गमा डोरीले बाँधिएका अन्य पापीहरू यमलोक लगिन्छन् ।६५।

अन्य पापीहरू नाकमा प्वाल पारी डोरी हालेर घिसारिन्छन् भने कोही गालाहरूमा प्वाल पारेर, कोही ओठहरूमा प्वाल पारेर डोरी हालेर तानेर लगिन्छ ।६६।

छिन्नाग्रहस्तपादाश्च छिन्नकर्णोष्ठनासिकाः ।
सञ्छिन्नशिश्नवृषणाश्छिन्नभिन्नाङ्गसन्धयः ॥६८॥

प्रभिद्यमानाः कुन्तैश्च भिद्यमानाश्च सायकैः ।
इतस्ततः प्रधावन्ते क्रन्दमाना निराश्रयाः ॥६९॥

मुद्गरैर्लोहदण्डैश्च हन्यमाना मुहुर्मुहुः ।
क्लेशैश्च विविधैर्घोरैर्ज्वलिताग्निसमप्रभैः ॥७०॥

भिन्दिपालैर्विभिद्यन्तः स्रवन्तः[३४] पूयशोणितम् ।
सक्षताः कृमिद्रंष्टाश्च[३५] नीयन्ते विवशा नराः ॥७१॥

याचमानाश्च सलिलमन्नैश्चापि बुभुक्षिताः ।
छायां प्रार्थयमानाश्च शीतार्त्ताश्चानलं पुनः ॥७२॥

केही पापीहरू तताएको साङ्लोद्वारा पेटमा प्वाल पारेर तानिँदै र अन्य केही कानहरूमा र अर्काथरी चिउँडोमा प्वाल पारेर तातो साङ्लोले बाँधेर घिसार्दै यमलोक लगिन्छन् ।६७।

केही पापीहरू हात-खुट्टाका अग्रभागहरू काटिएका, केही कान, ओठ र नाकहरू काटिएका, केही लिङ्ग र अण्डकोषहरू काटिएका र केही अङ्गका जोर्नी जोर्नीहरू छिन्न भिन्न गरिएका यमलोक लगिन्छन् ।६८।

भालाहरू र बाणहरूद्वारा शरीर भेदिएका आश्रयहीन भएका कराइरहेका पापीहरू यताउता दौडन्छन् ।६९।

बलेको आगो समान कान्ति भएका अनेक किसिमका भयङ्कर मुंग्रा र घनहरूद्वारा एवं क्लेशहरूद्वारा पटक पटक हानिएका पापी मानिसहरू यमलोक लगिन्छन् ।७०।

घुयेंत्रोले हिर्काइएका पीप र रगत चुहाउँदै घाउहरूले युक्त तथा किराहरूले डसिएका विवश पापी मानिसहरू यमलोक लगिन्छन् ।७१।

दानहीनाः प्रयान्त्येवं प्रार्थयन्ति मुखान्नराः[३६] ।
गृहीतदानपाथेयाः सुखं यान्ति यमालयम् ॥७३॥

एवं पथातिकष्टेन प्राप्ताः प्रेतपुरन्नराः ।
आज्ञापितास्तदा दूतैः प्रवेश्यन्ते यमाग्रतः ॥७४॥

तत्र ये शुभकर्माणस्तान् सम्मानयते यमः ।

३४ ग. श्रवणाः ।
३५ ग. दष्ठाश्च ।
३६ ग. प्राथयन्ति सुखान्नराः । घ, ङ. प्रार्थयन्विमुखा नराः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वागतासनदानेन पाद्यार्घ्येण प्रियेण च ॥७५॥

धन्या यूयं महात्मानः स्वात्मनो हितकारिणः[37] ।
येन दिव्यसुखार्थाय भवद्भिः सुकृतं कृतम् ॥७६॥

इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितम् ।
स्वर्गं गच्छध्वमतुलं सर्वकामसमन्वितम् ॥७७॥

तिर्खाएका र भोकाएका, पानी र अन्नका लागि कराइरहेका, घामले आत्तिएर छायाको र जाडोले आत्तिएर आगोको माग गरिरहेका पापी मानिसहरू यमलोक लगिन्छन् ।७२।

यसरी दान नदिने व्यक्तिहरू मुखले प्रार्थना गर्दै स्वर्गलोक जान्छन् भने अर्थीलाई सुख र अन्न दिने मानिसहरू दानरूपी सामललाई लिएर सुखपूर्वक यमलोक जान्छन् ।७३।

यसरी अत्यन्त कष्टपूर्ण बाटोबाट यमलोकमा पुगेका मानिसहरू यमराजको आज्ञाले दूतहरूद्वारा उनका अगाडि पुर्‍याइन्छन् ।७४।

जुन मानिसहरूले राम्रो काम गरेका हुन्छन् तिनीहरूलाई स्वागत, आसन, पाद्य, अर्घ्य र मीठो व्यवहारका साथ यमलोकमा यमराजले सम्मान गर्दछन् ।७५।

यमराजले उनीहरूलाई भन्छन् । तिमीहरू धन्य र महान् छौ किनभने आफ्नो हितको चाहनाले दिव्य सुखका लागि तिमीहरूले पुण्य गर्‍यौ ।७६।

तत्र भुक्त्वा महाभोगांस्तदन्ते पुण्यसंक्षयात् ।
यत्किञ्चिदल्पमशुभं पुनस्तदिह भोक्ष्यथ ॥७८॥

ते चापि धर्मराजानं नराः पुण्यानुभावतः ।
पश्यन्ति सौम्यवदनं मित्रभूतमिवात्मनः ॥७९॥

ये पुनः[38] क्रूरकर्माणस्ते पश्यन्ति भयानकम् ।
पापावष्टब्ध[39]नयना विपरीतात्मबुद्धयः ॥८०॥

दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् ।
ऊर्ध्वकेशं महाश्मश्रुं प्रस्फुरत्स्वाधरोत्तरम्[40] ॥८१॥

अष्टादशभुजं क्रुद्धन्नीलाञ्जनचयोपमम् ।

---

३७ ग. हितकाम्यया ।

३८ क, घ. नराः ।

३९ ग. वस्तब्ध ।

४० ग. प्रस्फुरत्स्वधरां हरम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वायुधोद्यतकरं[४१] ब्रह्मदण्डेन तर्जयन् ॥८२॥

यो विमानमा चढेर दिव्य स्त्रीहरूको भोगले सुशोभित भएको सम्पूर्ण कामनाहरूले युक्त अतुलनीय स्वर्गमा जाओ ।७७।

त्यहाँ ठूला ठूला भोगहरू भोगेर पुण्य सकिएपछि जे जति थोरै अशुभ कर्म छन्, तिनीहरूलाई यहाँ आएर भोग्ने छौ ।७८।

ती मानिसहरू पुण्यका प्रभावले यमराजलाई शान्त मुख भएको आफ्नो मित्र जस्तो देख्दछन् ।७९।

परन्तु जुन मानिसहरूले क्रूर काम गरेका हुन्छन् त्यस्ता पापद्वारा आँखा नदेख्ने र उल्टो बुद्धि भएकाहरूले यमराजलाई भयङ्कर देख्दछन् ।८०।

दाह्राहरूले डरलाग्दो मुख भएका, भृकुटीले कुटिल हेराइ भएका, कपालका रौंहरू माथितिर फर्केका, लामा लामा जुँघा भएका, दुबै ओठहरू फर्फराइरहेका यमराजलाई देख्दछन् ।८१।

त्रासन्तमिव त्रैलोक्यमुद्‌गिरन्तमिवानलम्[४२] ।
महामहिषमारूढं दीप्ताग्निसमलोचनम् ॥८३॥

रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितम् ।
प्रलयाम्बुदनिर्घोषं पिबन्तमिव सागरम् ॥८४॥

मृत्युश्च तत्समीपस्थः कालानलसमप्रभः ।
कालश्चाञ्जनसङ्काशः कृतान्तश्च भयानकः ॥८५॥

मारी चोग्रमहामारी कालरात्री च दारुणा ।
विविधा व्याधयः कष्टा नाना रूपा भयावहाः ॥८६॥

शक्तिशुलाङ्कुशकराः[४३] पाशचक्रासिधारिणः ।
वज्रदण्डधरा रौंद्राः क्षुरतूणधनुर्धराः ॥८७॥

अठार हात भएका, रिसाएका, कालो गाजलको राशि जस्तो कान्ति भएका र सम्पूर्ण हतियारहरू हातमा उठाएका र ब्रह्मदण्डद्वारा तर्साइरहेका यमराजलाई पापीहरूले देख्दछन् ।८२।

पापीहरूले तीनै लोकलाई डराउन दिइरहेका जस्ता, आगो उकेलिरहेका जस्ता, ठूलो राँगोमा चढेका र बलिरहेको आगो समान आँखा भएका यमराजलाई देख्दछन् ।८३।

---

४१ ग. सर्वायुद्धोद्यतकरम् ।

४२ ग. रन्ता मिवाननम् ।

४३ ग. शक्तिकुशाङ्कुशकराः ।

CC0. In Public Domain. Digitization by eGangotri

पापीहरूले यमराजलाई रातो माला र लुगा लगाइरहेको सुमेरु पर्वत झैं अग्लो, प्रलय कालको बादलको जस्तो शब्द भएको र सागरलाई पान गरिरहेको जस्तो देख्दछन् ।८४।

यमराजको नजिकमा कल्पाग्नि जस्तो कान्ति भएको मृत्यु रहेको छ भने यमराज गाजल जस्तो कालो कान्तिले युक्त र अन्तकाल जस्ता भयङ्कर छन् ।८५।

त्यहाँ महामारी, उग्रमहामारी, कालरात्रि, डरलाग्दा रोगहरू र भयानक अनेक किसिमका कष्टहरू रहेका हुन्छन् ।८६।

त्यहाँ प्रक्षेप्य हतियार, त्रिशूल र अङ्कुश हातमा लिएका, पाश, चक्र र खुकुरी धारण गरेका, वज्र र दण्डले युक्त, छुरा, बाण र धनुष बोकेका यमदूतहरू हुन्छन् ।८७।

असंख्याता महावीर्याः क्रूराश्चाञ्जनसप्रभाः ।
सर्वायुधोद्यतकरा[४४] यमदूता भयानकाः ।।८८।।

अनेन परिबारेण महाघोरेण संवृतम् ।
ये संपश्यन्ति पापिष्ठाश्चित्रगुप्तञ्च भीषणम् ।।८९।।

निर्भर्त्सयति चात्यर्थं यमस्तान् पापकारिणः ।
चित्रगुप्तश्च भगवान् धर्मवाक्यैः प्रबोधयन् ।।९०।।

भो भो दुष्कृतकर्माणः परद्रव्यापहारिणः ।
गर्विता रूपवीर्येण परदारविमर्दकाः ।।९१।।

यस्स्वयं क्रियते कर्म तत्स्वयं भुज्यते पुनः ।
तत्किमात्मोपघातार्थं भवद्भिर्दुष्कृतं कृतम् ।।९२।।

असंख्य धेरै बल भएका, क्रूर, गाजलजस्तो कालो कान्तिले युक्त भएका, सम्पूर्ण हतियारहरू हातमा उठाएका डरलाग्दा यमदूतहरू त्यहाँ रहन्छन् ।८८।

यस्तै किसिमको डरलाग्दो परिवारद्वारा घेरिएको यमलाई र डरलाग्दो चन्द्रगुप्तलाई पापीहरूले देख्दछन् ।८९।

चित्रगुप्त र भगवान् यमराजले धर्मवचनद्वारा सम्झाउँदै ती पापीहरूलाई अत्यधिक हप्काउँछन् र।९०।

हे पापी हो ! अर्काको धन अपहरणकर्ता हो ! आफ्नो रूप र बलको घमण्डले युक्त भएर परस्त्रीको मर्दन गर्नेवालाहरू हो ! जो आफूले कर्म गरिन्छ त्यसको फल आफैले भोग्नु पर्दछ । त्यसैले आफ्नै विनाशका लागि तिमीहरूले पाप किन गर्‍यौ ।९१-९२।

इदानीं किं प्रतप्यध्वं पीड्यमानाः स्वकर्मभिः ।
भुञ्जध्वं स्वानि कर्माणि [४५]नात्रदोषोऽस्ति कस्यचित् ।।९३।।

एते ते[४६] पृथिवीपालाः सम्प्राप्ता तत्समीपतः ।

४४ क, घ. गर्वितारुद्यतकराः
४५ ग. मात्र ।
४६ ग. मे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वकीयैः कर्मभिर्घोरैर्दुष्प्रज्ञाबलगर्विताः ॥९४॥

भो भो नृपा दुराचाराः प्रजाविध्वंसकारकाः ।
अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम् ॥९५॥

राज्यलोभेन मोहेन बलादन्यायतः प्रजाः ।
यद्दण्डिताः फलन्तस्य भुञ्जध्वमधुना नृपाः ॥९६॥

क्व तद्राज्यं कलत्रञ्च यदर्थमशुभं[४७] कृतम् ।
तत्सर्वं सम्परित्यज्य यूयमेकाकिनः स्थिताः ॥९७॥

आफ्नै कर्महरूले पीडित भैरहेका तिमीहरूले अब के सन्ताप गर्दछौ । आफैले गरेका कामहरूको फल भोग । यसमा अरू कसैको दोष छैन ।९३।

यिनी ती राजाहरू, जो दुर्बुद्धि र बलको घमण्ड गर्दथे, आफ्ना डरलाग्दा कुकृत्यहरूका कारण मेरा समीप आइपुगेका छन् ।९४।

हे दुराचारी प्रजाहरूमा विध्वंस मचाउने राजाहरू हो ! थोरै समयका राज्यका लागि किन पाप गर्‍यौ ।९५।

हे राजाहरू हो ! राज्यको लोभ र मोहमा परेर बलपूर्वक र अन्यायका साथ प्रजाहरूलाई जुन दण्ड दिएका थियौ, अब त्यसको फल भोग ।९६।

त्यो राज्य अब कहाँ छ र ती स्त्रीहरू कहाँ छन् जसका लागि तिमीहरूले अशुभ काम गरेका थियौ । ती सबै छोडेर तिमीहरू एक्लै पाप बोक्न उपस्थित भएका छौ ।९७।

पश्यामस्तद्बलं तुभ्यं[४८] येन[४९] विध्वंसिताः प्रजाः ।
दूतैः प्रयात्यमानानामधुना कीदृशम्भवेत् ॥९८॥

एवं बहुविधैर्वाक्यैरुपलब्धा यमेन ते ।
शोचन्तः स्वानि कर्माणि तूष्णीन्तिष्ठन्ति पार्थिवाः ॥९९॥

इति धर्मं समादिश्य नृपाणां धर्मराट् पुनः ।
तत्पातकविशुद्ध्यर्थमिदं वचनमब्रवीत् ॥१००॥

भो भो चण्ड महाचण्ड गृहीत्वा नृपतीनिमान् ।
विशोधयध्वं पापेभ्यः क्रमेण नरकाग्निषु ॥१०१॥

ततः शीघ्रं समुत्थाय नृपांस्तान् गृह्य पादयोः ।
भ्रामयित्वाऽतिवेगेन विक्षिप्योर्ध्वं प्रगृह्य च ॥१०२॥

सर्वप्राणेन महता सुतप्ते च शिलातले ।

---

४७ ग. यदत्र (यत्कृते) चाशुभम् ।
४८ ग. वोऽद्य ।
४९ ङ. यैर्न ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

आस्फालयन्ति तरसा बज्रेणेव महाद्रुमम्[५०] ॥१०३॥ CC0. In Public Domain. Digitization by eGangotri

हामी तिमीहरूको त्यो बललाई हेर्न चाहन्छौं, जसबाट प्रजाहरूमा विध्वंस मच्चाएका थियौ। यमदूतहरूद्वारा यातना दिइराख्दा अब तिमीहरूलाई कस्तो लागिरहेको छ होला ।९८।

यसरी यमराजद्वारा धेरै किसिमका वाक्यले हप्काइएका आफूले गरेका कामहरूका विषयमा शोक गर्दै ती राजाहरू मौन बस्तछन् ।९९।

यसरी पापी राजाहरूलाई धर्मराजले धर्मको उपदेश गर्दै पुनः त्यो पापबाट मुक्तिका लागि यो कुरा भने ।१००।

हे चण्ड र महाचण्ड दूतहरू हो ! यी राजाहरूलाई लिएर क्रमैसँग नरकको आगोमा विशुद्ध बनाओ। त्यसपछि ती दूतहरूले छिटो छिटो उठेर ती राजाहरूका खुट्टा समातेर अत्यन्त वेगले घुमाएर माथितिर फ्याँकेर फेरि समातेर अत्यधिक बल लगाएर अत्यन्त तातेको ढुङ्गामा ठूला रूखहरूमा बज्र बजारे झैं अत्यन्त वेगले बजार्दछन् ।१०१-१०३।

ततः स्वरक्त[५१] स्रोतोभिः स्रवते जर्जरीकृतः[५२] ।
निस्संज्ञस्स ततो[५३] देही निश्चेष्टश्च प्रजायते ॥१०४॥

ततः स वायुना स्पृष्टः शनैरुज्जीवते पुनः ।
ततः पापविशुद्ध्यर्थं क्षिप्यते नरकार्णवे ॥१०५॥

अष्टाविंशतिरेवाधः क्षितेर्नरककोटयः ।
सप्तमस्य तलस्यान्ते घोरे तमसि संस्थिताः ॥१०६॥

घोराख्या प्रथमा कोटिः सुघोरा तदधः स्थिताः ।
अतिघोरा महाघोरा घोररूपा तु पञ्चमी ॥१०७॥

षष्ठी तरलघोराख्या सप्तमी च भयानकाः ।
अष्टमी कालरात्रिश्च नवमी च भयोत्कटा ॥१०८॥

त्यसपछि रगतका स्रोतहरूबाट रगत बग्न थाल्दछ र जिउ छिया छिया भएको ऊ पहिले संवेदनहीन हुन्छ र अन्त्यमा बेहोस हुन्छ ।१०४।

त्यसपछि हावाको स्पर्शबाट फेरि सुस्तरी ब्युतिन्छ र पाप शुद्धिका लागि फेरि नरकरूपी सागरमा फ्याँकिन्छ ।१०५।

पृथ्वीभन्दा तल नरकका अट्ठाईसवटा लामहरू छन्। जो सातौं तलाको अन्तमा घनघोर अँध्यारोमा रहेका छन् ।१०६।

---

५० ग. महाद्रुमाः ।

५१ ङ. संरक्त ।

५२ ग. तर्जनीकृताः ।

५३ ग. सततम् ।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तिनीहरूमा पहिलो पङ्क्तिमा घोरा, त्यसको तल दोस्रो पङ्क्तिमा सुघोरा त्यसमुनि अतिघोरा, त्यसमुनि महाघोरा र त्यसमुनि पाँचौ घोररूपा कोटीहरू छन् ।१०७।

क्रमशैसँग तल तल छैठौं तरलघोरा, सातौं भयानका, आठौं कालरात्रि र नवौं भयोत्कटा नामका कोटीहरू रहेका छन् ।१०८।

दशमी च ततश्चण्डा महाचण्डा ततोऽप्यधः ।
चण्डकोलाहला चान्या प्रचण्डा नरनायिका ॥१०९॥

पद्मा पद्मावती भीमा भीमभीषणनायिका ।
कराला विकराला च वज्रा विंशतिमाश्रिताः[५४] ॥११०॥

त्रिकोणा पञ्चकोणा च सुदीर्घा परिवर्तुला ।
सप्तभौमाष्टभौमा च दीप्ता मायेति चाष्टमी ॥१११॥

ता नामतः समुद्दिष्टा घोरा नरककोटयः ।
अष्टाविंशतिरेवैताः पापिनां यातनात्मिकाः ॥११२॥

आसां क्रमेण विज्ञेयाः पञ्च पञ्चैव नायकाः ।
प्रत्येकं सर्वकोटीनान्नामतस्तान्निबोधत ॥११३॥

त्यसैगरी दशौं चण्डा, एघारौं महाचण्डा, बाह्रौं चण्डकोलाहला, तेह्रौं नरनायिका प्रचण्डा रहेका छन् ।१०९।

त्यसैगरी क्रमशैसँग तल तल चौधौं पद्मा, पन्द्रौं पद्मावती, सोह्रौं भीमा, सत्रौं डरलाग्दी भीषणनायिका, अठारौं कराला, उन्नाइसौं विकराला र बिसौं संख्यामा रहेको वज्रा नाम गरेको कोटी छ ।११०।

यसैगरी क्रमशः त्रिकोणा, पञ्चकोणा, सुदीर्घा, परिवर्तुला, सप्तभौमा, अष्टभौमा, दीप्ता र माया यी आठवटा नरककोटीहरू हुन्छन् ।१११।

यी नाम लिइएका डरलाग्दा घोरा आदि (२०+८ = २८) अट्ठाइसै नरककोटीहरू पापीहरूको यातनाका लागि रहेका छन् ।११२।

यी पापकोटीहरूका प्रत्येकका पाँच पाँच नायकहरू हुन्छन् तिनीहरूलाई जानिराख ।११३।

रौरवः प्रथमस्तेषां रुदन्ते[५५] यत्र देहिनः ।
महारौरवपीडाभिर्महान्तोऽपि रुदन्ति हि[५६] ॥११४॥

तमः शीतं तथा चोष्णः पञ्चाद्या नायकाः स्मृताः ।
सुघोरः सुतमस्तीक्ष्णः पद्मः सञ्जीवनः शठ[५७] ॥११५॥

---

५४ ग. चतुर्विंशतितमा स्मृताः ।
५५ ख, ग. रुदन्ति ।
५६ ख, ग, घ. च ।
५७ ख, ग, घ तथा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महामायी विलोमश्च सुलोमश्च कटङ्कटः ।
तीव्रकेशः[५८] करालश्च विकरालः प्रकम्पनः ॥११६॥

महापद्मः सुवक्त्रश्च कालसूत्रः प्रगर्जनः[५९] ।
सूचीमुखः सुनेमिश्च[६०] खादकः सुप्रपीडनः ॥११७॥

कुम्भीपाकः सुपाकश्च क्रकचश्चातिदारुणः ।
अङ्गारराशिभवनश्चाम्रक् पूयह्रदस्ततः[६१] ॥११८॥

तीक्ष्णायस्तुण्ड[६२]शकुनिर्महासंवर्त्तकः क्रतुः ।
तप्तजतुः पङ्कलेपः पूतिमांसो द्रवस्तपुः ॥११९॥

तिनीहरूमा पहिलो नायक रौरव हो जहाँ प्राणीहरू रुने गर्दछन् । दोस्रो महारौरव हो । त्यहाँ पीडाहरूद्वारा ठूला ठूला मानिसहरू पनि रुने गर्दछन् ।११४।

यसै गरी तेस्रो तम, चौथो शीत, पाँचौं उष्ण पहिलो घोरा कोटीमा रहने पहिला पाँच नायकहरू हुन् । यसै गरी क्रमैसँग ६) सुघोर, ७) सुतम, ८) तीक्ष्ण, ९) पद्म, १०) सञ्जीवन, ११) शठ १२) महामायी, १३) विलोम, १४) सुलोम, १५) कटङ्कट, १६) तीव्रकेश, १७) कराल, १८) विकराल, १९) प्रकम्पन २०) महापद्म, २१) सुवक्त्र, २२) कालसूत्र, २३) प्रगर्जन, २४) सूचीमुख, २५) सुनेमि, २६) खादक, २७) सुप्रपीडन, २८) कुम्भीपाक, २९) सुपाक, ३०) क्रकच,

उच्छ्वासश्च निरुच्छ्वासः सुदीर्घः कूटशाल्मलिः ।
दुरिष्टः[६३] सुमहानादः प्रवहः सुप्रवाहनः[६४] ॥१२०॥

ऋक्षमेषवृकाश्चान्ये सिंहव्याघ्रगजाननाः ।
श्वशूकराश्व महिषा वृषमेषा अजाननाः[६५] ॥१२१॥

ग्राहकुम्भीरनक्रास्याः सर्पकूर्माश्च वायसाः ।
गृध्रोलूकजलौकाश्च शार्दूलकपिकर्कटाः ॥१२२॥

गण्डकाः पूतिवक्त्राश्च रक्तास्याः[६६] पूतिमृत्तिकाः ।
कणधूमास्तुषाग्निश्च कृमीणान्निचयस्तथा ॥१२३॥

५८ क. तीव्रवेगः ।
५९ क. प्रमर्दनः ।
६० ग,ङ. सुनेमश्च ।
६१ ख, ग, घ. पूयमहाह्रदः ।
६२ ग. खण्ड ।
६३ ग. दुरेष्टः ।
६४ घ. प्रवदः सुप्रवादनः ।
६५ ख, ग. अजास्तथा । घ .गजास्तथा ।
६६ ग. एकाक्षाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अभेद्यश्चाप्रतिष्ठश्च रुधिराणाञ्च भोजनः[६७] ।
लालाभक्षात्मभक्षश्च सर्वभक्षः सुदारुणः ॥१२४॥

सङ्कटः सुविशालश्च विकटः कटपूतनः ।
अम्बरीषः कटाहश्च कष्टा वैतरणी नदी ॥१२५॥

३१) अतिदारुण, ३२) अङ्गारराशिभवन, ३३) अम्रक्, ३४) पूयह्रद, ३५) तीक्ष्ण, ३६) अयस्तुण्ड, ३७) शकुनि, ३८) महासंवर्त्तक, ३९) ऋतु, ४०) तप्तजतु, ४१) पङ्कलेप, ४२) पूतिमांस, ४३) द्रव, ४४) त्रपु, ४५) उच्छ्वास, ४६) निरुछ्वास, ४७) सुदीर्घ, ४८) कूटशाल्मलि ४९) दुरिष्ट, ५०) सुमहानाद, ५१) प्रवह, ५२) सुप्रवाहन, ५३) ऋक्ष, ५४) मेष, ५५) वृक, ५६) सिंहानन, ५७) व्याघ्रानन, ५८) गजानन, ५९) श्वा, ६०) शूकर, ६१) अश्व, ६२) महिष, ६३) वृष, ६४) मेष, ६५) अज ६६) ग्राहास्य, ६७) कुम्भीरास्य, ६८) नक्रास्य, ६९) सर्प, ७०) कूर्म, ७१) वायस, ७२) गृध्र, ७३) उलूक, ७४) जलौक, ७५) शार्दूल, ७६) कपि, ७७) कर्कट, ७८) गण्डक, ७९) पूतिवक्त्र, ८०) रक्तास्य, ८१) पूतिमृत्तिका, ८२) कणधूम, ८३) तुषाग्नि, ८४) कृमीनिचय, ८५) अभेद्य,

सुतप्तलोहशयनमेकपादः प्रपूरणः ।
असितालवनं घोरं मक्षिभृङ्गप्रपीडनम्[६८] ॥१२६॥

तिलातसी[६९]क्षुयन्त्राणि कूटपाशप्रमर्दनः ।
महाचुल्ली सुचुल्ली च तप्तलोहमयी शिला ॥१२७॥

पर्वतः क्षुरधाराख्यस्तथा यमलपर्वतौ[७०] ।
मूत्रविष्ठान्धकूपश्च क्षारकूपश्च शातनः[७१] ॥१२८॥

मुशलोलूखलं यन्त्रं शिलाशकटलाङ्गलम् ।
तालपत्रासिगहनं महामशक[७२]मण्डपम् ॥१२९॥

सम्मोहनास्थिभङ्गश्च तप्तशूलमयोऽशुभम् ।
बहुदुःखं महादुःखं कश्मलं शवलं मलम् ॥१३०॥

हालाहलं विरूपञ्च सुरूपश्च यमानुगः ।
एकपादस्त्रिपादश्च तीव्रश्चावीचिरन्तिमः ॥१३१॥

८६)अप्रतिष्ठ, ८७) रुधिरभोजन, ८८) लालाभक्ष, ८९) आत्मभक्ष, ९०) सर्वभक्ष, ९१) सुदारुण, ९२) सङ्कट, ९३) सुविशाल, ९४) विकट, ९५) कटपूतन, ९६) अम्बरीष, ९७) कटाह, ९८) कष्टा, ९९) वैतरणी नदी, १००) सुतप्तलोहशयन, १०१) एकपाद, १०२) प्रपूरण, १०३) असितालवन, १०४) घोर, १०५) मक्षिभृङ्गप्रपीडित,

६७ ख, घ. भोजनम्
६८ ख, ग. पीडितम् ।
६९ घ. वसीक्षु ।
७० ग. पर्वतम् ।
७१ क. क्षारकूपश्च शासनः । ग. शा(क्षा)लकूपश्च शातनः ।
७२ ग. पातक ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१०६) तिलयन्त्र, १०७) अतसियन्त्र, १०८) ईक्षुयन्त्र, १०९) कूटपाशप्रमर्दन, ११०) महाचुल्ली, १११) सुचुल्ली, ११२) तप्तलोहमयी शिला, ११३) क्षुरधार नाम गरेको पर्वत, ११४ र ११५) जुम्ल्याहा पर्वतहरू, ११६) मूत्रविष्ठा कूप, ११७) अन्धकूप, ११८) क्षारकुवा, ११९) शातन, १२०) मुशलोलूखलयन्त्र, १२१) शिलाशकटलाङ्गल, १२२) तालपत्रासिगहन, १२३) महामशकमण्डप,

अष्टाविंशतिरित्येते क्रमशः पञ्चनायकाः ।
कोटीनामानुपूर्वेण पञ्च पञ्चैव नायकाः ॥१३२॥

रौरवाद्यमवीच्यन्तं नरकाणां शतं स्मृतम् ।
चत्वारिंशत्समधिकं[७३] महानरकमण्डलम् ॥१३३॥

एषु पापाः प्रपच्यन्ते नराः कर्मानुरूपतः[७४] ।
यातनाभिर्विचित्राभिर्नराः कर्मक्षया भृशम् ॥१३४॥

आमलप्रक्षयाद् यद्वदग्नौ धाम्यन्ति धातवः ।
तथापापक्षयात् पापाः शोध्यन्ते नरकाग्निषु ॥१३५॥

१२४) सम्मोहन, १२५) अस्थिभङ्ग, १२६) तप्तशूलमय, १२७) अशुभ, १२८) बहुदुःख, १२९) महादुःख, १३०) कश्मल, १३१) शवल, १३२) मल, १३३) हालाहल, १३४) विरूप, १३५) सुरूप, १३६) यमानुग, १३७) एकपाद, १३८) त्रिपाद, १३९) तीव्र, १४०) अवीचि ।११५-१३१।

यी पाँच पाँचवटा नायकहरू भएका २८ कोटीहरू नरकका छन् । यी कोटीहरूका माथिदेखि क्रमैसँग पाँच पाँचवटा नायकहरू हुन् ।१३२।

रौरवदेखि लिएर अवीचिसम्म एकसय चालीस नरकहरू रहेका छन् र यिनैलाई महानरकमण्डल भनिन्छ ।१३३।

यी नरकहरूमा आफूले गरेको पाप कर्मअनुसार तिनको नाश नहुँदासम्म विचित्र यातनाहरूद्वारा मानिसहरू अत्यधिक तपाइन्छन् ।१३४।

फोहोर सफा नहुँदासम्म जसरी धातुहरू आगोमा तपाइन्छन्, त्यसैगरी पाप नाश नहुँदासम्म पापीहरू नरकको आगोमा तपाइन्छन् ।१३५।

सुगाढं हस्तयोर्बद्धा तप्तश्रृङ्खलया नराः[७५] ।
महावृक्षाग्रशाखासूल्लम्ब्यन्ते यमकिङ्करैः[७६] ॥१३६॥

---

७३ ग. चत्वारिंशच्छताधिकम् ।

७४ ग. नरकर्मानुरूपतः ।

७५ ख, ग. सुगाढं तप्तयोर्बद्धा तप्तश्रृङ्खलया नरः ।

७६ ख, ग, ङ. महावृक्षाग्रशाखासु उल्लम्ब्यन्तेऽस्य किङ्करैः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततस्ते सर्वयत्नेन क्षिप्ता दोलन्ति किङ्करैः ।
दोलन्तश्चाति वेगेन निःसंज्ञा यान्ति योजनम् ।।१३७।।

अन्तरिक्षस्थितानान्तु लोहभारद्वयन्नरः[77] ।
पादयोर्वध्यते तेषां यमदूतैर्महाबलैः ।।१३८।।

तेन भारेण महता भृशमातानिता[78] नराः ।
ध्यायन्तः स्वानि कर्माणि तूष्णीन्तिष्ठन्ति निश्चलाः ।।१३९।।

ततः कशै[79]रग्निकल्पैर्लोहदण्डैः सकण्टकैः ।
हन्यन्ते किङ्करैर्घोरैः समन्तात्पापकारिणः ।।१४०।।

तातेका साङ्लाहरूले हातहरू बलियोसँग बाँधिएका पापी मानिसहरू यमदूतहरूद्वारा ठूला ठूला रूखका हाँगाहरूमा उल्टो पारेर झुन्ड्याइन्छन् ।१३६।

त्यसपछि ती मानिसहरू यमदूतहरूद्वारा सम्पूर्ण यत्नपूर्वक पिङ् जस्तै हल्लाइन्छन् । अत्यन्त वेगसँग हल्लाइएका तिनीहरू निश्चेष्ट भएर चारकोस पर पुग्दछन् ।१३७।

अत्यन्त शक्तिशाली यमदूतहरूद्वारा अन्तरिक्षमा रहेका ती पापीहरूका खुट्टाहरूमा दुईवटा फलामका भारीहरू बाँधिन्छन् । १३८।

खुट्टामा बाँधिएको त्यो ठूलो भारद्वारा अत्यधिक तन्क्याइएका ती पापी मानिसहरू आफ्ना पापकर्महरूलाई सम्झँदै मौन र स्तब्ध भईरहन्छन् ।१३९।

त्यसपछि डरलाग्दा यमदूतहरूले आगोझैं रातो हुने गरी तातेका कोर्राहरू र काँडै काँडा भएका फलामका लौराहरूले पापीहरूलाई चारैतिरबाट हिर्काउँछन् ।१४०।

ततः क्षारेण दीप्तेन वह्नेरपि[80] विशेषतः ।
समन्ततः प्रलिप्यन्ते क्षताङ्गा जर्जरीकृताः ।।१४१।।

पुनर्विदार्य[81] चाङ्गेषु शिरसः प्रभृतिक्रमात् ।
वृन्ताकवत्[82]प्रपच्यन्ते तप्ततैल[83]कटाहके ।।१४२।।

विष्ठापूर्णे तथा कूपे कृमीणां निचये ततः ।

---

७७ ख, घ. ततः ।
७८ क. भृशमाशामिता ।
७९ क, ग. केशैः ।
८० ग. चस्तेरपि ।
८१ ग. पुनर्विचार्य ।
८२ ग. वार्त्ताकु(त्त) । घ. वार्ताकवत् । ङ. वार्ताकुर्वत् ।
८३ घ. तप्ततैलैः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
मेदोऽसृक्पूयपूर्णायां[८४] वाप्यां क्षिप्यन्ति ते पुनः ॥१४३॥

भक्ष्यन्ते कृमिभिस्तीक्ष्णैर्लोहतुण्डैश्च वायसैः ।
श्वभिर्दंशैर्वृकैर्व्याघ्रै रौद्रैश्च विकृताननैः ॥१४४॥

पच्यन्ते[८५] मांस[८६]वच्चापि प्रदीप्ताङ्गारराशिषु ।
प्रोताः[८७] शूलेषु तीक्ष्णेषु नराः पापेन कर्मणा ॥१४५॥

त्यसपछि आगो भन्दा पनि प्रचण्ड विशेष किसिमले तताइएको सिसाद्वारा क्षत-विक्षत भई जर्जर भएका मानिसहरूलाई सबैतिरबाट लिपिन्छ ।१४१।

क्रमैसँग शिरदेखि पाउसम्म अङ्गहरूलाई चिरेर तातिएको तेलको कराहीमा भन्टा पकाएझैं पकाइन्छ ।१४२।

त्यसपछि पापीहरू मलले भरिएको कीराहरूको झुण्डले युक्त कुवा र बोसो, रगत र पीपले भरिएका पोखरीमा फ्याँकिन्छन् ।१४३।

तीखा कीराहरूद्वारा, फलामको जस्तो साह्रो चोंच भएका कौवाहरूद्वारा र डरलाग्दा एवं मुख बिगारेका कुकुर, डाँस, ब्वाँसा तथा बाघहरूद्वारा खाइन्छन् ।१४४।

तिलपिण्डैरिवाक्रम्य घोरैः कर्मभिरात्मजैः ।
तिलवत्सम्प्रपीड्यन्ते चक्राख्ये नरके नराः ॥१४६॥

भृज्यन्ते चातितप्तेषु लोहभ्राष्ट्रेष्वनेकधा ।
तैलपूर्णकटाहेषु सुतप्तेषु ततः पुनः ॥१४७॥

बहुधो[८८]त्पाट्यते जिह्वा असत्याप्रियवादिनाम्[८९] ।
सन्दंशेन सुतप्तेन प्रपीड्योरश्च पादतः ॥१४८॥

मिथ्यागमप्रवक्तुश्च द्विजिह्वस्य च निर्गताः ।
जिह्वार्द्धक्रोशविस्तीर्णा हलैस्तीक्ष्णैः प्रपाट्यते[९०] ॥१४९॥

निर्भत्सयन्ति[९१] ये क्रूरा मातरं पितरं गुरुम् ।
तेषां वज्रजलौकाभिर्मुखमापूर्य सिच्यते ॥१५०॥

---

८४ ग. पूर्यमाणायाम् ।
८५ ग. पश्यन्ते ।
८६ क. मत्स्य ।
८७ ख, ग. प्रेता ।
८८ क, ग, घ. बहुशो ।
८९ ग. असत्यात् प्रियवादिनाम् । ङ. असत्याप्रियवादिनः ।
९० क. प्रयागते । ग. प्रपाद्यते ।
९१ क. निर्भत्यन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पापकर्महरूद्वारा मानिसहरू तीखा सुइरामा उनेर बलिरहेको आगाको भुङ्ग्रोहरूमा मासु पोलेझैं पोलिन्छन् ।१४५।

आफूबाट भएका डरलाग्दा तिलका डल्लाहरू जस्ता कर्महरूबाट पापी मानिसहरू चक्र नाम गरेको नरकमा कोलमा तिलझैं पेलिन्छन् ।१४६।

पापी मानिसहरू तातेका फलामका हाँडीहरूमा अनेक पटक भुटिन्छन् र फेरि तेलले भरिएका ताता कराहीहरूमा तारिन्छन् ।१४७।

असत्य र नमीठो बोल्ने मानिसहरूलाई खुट्टादेखि छातिसम्म अठ्याएर तातेको सनासोले धेरै पटक उनीहरूको जिब्रो थुतिन्छ ।१४८।

शास्त्रको असत्य व्याख्या गर्ने र दुई जिब्रे मान्छेको जिब्रोलाई आधा कोससम्म फैलाएर तीखो फाली भएको हलोले जोतिन्छ ।१४९।

ततः क्षारेण दीप्तेन ताम्रेण त्रपुणा पुनः ।
द्रुतेन पूर्यतेऽत्यर्थं तप्तैस्तैलैश्च तन्मुखम् ॥१५१॥

इतस्ततः पुनर्वक्त्रं भृशमापूर्य हन्यते ।
विष्ठाभिः कृमिपूर्णाभिः सोपानच्चरणैर्नरैः ॥१५२॥

परिष्वजन्ते चात्युग्रां प्रदीप्तां लोहशाल्मलीम् ।
हन्यन्ते पृष्ठदेशे च पुनर्भीमैर्महाघनैः ॥१५३॥

दन्तुरेणातिकुण्ठेन क्रकचेन बलीयसा ।
शिरःप्रभृति पादान्ते घोरैः कर्मभिरात्मजैः ॥१५४॥

खादन्ति च स्वमांसानि पाय्यन्ते[९२] शोणितं स्वकम् ।
अन्नपानं न यैर्दत्तं मूढैर्नाप्यनुमोदितम् ॥१५५॥

जुन क्रूर मानिसहरूले आमा, बुबा, तथा गुरुलाई हप्काउँछन् तिनीहरूको मुखमा वज्र जस्ता जुकाहरूलाई भरेर सिञ्चन गरिन्छ ।१५०।

त्यसपछि पगालिएको तातै सिसा, तामो, राङले र तातेका तेलहरूले तिनीहरूको मुख भरिन्छ ।१५१।

त्यस पछि फेरि किराहरूले युक्त दिसा बेसरी मुखमा ठोँसेर जुत्ता लगाएका मानिसहरूले भकुर्दछन् । १५२।

कठोर तातेका फलामे सिमललाई अँगालो हाल्न लगाएर पछाडिबाट भयङ्कर र ठूल्ठूला घनहरूले हिर्काइन्छ ।१५३।

आफैबाट भएका घोर पाप कर्महरूका कारण पापीहरू दाँते, कुँडिएको र बलियो आराले शिरदेखि पाउसम्म रेटिन्छन् । १५४ ।

९२ क. पाय्र्यन्ते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जुन मानिसहरूले अन्नपानादि दान गर्दैनन् र जुन मूर्ख मानिसहरूले दानको अनुमोदन गर्दैनन्, तिनलाई आफ्नै मासु ख्वाइन्छ र आफ्नै रगत पिलाइन्छ ।१५५।

इक्षुवत्सुप्रपीड्यन्ते जर्जरीकृत्य मुद्गरैः ।
अशितालवने घोरे छिद्यन्ते खण्डखण्डशः ॥१५६॥[९३]

सूचिभिर्भिन्न[९४]सर्वाङ्गास्ततः शूलप्ररोपिताः ।
सञ्चाल्यमाना विवशास्तिष्ठन्ति न म्रियन्ति च ॥१५७॥

देहादुत्पाट्यते मांसं भिद्यन्तेऽस्थीनि मुद्गरैः ।
दृतिराकृष्यते तूर्णं यमदूतैर्बलोत्कटैः ॥१५८॥

निरुच्छ्वासे निरुच्छ्वासास्तिष्ठन्ति नरके चिरम् ।
उच्छ्वसन्तः सदोच्छ्वासे बालुकावदनावृताः ॥१५९॥

रौरवे रोदमानाश्च पीड्यन्ते विविधैर्वधैः ।
महारौरवपीडाभिर्महान्तोऽपि रुदन्ति च ॥१६०॥

पापीहरू मुग्राले हानेर छिया छिया बनाइन्छन् र उखुभैँ पेलिन्छन् । कालो विषाक्त घनघोर वनमा लगेर टुक्रा टुक्रा गरेर काटिन्छन् ।१५६।

जिउभरि सुइयो बिजाइन्छ र शूलमा उनेर बेसरी रिंगाइन्छन् तर पनि विवशतया स्तब्ध हुन्छत् तर पापवश मर्दैनन् ।१५७।

बलोद्धत यमदूतहरूद्वारा शरीरबाट मासु निकालिन्छ, मुंग्राहरूले हाडहरू फुटालिन्छन् र तत्काल जिउबाट छाला निकालिन्छ । १५८ ।

साँघुरो नरकमा निसाासिएर लामो समयसम्म रहन्छन् भने बालुवाले मुख ढाकिएर सास लिइरहेका हुन्छन् ।१।६९

रौरवनाम गरेको नरकमा नानाथरी प्रताडनाहरूद्वारा रोइरहेका पापीहरूलाई पीडा दिइन्छ । महारौरवमा दिएका पीडाहरूले ठूला ठूला मानिसहरू पनि रुन्छन् ।१६०।

पद्भ्यामास्ये गुदे चाक्षणोः पाणौ चोरसि मस्तके ।
निखन्यन्ते घनैस्तीक्ष्णैः सुतप्ता लोहशङ्कवः ॥१६१॥

सुतप्तबालुकायाञ्च प्रद्योल्यन्ते मुहुर्मुहुः ।
जतुपङ्के भृशं तप्ते क्षिप्ताः क्रन्दन्ति विस्वरम् ॥१६२॥

---

९३ ग. १५५ पद्यं १५६ पद्यञ्च न स्तः ।
९४ ग. रुदन्तिच्छिन्न ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेन तेनैव रूपेण हसन्तीं पारदारिकाम् ।
गाढमालिङ्गते नारीं ज्वलन्तीं लोहनिर्मिताम् ॥१६३॥

पूर्वाकाराश्च पुरुषाः प्रज्वलन्तः सुभीषणाः[९५] ।
दुश्चारिणीं स्त्रियं गाढमालिङ्गन्ति वदन्ति च ॥१६४॥

किं प्रधावसि वेगेन न ते मोक्षोऽस्ति[९६] साम्प्रतम् ।
लङ्घितस्ते यथा भर्ता पापं भुङ्क्ष्व तथाधुना ॥१६५॥

खुट्टा, मुख, गुद, आँखा, हात, छाति र निधारमा तीखा घनहरूले तातेका किलाहरू ठोकिन्छन् ।१६१।

अत्यन्त तातेको बालुवामा बारम्बार घिसारिन्छन् । अत्यन्त तातेको लाहको हिलोमा फ्याँकिन्छन् र नराम्रोसँग रुन्छन् ।१६२।

त्यस त्यस रूपमै हाँसिरहेकी, फलामले बनाइएकी र बलिरहेकी अर्काकी पत्नीरूप नारीसँग गाढ आलिङ्गन गराइन्छ ।१६३।

पहिले बताए जस्तै फलामले बनेका र आगोले रन्केका डरलाग्दा मानिसहरूले दुराचारिणी स्वास्नीमान्छेलाई आलिङ्गन गर्दछन् र भन्दछन् ।१६४।

जोरसँग किन भागिरहेकी छस् अहिले मुक्ति पाउने छैनस् । जसरी तैँले आफ्ना पतिको अतिक्रमण गरेकी थिइस्, त्यसको फल त्यसै गरी भोग् ।१६५।

लोहकुम्भे विनिःक्षिप्ताः सपिधाने[९७] शनैः शनैः ।
मृद्वग्निना प्रपच्यन्ते स्वपापैरेव मानवाः ॥१६६॥

क्षोदन्त्युलूखले[९८] घोरे प्रक्षिप्यन्ते[९९] शिलासु च ।
क्षिप्यन्ते चान्धकूपेषु दश्यन्ते भ्रमरैर्भृशम् ॥१६७॥

कृमिभिर्भिन्नसर्वाङ्गाः शतशो जर्जरीकृताः ।
सुतीक्ष्णक्षारकूपेषु क्षिप्यन्ते तदनन्तरम् ॥१६८॥

महाज्वाले च नरके पापाः फूत्कारया भृशम् ।
इतश्चेतश्च धावन्ति दह्यमानाः सदार्चिभिः ॥१६९॥

---

९५ ग. सुभीषणा ।
९६ ग. मोक्षसि
९७ क, ख, ग, घ. सपिधानैः ।
९८ ग. क्षोदन्त्युडुखले ।
९९ ख, ग. प्रपिष्यन्ते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पृष्ठेनानीय[१००] जङ्घे द्वे विन्यस्ते स्कन्धयोर्द्वयोः ।
तयोर्मध्येन चाकृष्य[१०१] बाहुपृष्ठेन गाढतः ।।१७०।।

आफ्ना पापहरूले गर्दा नै मानिसहरू बिर्को लगाईएको फलामको ताउलोमा हालिन्छन् र सुस्त सुस्त सानो आगोमा पकाइन्छन् ।१६६।

घोर ओखलमा कुटिन्छन् र जाँतोमा पिसिन्छन् । गहिरो कुवामा फालिन्छन् र अरिङ्गालद्वारा टोकाइन्छन् ।१६७।

त्यसपछि कीराहरूले टोकाइएकाले सबै अङ्ग विदीर्ण भएका सयौं तरिकाले छिया छिया पारिएका मानिसहरू अत्यन्त तीखा काँचका कुवाहरूमा फालिन्छन् ।१६८।

अग्नि दन्किरहेको नरकमा निरन्तर आगाको ज्वालाले दन्किरहेका पापीहरू जोर जोरसँग फू फू गर्दै यताउता दौडन्छन् ।१६९।

दुईवटै जाँघलाई पछाडिबाट ल्याएर दुईवटै काँधमा राखेर बलपूर्वक ल्याएर हातको पछाडिबाट बाँधिन्छन् ।१७०।

बद्धाः परस्परं सर्वे सुदृढं पापरज्जुभिः ।
पिण्डबन्धं दशन्त्येनं भ्रमरास्तीक्ष्णलोहजाः ।।१७१।।

मानिनां क्रोधिनाञ्चैव तस्कराणाञ्च दारुणाः ।
पिण्डबन्धः स्मृतो याम्यो महाज्वाले च यातना ।।१७२।।

रज्जुभिर्वेष्टिताङ्गाश्च प्रलिप्ताः कर्दमेन च ।
करीषतुषवह्नौ च पच्यन्ते न म्रियन्ति च ।।१७३।।

सुतीक्ष्णक्षारतोयेन कर्कशासु शिलासु च ।
आपापसंक्षयात्पापा घृष्यन्ते चन्दनं यथा ।।१७४।।

शरीराभ्यन्तरगतैः प्रभूतैः कृमिभिर्नराः ।
भक्ष्यन्ते तीक्ष्णवदनैरादेहप्रक्षयाद् भृशम् ।।१७५।।

यसरी पापरूपी डोरीले परस्पर बाँधिएका र यौटै डल्लो जस्तो बनाइएका पापी मानिसहरूलाई तीखो फलामले बनेका अरिङ्गालहरूले डस्दछन् ।१७१।

अहङ्कारी, रिसाहा र चोरहरूलाई कठोर एउटै डल्लो जस्तो बनाइएको स्थितिमा यमराजद्वारा निर्दिष्ट महाज्वालनामक नरकमा यातना दिइन्छ ।१७२।

डोरीले शरीर लपेटिएका हिलोले लिपिएका पापीहरू गुइँठा र भुसको आगोमा पकाइन्छन् तर पापवश मर्दैनन् १७३।

---

१०० ग. निनीय ।
१०१ ग. वा कृष्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अत्यन्त नूनीलो पानीले कठोर ढुङ्गाहरूमा पाप नसकिँदासम्म चन्दन घोटेझैं पापीहरू घोटिइरहन्छन् ।१७४।

शरीरभित्र पसेका तीखो मुख भएका धेरै कीराहरूद्वारा शरीर नसकिँदासम्म खूब खुवाइन्छन् ।१७५।

कृमीनां निचये[१०२] क्षिप्ताः पूतिमांसस्य[१०३] राशिषु ।
तिष्ठन्त्युद्विग्नहृदयाः पर्वताभ्याञ्च पीडिताः ॥१७६॥

सुतप्तवज्रलेपेन शरीरमनुलिप्यते ।
अधोमुखोर्ध्वपादाश्च धृतास्ताप्यन्ति वह्निना ॥१७७॥

वदनान्तः प्रविन्यस्तं सुतप्तं लोहजं गुडम् ।
खादन्ति स्म पराधीना हन्यमानाश्च मुद्गरैः ॥१७८॥

ये शिवायतनारामवापीकूपमठाङ्गणम् ।
अभिद्रवन्ति पापिष्ठा नृपास्तत्र वसन्ति च ॥१७९॥[१०४]

व्यायामोद्वर्तनाभ्यङ्गं स्नानपानान्नभोजनम् ।
क्रीडनं मैथुनं द्यूतमाचरन्ति[१०५] रमन्ति च ॥१८०॥

दुर्गन्धि मासुको खातमा कीराहरूको बथानमा फालिएका पापीहरू यमलपर्वतबाट पेलिँदै खिन्न हृदयले युक्त भइरहन्छन् ।१७६।

धेरै तातो वज्रलेपद्वारा शरीर पोतिन्छ । तल मुख र माथितिर खुट्टा बनाएर समाइएका तिनीहरू आगोमा तपाइन्छन् ।१७७।

मुखभित्र राखिएको तातो फलामे गुड पराधीन भएर खान विवश हुन्छन् र मुंग्राहरूद्वारा हानिन्छन् ।१७८।

जुन पापी मानिसहरूले शिवमन्दिर, बगैंचा, पोखरी, कुवा, मठका प्राङ्गणहरूमा नोक्सान पुर्‍याउँछन् तिनीहरू र जुन राजाहरू त्यहाँ बस्दछन्, ती सबै पापिष्ठ हुन् ।१७९।

जुन मानिसहरू शिवालयहरूमा व्यायाम , बुकुवा घस्ने , मालिस गर्ने, स्नान, खानपान , क्रीडा, मैथुन र जुवा खेल्दछन् र रमाउँछन्, ती सबै पापिष्ठ हुन् ।१८०।

ते वधैर्विविधैर्घोरैरिक्षुयन्त्रादिपीडितैः ।
निरयाग्निषु पच्यन्ते यावदाचन्द्रतारकम् ॥१८१॥

ये श्रृण्वन्ति गुरोर्निन्दां तेषां कर्णौ प्रपूर्यतः ।
अग्निवर्णैरयःकीलैस्ततस्ताम्रादिभिर्द्रुतैः ॥१८२॥

---

१०२ ग. कृमिनाम्नि च प्र ।
१०३ ग. पूतीमान् सस्य ।
१०४ ङ. ७७ पद्यादारभ्य ७९पर्यन्तं न सन्ति ।
१०५ ग. साधरन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्रपुसीसारकूटाद्यैः क्षारेण जतुना पुनः ।
सुतप्ततीक्ष्णतैलेन वज्रलेपेन वा भृशम् ॥१८३॥

क्रमादापूर्यतः कर्णौ नरकेषु च यातनाः ।
अनुक्रमेण सर्वेषु भवन्त्यङ्गे समन्ततः ॥१८४॥

सर्वेन्द्रियाणामप्येवं क्रमात्पापेन यातनाः ।
भवन्ति घोराः प्रत्येकं शरीरे तत्कृतेन च ॥१८५॥

ती सबै पापिष्ठहरू अनेक डरलाग्दा यातनाहरू भोग्दछन्, उखु पेल्ने कोलमा पेलिन्छन् र नरकको आगोमा चन्द्र र तारा रहँदासम्म पकाइन्छन् ।१८१।

जुन मानिसहरू गुरुको निन्दा सुन्दछन्, तिनीहरूका कानहरू आगोले राता भएका फलामका किलाहरूले घोचिन्छन् र त्यसपछि पगालिएको तामा, राङ आदिद्वारा भरिन्छन् ।१८२।

राङ, सिसा, पित्तल, अन्य धातुहरू, लाहहरू, तताइएको तेल र वज्रलेपद्वारा कानहरू भरिन्छन् ।१८३।

यसरी तातेको सिसा आदिले पापिष्ठका कानहरू र सबै नरकहरूमा दिइने यातनाहरूमा सबै अङ्गहरूमा सबैतिर लेप गरिन्छ ।१८४।

उसले गरेको पापका कारण शरीरका प्रत्येक इन्द्रियहरूमा यस्तै किसिमका डरलाग्दा यातनाहरू दिइन्छन् ।१८५।

स्पर्शलोभेन ये मूढाः संस्पृशन्ति परस्त्रियम् ।
तेषामग्निसुवर्णाभिः सूचीभिः युज्यते[१०६] भृशम् ॥१८६॥

ततः क्षारादिभिः सर्वैः शरीरमनुलिप्यते ।
यातनाश्च महाकष्टाः सर्वेषु नरकेषु च ॥१८७॥

गुरोः कुर्वन्ति भृकुटिं क्रूरं चक्षुश्च ये नराः ।
परदारांश्च पश्यन्ति लुब्धा स्निग्धेन चक्षुषा ॥१८८॥

सूचीभिरग्निवर्णाभिस्तेषां नेत्रे प्रपूर्यतः[१०७] ।
क्षाराद्यैश्च क्रमात्सर्वदेहे सर्वाश्च यातनाः ॥ १८९॥

देवाग्निगुरुविप्राणामनिवेद्य प्रभुञ्जते ।
लोहकीलशतैस्तप्तैर्जिह्वा चास्य प्रपूर्यते[१०८] ॥१९०॥

---

१०६ ख घ . पूर्यते । ग. पूज्यते ।
१०७ ग. नेत्रेषु पूर्यतः ।
१०८ ग. प्रसूर्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्पर्शको लोभले जुन मूर्खहरूले परस्त्रीको स्पर्श गर्दछन्, तिनीहरूलाई आगोमा तताएर राता भएका सियाहरू रोपिन्छन् ।१८६।

त्यसपछि सिसा, राङ आदि पगालिएका झोलहरूले लिपिन्छ । यसै गरी सबै नरकहरूमा डरलाग्दा अत्यधिक कष्टहरू र यातनाहरू दिइन्छन् ।१८७।

जुन मानिसहरू भृकुटि टेढो गरेर गुरुलाई आँखा देखाउँछन् अथवा परस्त्रीलाई लोभिएर प्रेमपूर्ण दृष्टिले हेर्दछन् (ती पापिष्ठ हुन्) ।१८८।

ती पापीहरूका आँखाहरू आगो जस्ता राता सियाहरूले घोचिन्छन् र क्रमैसँग सिसा आदिद्वारा सम्पूर्ण शरीरमा लेप गरेर सबै यातनाहरू दिइन्छन् ।१८९।

जसले देवता, अग्नि, गुरु र ब्राह्मणलाई नचढाएर खाना खान्छ, त्यसको जिब्रो तातेका सयौं फलामका किलाहरूले घोचिन्छ । १९०।

ततः क्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् ।
शरीरे च[१०९] महाघोराश्चित्रा नरकयातनाः ॥१९१॥

ये शिवारामपुष्पाणि लोभात् सङ्गृह्य पाणिना ।
जिघ्रन्ति मूढमनसः शिरसा धारयन्ति वा ॥१९२॥

आपूर्यते शिरस्तेषां सुतप्तैर्लोहशङ्कुभिः ।
नासिका चातिबहुशस्ततः क्षारादिभिः पुनः ॥१९३॥

ये निन्दन्ति महात्मानमाचार्यन्धर्मदेशकम् ।
शिवभक्तांश्च सम्मूढाः शिवधर्मञ्च शाश्वतम् ॥१९४॥

तेषामुरसि कण्ठे च जिह्वायां हनुसन्धिषु ।
तालुन्योष्ठे च नासायां मूर्ध्नि सर्वाङ्गसन्धिषु ॥१९५॥

अग्निवर्णाः सुतप्ताश्च त्रिशिखा लोहशङ्कवः ।
आकोट्यन्ते सुबहुशः स्थानस्थानेषु मुद्गरैः ॥१९६॥

ततः क्षारेण तप्तेन ताम्रेण त्रपुणा पुनः ।
तप्ततैलादिभिः सर्वैरापूर्यन्ते समन्ततः ॥१९७॥

त्यसपछि पगालिएको सिसा, तामा आदि र तातेको तेल आदिले क्रमैसँग डरलाग्दा अचम्मका नारकीय यातनाहरू दिइन्छ ।१९१।

जुन मानिसहरू शिवाश्रमको बगैंचाका फूलहरूलाई लोभिएर हातले टिप्छन् र मूर्खतावश सुँघ्छन् र टाउकामा लगाउँछन् ती पापीहरूको टाउकोमा आगाले तातेका फलामका किलाहरू ठोकिन्छन् र नाकमा अत्यधिक मात्रामा सिसा आदिका ताता झोलहरू राखिन्छन् ।१९२-१९३।

---

१०९ ग. शरीरेण ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जुन मूर्ख मानिसहरूले धर्मको उपदेश गर्ने महात्मा, आचार्य, शिवभक्तहरू र शाश्वत शिवधर्मको निन्दा गर्दछन्, तिनीहरूका छाती, गला, जिब्रो, चिउँडोका जोर्नीहरू, तालु, ओठ, नाक, शिर र सबै अङ्गहरूका जोर्नीहरूमा तातेर आगो जस्तै राता भएका तीनवटा टुप्पोसितका फलामका किलाहरू धेरै ठाउँमा मुंग्राहरूद्वारा ठोकिन्छन् ।१९४-१९६।

त्यसपछि पगालेका सिसा, तामा र राङहरू तथा तातेका तेल आदिहरू हालिन्छन् ।१९७।

यातनाश्च महाचित्राः शरीरस्यापि सर्वतः ।
निःशेषनरकेष्वेवं भवन्ति क्रमशः पुनः ॥१९८॥

ये गृह्णन्ति परद्रव्यं पादैर्विप्रं स्पृशन्ति च ।
शिवोपकरणं[११०] गां च ज्ञानं च लिखितं क्वचित् ॥१९९॥

हस्तपादा घनैस्तेषामापूर्यन्ते समन्ततः ।
क्षारताम्रादिभिर्दीप्तैर्दह्यन्ते बहुशः पुनः ॥२००॥

नरकेषु च सर्वेषु विचित्रा देहयातनाः ।
भवन्ति बहुशः कष्टाः पाणिपादसमुद्भवाः ॥२०१॥

शिवायतनपर्यन्ते शिवारामे च कुत्रचित् ।
समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव वा ॥२०२॥

तेषां शिश्नं सवृषणं चूर्ण्यते लोहमुद्गरैः ।
सूचीभिरग्निवर्णाभिः स पश्चात्पूर्यते पुनः ॥२०३॥

यसरी अनेक प्रकारका शरीरका सबैतिरबाट सम्पूर्ण नरकहरूमा क्रमैसँग विचित्रका यातनाहरू हुने गर्दछन् ।१९८।

जसले अर्काको धन हरण गर्दछन्, जसले खुट्टाले ब्राह्मणलाई, शिवका सामग्रीहरूलाई, गाईलाई, लेखिएको शिवज्ञानको पुस्तकलाई कुल्चिन्छन् तिनीहरूका हात पाउहरू चारैतिरबाट घनले हिर्काइन्छन् र सिसा, तामा आदिको तातो झोलले धेरै पटक पोलिन्छन् ।१९९-२००।

सबै नरकहरूमा विचित्रका शारीरिक यातनाहरू र हात खुट्टा आदिमा हुने धेरै कष्टहरू दिइने गर्दछन् ।२०१।

शिवाश्रमको परिसरको छेउछाउमा, त्यहाँको बगैंचाको कुनै भागमा पनि जुन मानिसहरूले मलमूत्र त्याग गर्दछन्, तिनीहरूलाई अण्डकोशसहित लिङ्ग फलामे मुग्राहरूले धुलो पीठो पारिन्छ र त्यसपछि आगोले राता भएका सियोहरूले घोचिन्छ ।२०२-२०३।

लोहदण्डश्च सुमहानग्निवर्णः सकण्टकः ।
आकोट्यन्ते गुदे तेषां यावन्मूर्ध्नि विनिर्गतः ॥२०४॥

---

११० ग. शिवोपकारिणीम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः क्षारेण महता ताम्रेण त्रपुणा पुनः ।
द्रुतेनापूर्यते गाढं गुदं शिश्नं च देहिनाम् ॥२०५॥

मनः सर्वेन्द्रियाणाञ्च यस्मादुक्तं प्रवर्तकम् ।
तस्मादिन्द्रियदुःखेन जायते तत्सुदुःखितम् ॥२०६॥

धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया ।
अतिथिञ्चावमन्यन्ते काले प्राप्ते गृहाश्रमे ॥२०७॥

ते लोहतोरणे रज्ज्वा हस्तपादावतारिताः ।
विस्तारिताङ्गाः शुष्यन्ते तिष्ठन्त्यब्दशतन्नराः ॥२०८॥

हस्तपादललाटेषु कीलिता लोहशङ्कुभिः ।
नित्यं च विवृतं वक्त्रं कीलकद्वयताडितम् ॥२०९॥

आगाले तातेको काँडै काँडा भएको लामो फलामको लौरो गुदद्वारबाट टाउकोबाट ननिस्कँदासम्म ठोकिन्छ ।२०४।

त्यसपछि शिवालय परिसर आदिमा मलमूत्र त्याग गर्ने मानिसहरूको गुदद्वार र लिङ्गमा पगालिएको धेरै तातो सिसा, तामा र राङले भरिन्छ ।२०५।

मन सबै इन्द्रियहरूको प्रवर्तक हो भनिन्छ । त्यसैले इन्द्रियहरूमा हुने पीडाले मन पनि अत्यन्त पीडित हुन्छ ।१०६।

धन हुँदा हुँदै पनि तिर्सनाका कारण दान गर्दैनन् र यथा समय गृहस्थाश्रममा आएका अतिथिहरूको अपमान गर्दछन् तिनीहरूको फलामे तोरणमा डोरीले हातखुट्टा बाँधेर शरीरहरू तन्काइन्छ र सय वर्षसम्म त्यहीं सुकाइन्छ ।२०७- २०८ ।

हात खुट्टा र निधारहरूमा फलामका किला ठोकिन्छन् र दुईवटा किलामा अड्काइएको मुख सधैं खुला रहन्छ ।२०९।

कृमिभिः प्राणिभिश्चोग्रैर्लोहदण्डैश्च वायसैः ।
उपद्रवैर्बहुविधैर्मुखमन्तः प्रपीड्यते ॥२१०॥

जिह्वावेधः प्रवद्धश्च[१११] गाढं श्रृङ्खलया पुनः ।
तिष्ठते लम्बमानस्तु[११२] लोहभारः सुवर्तुलः ॥२११॥

शिश्ने सवृषणे बद्धं लोहभारद्वयं पुनः ।

---

१११ क, घ. प्रबर्द्धश्च । ग. प्रवृद्धाश्च ।
११२ ग. लम्वमानश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तिष्ठते लम्बमानस्तु[११३] बाहुभ्याञ्च चतुर्गुणम्[११४] ॥२१२॥

ततः स्वमांसमुत्कृत्य तिलमात्रप्रमाणतः[११५] ।
खादितुं दीयते तेषां सूच्यग्रेण तु शोणितम् ॥२१३॥

यदा निर्मांसतां प्राप्ताः कालेन बहुना नराः ।
ततः क्षारेण दीप्तेन तच्छरीरं विलिप्यते ॥२१४॥

कीराहरू, उग्रप्राणीहरू, फलामको जस्तो चुच्चो भएका कौवाहरू र यस्तै प्रकारका धेरै किसिमका उपद्रवहरूद्वारा मुखभित्र पीडा दिइन्छ ।२१०।

जिब्रो छेडेर त्यसमा बलियोसँग फलामे साङ्लाले बाँधिएको बाटुलो फलामको भारी झुण्ड्याएर राखिन्छ ।२११।

अण्डकोशसहित लिङ्गमा दुईवटा फलामका भारी झुण्ड्याइन्छन् र हातहरूमा त्यसको चार गुणा बढी फलामको भारी झुण्ड्याएर राखिन्छ ।२१२ ।

त्यस पछि तिलको दाना बराबर आफ्नै मासु कोट्याएर खुवाइन्छ र सियोको टुप्पो चोपेर आफ्नै रगत चटाइन्छ । २१३।

त्यसरी जबसम्म उसका शरीरको रगत र मासु सकिँदैन तबसम्म खुवाइन्छ। त्यस पछि शरीरमा पगालिएको तातो सिसाको लेप लगाइन्छ ।२१४ ।

क्लेद्यते बर्षधाराभिः शोष्यते वायुना पुनः ।
शुष्कं सिच्येत तैलेन सुतप्तेन समन्ततः ॥२१५॥

पच्यन्ते वह्निना भूयो दुरस्थेन शनैः शनैः ।
निःशेषयातनाभिश्च पीड्यन्ते क्रमशः पुनः ॥२१६॥

भृशं बुभुक्षया पीडा कष्टञ्चातिपिपासया ।
नात्युष्णेनातिशीतेन पापानां स्मरणेन च ॥२१७॥

एवमाद्या महाघोरा यातनाः पापकारिणाम्[११६] ।
एकैके नरके ज्ञेयाः शतशोऽथ सहस्रशः ॥२१८॥

प्रत्येकं यातनाश्चित्राः सर्वेषु नरकेषु याः ।
कस्ता वर्षशतेनापि सर्वा वक्तुं समुत्सहेत् ॥२१९॥

---

११३ ग. लम्बमानश्च ।

११४ ग. बाहुभ्यासश्चतुर्गुणम् ।

११५ ग. प्रमाणकः ।

११६ ख, ग. पापकर्मणाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वर्षाको पानीले भिजाइन्छ र पुनः हवाद्वारा सुकाइन्छ। सुकेपछि चारै तरबाट तातो तेल खन्याइन्छ।२१५।

टाढा बालिइएको आगाको रापमा सुस्तरी पकाइएपछि क्रमैसँग नरकहरूमा दिइने सबै यातनाहरूद्वारा पीडा दिइन्छ।२१६।

अत्यधिक भोकले पीडा हुन्छ, अत्यन्त तिर्खाले त्यस्तै कष्ट पाइन्छ। न जाडो भनिन्छ, न घाम भनिन्छ। त्यसमा पनि आफूले गरेका पापहरूको सम्झनाले त्यत्ति नै कष्ट हुन्छ।२१७।

एवं प्रकार पापकर्महरूका अत्यन्त डरलाग्दा यातनाहरू हुने गर्दछन्। एउटा एउटा नरकमा सयौं हजारौं यातनाहरू हुन्छन्। २१८।

सम्पूर्ण नरकहरू प्रत्येकमा भिन्न भिन्न खालका जुन यातनाहरू छन्, तिनलाई सयवर्ष लगाउँदा पनि कसले सबै भन्न सक्दछ र ?२१९।

इति चित्रैर्वधैर्घोरैर्पात्यमानाः स्वकर्मभिः ।
म्रियन्ते नैव पापिष्ठा यावत् पापस्य न क्षयः ॥२२०॥

तत्रत्या यातनाः कष्टा विविधा पापकारिणाम्[११७] ।
महाघोरातिघोराख्याः कल्पाग्निसदृशोपमा ॥२२१॥

श्रुत्वैव पापसम्पूर्णा म्रियन्ते मृदुचेतसः ।
ततस्ता नात्र कथिताः पापाः पश्यन्ति ताः स्वयम् ॥२२२॥

पुत्रमित्रकलत्रार्थं यदपुण्यं कृतं त्वया ।
एकाकी दह्यसे तेन नात्र पश्यसि तानि च ॥२२३॥

आत्मनैव कृतं पापं भोक्तव्यं ध्रुवमात्मना ।
तत्किमात्मोपघातार्थं मूढ पापं कृतं त्वया ॥२२४॥

यसरी आफ्ना कर्महरूले गर्दा विचित्रका भयङ्कर यातनाहरूद्वारा पछारिएता पनि पापिष्ठहरू पाप नसकिँदासम्म मर्दैनन्।२२०।

त्यहाँ पापीहरूका लागि अनेक किसिमका कष्टपूर्ण यातनाहरू दिइन्छन्। महाघोर र अतिघोर नाम गरेका प्रलयकालको आगो जस्ता यातनाहरू छन्।२२१।

कोमल मन भएका मानिसहरू ती सम्पूर्ण पापका यातनाहरूलाई सुनेरै पनि मरिहाल्छन्। त्यसकारण ती सबैको यहाँ वर्णन गरिएन। पापीहरूले आफै तिनीहरूलाई देख्छन् वा भोग्छन्।२२२।

छोराहरू, साथीहरू र पत्नीका लागि तिमीले जो पाप गरेका थियौ, अब त्यस पापले एक्लै जलिरहेका छौ। ती पुत्र, मित्र र पत्नीहरूलाई देख्दैनौ।२२३।

आफूले गरेका पापहरूलाई आफैले निश्चित रूपमा भोग्नु पर्दछ। त्यसैले आफ्नै विनाशका लागि तिमीले पाप किन गर्‍यौ।२२४।

११७ ग. पापकारिणीः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवं दूतै[११८]रुपालब्धास्ते पृच्छन्ति ततः पुनः ।
कियन्तं केन पापेन कालमत्रासते नराः ॥२२५॥

देवद्रव्यविनाशेन गुरुद्रोहादिकर्मभिः ।
क्रमात्पापेषु पच्यन्ते नरकेष्वामहीक्षयात् ॥२२६॥

महापातकिनश्चापि सर्वेषु नरकेष्विह ।
आचन्द्रतारकं यावत्पीड्यन्ते विविधैर्वधैः ॥२२७॥

तथा पातकिनः सर्वे निरयार्णवकोटिषु ।
चतुर्दशसु पच्यन्ते कल्पान्तं विविधैर्वधैः ॥२२८॥

उपपातकिनश्चापि तदर्द्धं यान्ति मानवाः ।
शेषैः पापैस्तदर्द्धं च कालञ्चापि तथाविधम् ॥२२९॥

तस्मात्पापं न कुर्वीत चञ्चले जीविते सति ।
पापेन हि ध्रुवं यान्ति नरकेषु नरः स्वयम् ॥२३०॥

यसरी यमदूतहरूद्वारा गुनासो गरिएका पापीहरूले यमदूतहरूलाई सोध्छन् - हे यमदूत हो, कुन पापले गर्दा मानिसहरूलाई कति समयसम्म यहाँ बस्नु पर्दछ ?२२५।

यमदूतहरू भन्छन् - देवद्रव्यको हिनामिना तथा गुरुद्रोह आदि कर्महरूद्वारा पृथ्वी रहँदासम्म क्रमैसँग पापीहरू पापपूर्ण नरकहरूमा यातना भोग्छन् ।२२६।

महापातकीहरू यहाँका सबै नरकहरूमा चन्द्रतारा रहँदासम्म अनेक किसिमका यातनाहरूद्वारा पीडा भोग्दछन् ।२२७।

त्यसै गरी सबै पातकीहरू नरकरूपी सागरका चौध कोटीहरूमा सृष्टि रहँदासम्म विविध यातनाहरूले कष्ट पाउँदछन् ।२२८।

उपपातकी मानवहरू पनि त्यसको आधा समयसम्म नरकहरूसम्म पीडा भोग्छन् भने शेष पापहरूका लागि पनि त्यसको पनि आधा समयसम्म नरकको पीडा भोग्छन् ।२२९।

यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः ।
पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना ॥२३१॥

कथन्ते पापनिरताः सुखं रात्रिषु शेरते ।
मरणान्तरिता येषां नरके तीव्रयातनाः ॥२३२॥

एवं क्लिष्टा विशुद्धाश्च सावशेषेण कर्मणा ।
ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः ॥२३३॥

---

११८ ग. दूनै ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्थावरा विविधाकारास्तृणगुल्मादिभेदतः ।
तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु ॥२३४॥

निष्क्रान्ताः कीटयोनिभ्यः पुनर्जायन्ति पक्षिणः ।
संक्लिष्टाः पक्षिभावेन भवन्ति मृगजातिषु ॥२३५॥

त्यसैले जीवन अस्थिर भएकाले पाप गर्नु हुँदैन, किनभने पाप गर्नाले मानिसहरू निश्चित रूपमा आफै नरकहरूमा जान्छन् ।२३०।

जसले पाप गर्दछ त्यो आफैमा निश्चयानै अप्रिय हुन्छ, पापको फल दुःख हो र त्यो दुःख आफैले भोग्नु पर्दछ ।२३१।

कसरी तिनीहरू पापमग्न भएर राति आनन्दले निदाउँछन् । जसले मृत्यु उपरान्त नरकमा तीव्र यातना भोग्नु निश्चित छ ।२३२।

यसरी क्लेशहरूद्वारा चोखिएका प्राणीहरू बचेको कर्मका कारण पुनः पृथ्वीमा जन्म लिन्छन् ।२३३।

अनेक किसिमका घाँस, गुल्म आदि स्थावर योनिमा जन्म लिएर अनेक दुःखहरू सहेर अनेक कीट योनिमा जन्मन पुग्दछन् ।२३४।

कीराहरूको जुनीबाट निस्केर पक्षीहरूको जुनीमा जन्मिन्छन् र त्यस जुनीमा भोग्ने दुःखहरू भोगेपछी मृगको जुनीमा जन्मिन्छन् ।२३५।

मार्गन्दुःखमतिक्रम्य जायन्ते पशुयोनिषु ।
क्रमाद् गोयोनिमासाद्य पुनर्जायन्ति मानुषाः ॥ २३६॥

एवं योनिषु सर्वासु परिभ्राम्य क्रमेण तु ।
कालान्तरवशाद्यान्ति मानुष्यमतिदुर्लभम् ॥२३७॥

व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् ।
विचित्रा गतयः प्रोक्ता धर्माणां गुरुलाघवात् ॥२३८॥

मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम् ।
द्वयोर्न साधयेदेकं स मृतस्तप्यते चिरम् ॥२३९॥

देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम् ।
तत्सम्प्राप्य तथा कुर्यान्न गच्छेन्नरकं यथा ॥२४०॥

मृगको जुनीमा भोग्ने दुःख भोगेपछि पुनः पशुयोनिमा जन्म हुन्छ र त्यसमा पनि अनेक पशुको रूपमा जन्म हुँदै अन्तमा गोयोनि प्राप्त हुन्छ र त्यसपछि मनुष्य जुनीमा जन्म हुन्छ ।२२६।

यसरी सम्पूर्ण जुनीहरूमा क्रमैसँग जन्मिसकेपछि धेरै लामो समयपछि अत्यन्त दुर्लभ मनुष्ययोनि प्राप्त हुने गर्दछ ।२३७।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धेरै पुण्य गरेको अवस्थामा क्रमभङ्ग गरेरै भए पनि पहिल्यै मनुष्य जुनी प्राप्त हुन सक्दछ। धर्महरूको आधिक्य र न्यूनताका कारणहरूले गर्दा जुनी फेर्ने बाटाहरू पनि फरक फरक हुने गर्दछन्।२३८।

जसले स्वर्ग र मोक्ष प्रदान गर्न सक्ने मान्छेको जुनी पाएर पनि दुईटा मध्ये एउटालाई पनि सिद्धगर्न सक्दैन त्यो मरे पछि लामो समयसम्म दुःख भोग्दछ।२३९।

सुर तथा असुर आदि सबैका लागि मनुष्य जुनी अत्यन्त दुर्लभ छ। अतः त्यो पाए पछि नरक जान नपर्ने उपाय गर्नु पर्दछ।२४०।

स्वर्गापवर्गलाभाय यदि नास्ति समुद्यतः[११९]।
सर्वस्य मूलं मानुष्यन्तद्यत्ना[१२०]दनुपालयेत्॥२४१॥

धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम्।
यदि लाभे न यत्नस्ते मूलं रक्षस्व यत्नतः॥२४२॥

मनुष्यत्वे च विप्रत्वं यः प्राप्यातिसुदुर्लभम्।
न करोत्यात्मनः श्रेयः कोऽन्यस्तस्मादचेतनः॥२४३॥

सर्वेषामेव देशानामयं देशः परः स्मृतः।
ततः स्वर्गश्च मोक्षश्च यतः सम्प्राप्यते नरैः॥२४४॥

देशेऽस्मिन् भारते पुण्ये[१२१] प्राप्य मानुष्यमध्रुवम्।
न करोत्यात्मनः श्रेयस्तेनात्मा वञ्चितश्चिरम्॥२४५॥

स्वर्ग तथा मोक्ष प्राप्तिका लागि यदि मनुष्य तयार छैन भने पनि सबैको मूलमा मनुष्य योनि रहेकाले यत्नपूर्वक मनुष्ययोनि पाउन प्रयत्न गरोस्।२४१।

धर्मको माध्यमबाट सम्पूर्ण पुरुषार्थ सिद्ध गर्ने मनुष्य योनि पाएर स्वर्ग र मोक्ष प्राप्त गर्नमा तिम्रो यत्न छैन भने पनि धर्मरूप मूलको रक्षा यत्नपूर्वक गर्नु पर्दछ।२४२।

मान्छेको जुनीमा पनि अत्यन्त दुर्लभ ब्राह्मणत्व पाएर जसले आफ्नो कल्याण गर्दैन, त्यसभन्दा अर्को मूर्ख अरू को हुन सक्दछ।२४३।

सबै देशहरूमा यो देश सर्वाधिक महत्त्वपूर्ण मानिएको छ किनभने यसबाट नै मनुष्यहरूले स्वर्ग र मोक्ष पाउन सक्दछन्।२४४।

यस पुण्यशाली भारतखण्डमा अनिश्चित मनुष्यको जन्म पाएर पनि जसले आफ्नो कल्याण गर्दैन, त्यसले आफूलाई लामो समयसम्मका लागि ठग्दछ।२४५।

भोगभूमिः स्मृतः स्वर्गः कर्मभूमिरियं स्मृता।

---

११९ ख, ङ. समुद्यतः।
१२० ग. यस्मात्।
१२१ ग. वर्षे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
इह यत् क्रियते कर्म स्वर्गे तदुपभुज्यते[१२२] ॥२४६॥

यावत् स्वस्थं शरीरं स्वं तावद् धर्मं समाचरेत् ।
अस्वस्थश्चोदितोऽप्यन्यैर्न किञ्चित् कर्तुमुत्सहेत् ॥२४७॥

अध्रुवेण शरीरेण न ध्रुवं यः प्रसाधयेत् ।
ध्रुवन्तस्य परिभ्रष्टमध्रुवन्नष्टमेव तत् ॥२४८॥

आयुषः खण्डखण्डानि निपतन्ति तवाग्रतः ।
अहोरात्र्याऽपदेशेन किमर्थं नावबुध्यसे ॥२४९॥

यदा न ज्ञायते मृत्युः कदा कस्य भविष्यति ।
आकस्मिके हि मरणे धृतिं विन्देत कस्तदा ॥२५०॥

स्वर्ग भोगभूमि भनिएको छ भने यो कर्मभूमि हो, यहाँ जे काम गरिन्छ, त्यसको फल स्वर्गमा उपभोग गर्न पाइन्छ ।२४६।

जबसम्म यो शरीर स्वस्थ छ, तबसम्म धर्म आर्जन गर्नु पर्दछ । अस्वस्थ भैसकेपछि अरूले प्रेरणा दिँदा पनि केही गर्न सकिँदैन ।२४७।

अनिश्चित शरीरद्वारा जसले निश्चित स्वर्ग, मोक्ष आदिलाई साट्न सक्दैन त्यसका लागि निश्चित तत्त्व पनि हातबाट जान्छ र अनिश्चित त सकिन्छ नै ।२४८।

आयुका टुक्रा टुक्रा भएर दिन रातको निहुँबाट तिम्रा अगाडि खसिरहेका छन् । हे मानिस ! तिमीले किन बुझ्दैनौ ।२४९।

जब कसको कहिले मृत्यु हुन्छ भनेर थाहा पाइँदैन, त्यो आकस्मिक मृत्युको स्थितिमा कसले धैर्य गर्न सक्दछ र ।२५०।

परित्यज्य यदा सर्वमेकाकी यास्यसे ध्रुवम् ।
न ददासि तदा कस्मात् पाथेयार्थमिदन्धनम् ॥२५१॥

गृहीतदानपाथेयाः सुखं यान्ति महाध्वनि ।
अन्यथा क्लिश्यते जन्तुः पाथेयरहिते पथि ॥२५२॥

येषा[१२३] द्विजेन्द्र[१२४]वाहित्री पूर्णा भाण्डस्य गच्छति ।
स्वर्गदेशस्य पुरतस्तेषां लाभः पदे पदे ॥२५३॥

इति ज्ञात्वा नरः पुण्यं कुर्यात्पापं विवर्जयेत् ।

---

१२२ ग. भुज्यताम् ।
१२३ ख. यया ।
१२४ ग. सुपात्र ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
पुण्येन याति देवत्वमधर्मान्नरकं व्रजेत् ।। २५४।।

ये मनागपि देवेशं प्रपन्नाः शरणं शिवम् ।
तेऽपि घोरं न पश्यन्ति यमस्य वदनं नराः ।।२५५।।

सबै त्यागेर जब निश्चित रूपमा एक्लै जानु पर्ने छ तब यो सम्पत्तिलाई बाटाको सामल बनाउनका लागि किन दिँदैनौ ।२५१।

बाटोमा खानका लागि सामल लिएका मानिसहरू महामार्गमा सजिलैसँग जाने गर्दछन् । अन्यथा सामल नभएको प्राणी बाटामा अत्यन्त कष्ट पाउँदछ ।२५२।

जुन मानिसहरूको ब्राह्मणले वहन गरेको पूर्ण दानपात्र अगाडि जान्छ, तिनीहरूलाई स्वर्गमा ठाउँ ठाउँमा लाभ हुन्छ ।२५३।

यो सबै कुरा जानेर मानिसले धर्म गर्नु पर्दछ र पापलाई त्याग्नु पर्दछ । धर्मले देवत्व पाइन्छ भने पाप गर्नाले नरक जानु पर्छ ।२५४।

जुन मानिसहरूले देवताका पनि मालिक भगवान् शिवको थोरै पनि शरण प्राप्त गर्दछन् तिनीहरूले यमराजको डरलाग्दो मुख हेर्नु पर्दैन ।२५५।

किन्तु पापैर्महाघोरैः कञ्चित्कालं शिवाज्ञया[१२५] ।
भवन्ति प्रेतराजान[१२६]स्ततो यान्ति शिवं पदम् ।।२५६।।

ये पुनः सर्वभावेन प्रतिपन्ना महेश्वरम् ।
न ते लिप्यन्ति पापेन पद्मपत्रमिवाम्भसा ।।२५७।।

तस्माद्विवर्द्धयेद् भक्तिमीश्वरे सततं बुधः ।
तन्माहात्म्यविचारेण भवदोषविरागतः ।।२५८।।

इति श्री शिवधर्मोत्तरे पापगतिविशेषो नाम सप्तमोऽध्यायः ।

किन्तु महाघोर पाप गरेको भएता पनि जुन मानिसहरूले शिवको थोरै पनि शरण प्राप्त गर्दछन्, तिनीहरू शिवको आज्ञाले केही समय प्रेतराज भएर त्यसपछि शिवपदलाई प्राप्त गर्दछन् ।२५६।

जुन मानिसहरू सबै भावनाहरूद्वारा महेश्वरको शरणमा जान्छन्, तिनीहरू कमलको पात पानीबाट ओभानो रहेझैं पापबाट लिप्त हुँदैनन् ।२५७।

त्यसैले विद्वान्ले भगवान् शिवको माहात्म्यको चिन्ता र संसारका दोषहरूबाट विरक्त भएर भगवान् शिवमा भक्ति बढाओस् ।२५८।

यसरी शिवधर्मोत्तरमा पापगति नाम गरेको सातौं अध्याय समाप्त भयो ।

---

१२५ ग. शिवेच्छया ।
१२६ ग. प्रीतमनस ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ शिवधर्मोत्तरे संसारगतिर्नामाष्टमोऽध्यायः

अथ नारकिणां पुंसामधर्मादेव केवलात् ।

क्षणमात्रेण भूतेभ्यः शरीरमुपजायते ॥१॥

तद्वद्धर्मेण चैकेन देवानामौपपातिकम्[१] ।
सद्यः प्रजायते दिव्यं शरीरं भूतसारतः ॥२॥

कर्मणा व्यतिमिश्रेण यच्छरीरमिहात्मनः ।
तद्भूतपरिणामेन विज्ञेयं हि चतुर्विधम् ॥३॥

उद्भिजाः स्थावरा ज्ञेयास्तृणगुल्मादिरूपतः[२] ।
कृमिकीटपतङ्गाद्याः स्वेदजा नाम देहिनः ॥४॥

अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याः सकच्छपाः ।
जरायुजाश्च विज्ञेया मानुषाः सचतुष्पदाः ॥५॥

अब शिवधर्मोत्तरमा संसारगति नाम गरेको आठौं अध्याय प्रारम्भ हुन्छ ।

केवल अधर्मबाट नरकमा जाने मनुष्यहरूको एकछिनमै पञ्चभूतहरूभन्दा भिन्न प्रेत शरीर बन्दछ ।१।

त्यसैगरी केवल धर्ममात्रले पाञ्चभौतिक शरीरबाट तत्काल दैविक दिव्य लिङ्गशरीर बन्दछ ।२।

धर्माधर्म मिश्रकर्मद्वारा जीवात्माको जुन भौतिक शरीर बन्दछ, त्यो उद्भिज, स्वेदज, अण्डज र जरायुज गरी चार किसिमको हुन्छ ।३।

उद्भिज स्थावर (अचल) जीवहरू हुन् । तिनीहरू घाँस, बोटबिरुवा, रूख आदिका रूपमा देखा पर्दछन् । कमिला, कीरा, पतङ्ग, जुम्रा, गड्यौला आदि स्वेदज प्राणीहरू हुन् ।४।

पक्षी, सर्प, गोही, माछा र कछुवा आदि अण्डाबाट जन्मने जीवहरू अण्डज हुन् भने मनुष्य र चौपाया गाई, भैंसी, बाखा, बादर आदि जरायुज हुन् ।५।

तत्र सिक्ता जलैर्भूमिरन्तरुष्मविपाचिता ।
वायुना व्यूह्यमाना च खे बीजत्वं प्रपद्यते ॥६॥

यथर्तुकानि बीजानि संसिक्तान्यम्भसा पुनः ।
उच्छूनतां मृदुत्वञ्च मूलभावे व्रजन्ति च ॥७॥

तन्मूलादङ्कुरोत्पत्तिरङ्कुरात्पत्रसम्भवः ।
पर्णान्नालन्ततः काण्डं काण्डाच्च प्रसवः पुनः ॥८॥

---

१ क, घ. पादुकम् ।
२ ख, ग. रूपिणः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रसवाच्च तुषं क्षीरं क्षीरात्तण्डुलसम्भवः ।
तण्डुलाश्च यदा पक्वा म्रियन्त्योषधयस्तदा ॥९॥

यवाद्याः कण[3]पर्यन्ताः श्रेष्ठाः सप्तदश स्मृताः ।
ओषध्यः फलपाकान्ताः शेषाः क्षुद्राः प्रकीर्तिताः ॥१०॥

एता लूना मर्दिताश्च शनैरुद्धृत्य संस्कृताः ।
सूर्पोलूखलयन्त्राद्यैः स्थाल्यामुदकवह्निभिः ॥११॥

त्यसमा पानीद्वारा सिञ्चित भूँइमा भित्रै भित्र गर्मीले बाफिन्छ र वायुद्वारा खालि ठाउँमा बीउ उम्रन्छ। ६।

उपयुक्त ऋतुअनुसारका बीजहरू पानीले सिञ्चाइ गरेपछि ढाडिन्छन्, कोमल हुन्छन् र आफ्नो मूल भावलाई प्राप्त गर्दछन् ।७।

त्यो मूलबाट अङ्कुर उत्पन्न हुन्छ र अङ्कुरबाट पातहरू बन्दछन् । पातबाट डाँठ र डाँठबाट काण्ड र काण्डबाट फूल लाग्दछन् ।८।

फूलबाट भुस, दूध र दूधबाट धान आदि उत्पन्न हुन्छन् । धान आदि फलहरू जब पाक्छन्, तब त्यसका बोटहरू सुक्छन् र मर्दछन् ।९।

फल पाक्दासम्म जीवित रहने ओषधिमध्ये जौदेखि जीरासम्मका सत्र सर्वश्रेष्ठ र बाँकी तुच्छ मानिन्छन् ।१०।

षड्विधाहारभेदेन परिणाम्यन्ति तद्विधैः ।
अन्योन्यरससंयोगादनेकस्वादुता[4] पुनः ॥१२॥

भक्ष्यं भोज्यञ्च पेयञ्च लेह्यञ्चोस्यञ्च पिच्छिलम् ।
इति भेदाः षडन्नस्य मधुराद्याश्च षड्गुणाः ॥१३॥

तदन्नं पिण्डकवलैर्ग्रासैर्भुक्तञ्च देहिभिः ।
अन्तः स्थूलाशये पूर्वं प्राणः स्थापयति क्रमात् ॥१४॥

आतिष्ठद्भुक्तमाहारं स वायुः कुरुते द्विधा[5] ।
सम्प्रविश्यान्नमध्ये च पृथगन्नं पृथग्जलम् ॥१५॥

अग्नेरुर्ध्वं जलं स्थाप्य तदन्नञ्च जलोपरि ।
जलस्याधः स्वयं स्थित्वा सोऽग्निर्विधमते शनैः ॥१६॥

यिनीहरू काटिएर माडिए पछि सुस्तरी निकालेर सुपाले सफा पारी ढिकी जाँतोहरूद्वारा परिष्कृत गरी कसौँडीमा पानी हालेर आगोले पकाइन्छ ।११।

---

३ क, ङ. षण । घ. पण ।

४ ग. स्वादुना ।

५ ग. आतिष्ठेद्भुक्त आहारस्तं वायुः कुरुते द्विधा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

छ किसिमका आहारहरू त्यसप्रकारले तयार गरिन्छन् । उनीहरूको एक अर्कासँगको संयोगले अनेक स्वाद बन्दछन् । १२।

भक्ष्य, भोज्य, पेय, लेह्य, चोस्य र पिच्छिल यी भोजनका छ अङ्गहरू हुन् र गुलियो, अमिलो, नुनिलो, पिरो, टर्रो र तीतो छ किसिमका भोजनका गुणहरू हुन्छन् ।१३।

त्यसरी छ किसिमको छ रसले युक्त त्यस खाद्यान्नलाई प्राणीहरूले डल्लाहरू बनाएर गास हालेर खान्छन् । प्राणवायुले ती खाएका अन्नहरूलाई क्रमैसँग स्थूलाशयभित्र राख्दछ ।१४।

खाएर भित्र रहेको त्यस आहारलाई वायुले दुई भागमा बाँड्दछ । त्यो वायुले अन्नमा प्रवेश गरेर अन्न र पानीलाई अलग अलग गर्दछ ।१५।

अग्नि (जठराग्नि) माथि जल र त्यसमाथि खाएको अन्न रहन्छ । पानीका तल रहेर अग्नि स्वयं सुस्तरी बल्न थाल्दछ ।१६।

वायुना धाम्यमानोऽग्निरत्युष्णं कुरुते जलम् ।
तदन्नमुष्णतोयेन[६] समन्तात्पच्यते पुनः ॥१७॥

द्विधा भवति तत् पक्वं पृथक्कीटं पृथग्रसः ।
मलैर्द्वादशभिः कीटं भिन्नं देहाद् बहिर्व्रजेत् ॥१८॥

कर्णाक्षिनासिकाजिह्वादन्ताः शिश्नं गुदं नखाः ।
मलाश्रयाः कफः स्वेदो विण्मूत्रे द्वादश स्मृताः ॥१९॥

हृत्पद्मे प्रतिबद्धाश्च सर्वा नाड्यः समन्ततः ।
तासां मुखेषु तत्सूक्ष्मः प्राणः स्थापयते रसम् ॥२०॥

रसेन तेन ता नाडीः[७] प्राणः पूरयते पुनः ।
प्रतर्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः ॥२१॥

शरीर भित्रको प्राण आदि वायुद्वारा अग्निको राप बढ्दछ र पानी तातिन्छ । त्यो तातो पानीले भुक्त अन्न हरप्रकारले पच्दछ । १७ ।

त्यसरी परिपाकमा पुगेको त्यो अन्न छुट्टाछुट्टै दुई भागमा बाँडिन्छ -कीट र रस । छुट्टिएको कीट बाह्र प्रकारका मलहरूका रूपमा शरीरबाट बाहिर निस्कन्छ ।११८ ।

कान, आँखा, नाक, जिब्रो, दाँत, लिङ्ग, गुद र नङ यी आठ मलाश्रयहरू तथा कफ, पसीना, दिसा र पिसाब यी चार समेत बाह्र किसिमका मल मानिएका छन् ।१९ ।

समग्र नाडीहरू हृदयकमलसँग चारैतिरबाट गाँसिएर रहेका छन् । सूक्ष्म प्राणवायुले ती नाडीहरूका मुखमा भुक्त अन्नको रसलाई स्थापित गर्दछ ।२० ।

---

६ ग.. तदन्नमुक्ततोयेन ।

७ क, ख, घ, ङ. नाड्यः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्राणवायुले त्यस रसद्वारा ती नाडीहरूलाई भर्दछ र ती नाडीहरूले त्यस रसलाई शरीरका सबै भागमा पुऱ्याउँदछन् ।२१ ।

ततः स नाडीमध्यस्थः शारीरेणोष्मणा रसः ।
पच्यते पच्यमानाच्च भवेत् पाकद्वयं पुनः ॥२२॥

त्वङ्मेदश्च[८] समन्ताच्च रुधिरञ्च प्रजायते ।
रक्ताल्लोमानि मांसञ्च केशाः स्नायुश्च मांसतः ॥२३॥

स्नायोः शिरास्तथाऽस्थीनि नखा मज्जास्थिसम्भवाः ।
मज्जातः करवैकल्यं[९] शुक्रञ्च प्रसवात्मकम् ॥२४॥

इति द्वादशधान्नस्य परिणामः प्रकीर्तितः ।
शुक्रान्तश्च ततः शुक्रादस्य देहस्य सम्भवः ॥२५॥

ऋतुकाले सदा शुक्रं निर्दोषं योनिसंस्थितम् ।
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥२६॥

विसर्गकाले शुक्रस्य जीवः कारणसंयुतः ।
वृत्त्या प्रविशते योनिं कर्मभिः स्वैर्नियोजितः ॥२७॥

त्यसपछि नाडीहरूमा रहेको रस शरीरको तातोले पुनः पाक्दछ । पाकिरहेको त्यस रसबाट पुनः दुईवटा पाक बन्दछन् ।२२।

त्यो पाकबाट चारैतिर छाला, बोसो र रगत तयार हुन्छ । रगतबाट रौं, मासु र केश बन्दछन् र मासुबाट स्नायु (ससाना नाडीहरू) बन्छन् ।२३।

स्नायुबाट शिराहरू(रक्तवातादि वाहिनी नाडी), हाड र नङहरू बन्दछन्, हाडहरूबाट मासी बन्दछ । मासीबाट कार्यसामर्थ्य र उत्पादकतायुक्त वीर्य तयार हुन्छ ।२४।

यसरी खाएको अन्नको छाला, बोशो, रगत, रौं, मासु, केश, स्नायु, शिरा, हाड, नङ, मासी र शुक्रसम्म बाह्र किसिमको परिणति मानिएको छ। शुक्रबाट नै यस शरीरको उत्पत्ति हुन्छ ।२५।

रजस्वला समयमा स्त्रीयोनि प्रविष्ट दोषरहित शुक्र वायुद्वारा स्त्रीरक्तसँग मिसिन्छ र शुक्र र स्त्रीरज एकाकार हुन पुग्दछन् ।२६।

तच्छुक्रं रक्तमेवाच्छ[१०]मेकाह्नात्कलल[११]म्भवेत् ।
पञ्चरात्रेण कललमर्बुदाकारतां[१२] व्रजेत् ॥२८॥

---

८ क. त्वङ्मेदसाम् । ग. त्वङ्मेदसम् । घ. त्वङ्मेदाश्च

९ क, ग, घ, ङ . करणवैकल्यम् ।

१० ख, ग, घ. मेकस्थ ।

११ ग. कल्कल ।

१२ ख. बुद्बुदाकारताम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अर्बुदं[१३] सप्तरात्रेण मांसपेशी समन्ततः[१४] ।
द्विसप्ताहाद् भवेत् पेशी रक्तमांसाचितादृढा ॥२९॥

बीजस्येवाङ्कुरः पेश्यां पञ्चविंशतिरात्रितः[१५] ।
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ॥३०॥

ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरम् ।
मासद्वयेन सर्वाणि क्रमशः सम्भवन्ति च ॥३१॥

त्रिभिर्मासैः प्रजायन्ते सद्द्रव्याङ्कुरसन्धयः ।
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ॥३२॥

शुक्रको विसर्जनका समयमा कारणले संयुक्त जीव आफ्ना कर्महरूद्वारा नियन्त्रित भएर योनिमा प्रवेश गर्दछ ।२७।

त्यो शुक्र स्त्रीरजसँग मिसिएपछि एकै दिनमा एकात्मक बन्दछ र पाँच दिनमा सानो मांसपिण्डको आकारमा परिणत हुन्छ ।२८।

त्यो अर्बुदाकार मांसपिण्ड सात रातमा पानीका फोका जत्रो बन्दछ र त्यसबाट मांसपेशी बन्दछ । दुई सातामा त्यो मांसपेशी रक्त र मासुले युक्त भएर बलियो बन्दछ ।२९।

बीजबाट अङ्कुर उत्पन्न भए झैं पच्चिसौं रात्रिदेखि एक महिना भित्रमा पाँचवटा तत्त्व बनिसक्दछन् ।३०।

गर्दन, टाउको, कुम, मेरुदण्ड र पेट यी पाँचवटा दुई महिनासम्ममा क्रमिकरूपमा तयार हुन्छन् ।३१।

मुखं नासा च कर्णौ च मासैर्जायन्ति पञ्चभिः ।
दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखा पुनः ॥३३॥

कर्णौ चोभयतच्छिद्रौ षण्मासाभ्यन्तरेण तु ।
पायुर्मेढ्रमुपस्थञ्च नाभिश्चाप्युपजायते ॥३४॥

सन्धयो ये च गात्रेषु मासैर्जायन्ति सप्तभिः ।
अङ्गप्रत्यङ्गसम्पूर्णः शिरः केशसमन्वितः ॥३५॥[१६]

विभक्तावयवः स्पष्टः पुनर्मासाष्टकेन च ।
पञ्चात्मकसमायुक्तः परिपक्वस्स तिष्ठति ॥३६॥

मातुराहारवीर्येण षड्विधेन रसेन तु ।
नाभिसूत्रनिबन्धेन वर्द्धते स दिने दिने ॥३७॥

---

१३ ख, ग. बुद्बुदम् ।
१४ ख, ग. भवेत्ततः ।
१५ ख. रात्रतः ।
१६ ग. ३४, ३५ पद्ये न स्तः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तीन महिनामा खाएका राम्रा द्रव्यहरूबाट रगत र जोर्नीहरू बन्दछन् भने चारमहिनामा क्रमशः हात खुट्टाका औलाहरू बन्दछन् ।३२।

पाँच महिनामा मुख, नाक र कानहरू तयार हुन्छन् भने त्यसपछि दाँत, गुह्येन्द्रिय र नङहरू तयार हुन्छन् ।३३।

छ महिनामा कानका छिद्रहरू, गुदद्वार, योनि वा लिङ्ग र नाभि बन्दछन् ।३४।

शरीरका सबै जोर्नीहरू, अङ्गप्रत्यङ्गहरू र शिरका केशहरू सात महिनामा तयार हुन्छन् ।३५।

आठ महिनामा शरीरका अङ्गहरू स्पष्ट रूपमा सबै अलग अलग देखिन्छन् र जीव पाञ्चभौतिक शरीरले युक्त र परिपक्व भएर रहन्छ ।३६।

आमाको आहारको बलले छ किसिमका रसहरूले नाभिको नालको माध्यमबाट ऊ दिनदिनै बढ्दै जान्छ ।३७।

ततः स्मृतिं लभेज्जीवः सम्पूर्णेऽस्मिन् शरीरके ।
सुखदुःखं विजानाति निद्रास्वप्नं पूरा कृतम् ॥३८॥

मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ।
नानायोनिसहस्राणि मया दृष्टानि जायता[17] ॥३९॥

अधुना जातमात्रोऽहं प्राप्ते संस्कार एव वा ।
ततच्छ्रेयः करिष्यामि येन गर्भे[18] न सम्भवे ॥४०॥

गर्भस्थश्चिन्तयत्येवमहं गर्भाद् विनिःसृतः ।
अध्येष्यामि शिवं ज्ञानं संसारविनिवर्त्तकम् ॥४१॥

एवं स गर्भदुःखेन महता परिपीडितः ।
जीवः कर्मवशादास्ते मोक्षोपायं विचिन्तयन् ॥४२॥

त्यसपछि जीवले यस शरीरमा स्मरणशक्ति पाउँछ, पहिले गरेका सुखदुःख, निद्रा र स्वप्नहरूलाई जान्दछ ।३८।

म मरेर जन्में वा जन्मेर मरें र मैले अनेक हजार जुनीहरू देखें भन्ने कुरा थाहा पाउँदछ ।३९।

अहिले त जन्में भने मात्रै पनि अथवा संस्कार भैसकेपछि ती-ती कल्याणकारी मार्गहरू अपनाउने छु जसबाट पुनः गर्भमा वास हुने छैन ।४०।

गर्भमा छँदा के चिन्तन गर्छ भने म यस गर्भबाट बाहिर निस्केपछि संसारको आवागमनबाट मुक्त गर्ने शिवज्ञानको अध्ययन गर्नेछु ।४१।

यसरी गर्भमा रहेको पीडाले कष्ट झेलिरहेको जीवले कर्माधीनताका कारणले मोक्षका उपायहरूको चिन्तन गरिरहन्छ ।४२।

---

१७ ग, घ. जायते ।

१८ ग. गच्छे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यथा गिरिवराक्रान्तः कश्चिद् दुःखेन तिष्ठति ।
तथा जरायुणा देही दुःखन्तिष्ठति वेष्टितः ॥४३॥

पतितः सागरे यद्वद् दुःखमास्ते समाकुलः ।
गर्भोदकेन सिक्ताङ्गस्तथास्ते व्याकुलः पुमान् ॥४४॥

लोहकुम्भे यथा न्यस्तः पच्यते कश्चिदग्निना ।
गर्भकुम्भे तथा क्षिप्तः पच्यते जठराग्निना ॥४५॥

सूचिभिरग्निवर्णाभिर्विभिन्नस्य निरन्तरम् ।
यद् दुःखमुपजायेत[१९] तद्गर्भेऽष्टगुणम्भवेत् ॥४६॥

गर्भवासात्परो वासः कष्टेनैवात्र कुत्रचित् ।
देहिनां दुःखबहुलं सुघोरमतिसङ्कटम् ॥४७॥

जसरी ठूलो पहाडद्वारा चेपिएको मानिसले कष्टको अनुभव गर्दछ, त्यसै गरी सालनालले बेरिएको प्राणी अत्यन्त दुःखपूर्वक रहन्छ।४३।

समुद्रको पानीमा खसेको मानिस जति व्याकुल हुन्छ, त्यत्ति नै गर्भको चिसोले अवयवहरू चिसो भएको जीव व्याकुल भएर रहन्छ।४४।

जसरी कुनै मानिस फलामको खट्कुलोमा राखिएर आगोले पकाइन्छ, त्यसै गरी गर्भरूपी खट्कुलोमा जठराग्निले पाकेको अनुभव गर्दछ।४५।

आगोले रन्केका राता सियोहरूले निरन्तर घोचिरहँदा जे जति दुःख हुन्छ, गर्भवासमा त्यसको आठगुणा बढी दुःख हुन्छ।४६।

गर्भवास भन्दा बढी कष्टकर वास सायदै कहीं होला, मानिसहरूका लागि गर्भवास अत्यन्त दुःख भएको अत्यन्त साँघुरो र डरलाग्दो हुन्छ।४७।

इत्येतद् गर्भदुःखं हि प्राणिनां परिकीर्तितम् ।
चलस्थिराणां[२०] सर्वेषामात्मगर्भानुरूपतः ॥४८॥

गर्भात्कोटिगुणं दुःखं योनियन्त्रप्रपीडनात् ।
सम्मूर्च्छितस्य जायेत जायमानस्य देहिनः ॥४९॥

शरवत्पीड्यमानस्य[२१] यन्त्रेणैव समन्ततः ।
शिरसा ताड्यमानस्य पापमुद्गरकेण च ॥५०॥

---

१९ ग. यद्दुःखन्तु प्रजायेत ।

२० ग. चलास्थिराणाम् । ङ. चरस्थिराणाम् ।

२१ क. शरीरं च पीड्यमानस्य । ग. शरीरं पीड्यमानस्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गर्भान्निष्क्रममाणस्य प्रबलैः सूतिवायुभिः ।[२२]
जायते सुमहद्दुःखं[२३] परित्राणमविन्दतः ॥५१॥

यन्त्रेण पीडिता यद्वन्निःसाराः स्युस्तिलेक्षवः ।
तथा शरीरं निःसारं योनियन्त्रप्रपीडितम् ॥ ५२॥

यो प्राणीहरूलाई गर्भबाट हुने दुःखका बारेमा बताइयो । स्थावर जङ्गम सबै प्राणीका लागि आफ्नो स्वरूप अनुसार गर्भदुःख कष्टकर हुन्छ ।४८।

गर्भवास भन्दा पनि गर्भबाट निस्किदा साँघुरो योनियन्त्रको पीडाले मूर्छित भएको जन्मदै गरेको प्राणीलाई करोडौं गुणा बढी दुःख हुन्छ ।४९।

योनियन्त्रद्वारा चारैतिरबाट बाणले पीडित भएको र शिरमा पापका मुंग्राले हिर्काइएझैं गर्भबाट निस्कदा करोडौं गुणा बढी दुःख हुन्छ ।५०।

रक्षा विनाको र गर्भबाट निस्किरहेको प्राणीले सशक्त सूतिवायुद्वारा अत्यन्त दुःख पाउँछ ।५१।

जसरी कोलमा पेलिएका तिल, उँखु आदि पदार्थहरू सारहीन बन्दछन्, त्यसै गरी योनियन्त्रद्वारा पीडित शरीर पनि बलहीन बन्दछ ।५२।

अस्थिपट्टतुलास्तम्भ[२४]स्नायुबन्धेन यन्त्रितम् ।
रक्तमांसमृदालिप्तं विण्मूत्रद्रव्यभाजनम् ॥५३॥

केशरोमतृणाच्छन्नं रोगाईतनमातुरम् ।
वदनैकमहाद्वारं गवाक्षाष्टकभूषितम् ॥ ५४॥

ओष्ठद्वयकपाटञ्च दन्तजिह्वार्गलान्वितम् ।
नाडीस्वेदप्रवाहञ्च कफपित्तपरिप्लुतम् ॥ ५५॥

जराशोकसमाविष्टं कालचक्रानले स्थितम्[२५] ।
कामक्रोधेन्धनाक्रान्तं व्यसनैश्चोपमर्दितम् ॥ ५६॥

भोगतृष्णातुरं मूढं रागद्वेषवशानुगम् ।
संवर्त्तिताङ्गप्रत्यङ्गं जरायुपरिवेष्टितम् ॥५७॥

यो शरीर हाडका पट्टारूपी स्तम्भमा नशारूपी डोरीले बाँधिएको रगत र मासुरूपी माटोले लिपिएको विष्ठा र मूत्ररूपी द्रव्यलाई राख्ने भाँडो हो ।५३।

यो शरीर केश र रौंरूपी घाँसले तोपिएको, रोगको घर, हड्बडाएको, मुखरूपी ठूलो ढोका र इन्द्रियरूपी आठवटा झ्यालले युक्त छ ।५४।

---

२२ ग. अस्य पद्यस्य पूर्वार्द्धं नास्ति ।
२३ ग. गर्भात्कोटिगुणं दुःखम् ।
२४ घ. स्तम्भम् ।
२५ ग. कालवक्त्रानलोम्भितम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यो शरीर ओठरूपी दुईटा ढोकाका पल्ला र दाँत र जिब्रोरूपी आग्लोले युक्त छ। नाडीहरू र पसिनाहरूको प्रवाह, कफ र पित्तले व्याप्त छ।५५।

यो शरीर वार्धक्य र शोकले युक्त, समयचक्ररूपी अग्निमा रहेको, काम र क्रोधरूपी इन्धनले व्याप्त विपदाहरूले पीडित छ।५६।

यो शरीर भोग र तृष्णाले आतुर, मूढ, राग र द्वेषको वशमा परेको, अङ्ग प्रत्यङ्गहरूको व्यवहारले युक्त र सालनाललले बेरिएको छ।५७।

सङ्कटेन विविक्तेन योनिमार्गेण निर्गतम् ।
विण्मूत्ररक्तसिक्ताङ्गं षट्कोशांशसमुद्भवम् ॥५८॥

अस्थिपञ्जरसंख्यान्तं[२६] ज्ञेयमस्मिन् कलेवरे ।
शतत्रयं षष्ट्यधिकं पञ्च पेशीशतानि च ॥ ५९॥

सार्द्धाभिस्तिसृभिश्छन्नं समन्ताद्रोमकोटिभिः ।
शरीरं स्थूलसूक्ष्माभिर्दृश्यादृश्याश्च ताः[२७] स्थिताः ॥६०॥

तावतीभिश्च नाडीनां कोटिभिस्तत्समन्वितम् ।
प्रस्वेदमशुचिर्याभिरन्तस्थं स्रवते बहिः ॥ ६१॥

द्वात्रिंशद्दशनाः प्रोक्ताः विंशतिश्च नखाः स्मृताः ।
पित्तस्य कुडवं ज्ञेयं कफस्यार्द्धाढकं स्मृतम् ॥६२॥

वसायाः पलानि त्रिंशत्तदर्द्धे कललस्य च[२८] ।
पञ्चार्बुदे पला ज्ञेयाः पलानि दश मेदसः ॥६३॥

अत्यन्त साँघुरो र नितान्त बेग्लै किसिमको योनिको बाटो निस्केको दिसा, पिसाब र रगतले भिजेको छवटा कोशहरूको अंशले यो शरीर उत्पन्न भएको छ।५८।

यस शरीरमा अस्थिपञ्जरहरूको संख्या तीन सय साठी रहेको छ भने पाँच सय मसलहरू रहेका छन्।५९।

साढे तीन करोड रौंहरू छन्, जो स्थूल र सूक्ष्मरूपमा क्रमशः दृश्य र अदृश्य छन्।६०।

यो शरीर त्यत्तिनै अर्थात् साढे तीन करोड नाडीहरूले युक्त छ,तिनीहरूबाट भित्रको अपवित्र पसिना बाहिर निस्कने गर्दछ।६१।

शरीरमा बत्तीस दाँतहरू र बीस नङहरू रहेका हुन्छन् भने पित्त एक पाउ अथवा बत्तीस तोला र कफ आधा आढक अर्थात् दुई सेर (आधा पाथी) हुने गर्दछ।६२।

२६ घ. संख्यानम्।
२७ ग. दृशाश्चयावताः।
२८ घ. वसाः पलानित्रिंशच्च तदर्द्धं कललस्य च।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पलत्रयं महारक्तं मज्जायास्तु चतुर्गुणम् ।
शुक्रार्द्धंकुडवं ज्ञेयं तद्वीर्यन्देहिनां बलम्[२९] ॥ ६४॥

मांसास्थ्नामेकपिण्डेन पलसाहस्रमुच्यते ।
रक्तं पलशतं ज्ञेयं विण्मूत्रञ्चाप्रमाणतः ॥ ६५॥

इति देहगृहं ह्येतन्नित्यस्यानित्यमात्मनः ।
अविशुद्धं विशुद्धस्य कर्मबन्धविनिर्मितम् ॥ ६६॥

शुक्रशोणितसंयोगाद्देहः सञ्जायते यतः ।
नित्यं विण्मूत्रपूर्णश्च तेनाशुद्धः प्रकीर्तितः ॥६७॥

यथान्तर्विष्ठया पूर्णः शुचिः स्यान्न बहिर्घटः ।
यत्नतः शोध्यमानोऽपि देहोऽयमशुचिस्तथा ॥६८॥

गिदी तीस पल (१२०कर्ष अथवा ९०तोला), त्यसको आधा अर्थात् पन्द्र पल (६०कर्ष अथवा ४५ तोला) जरायु, पाँचपल सूक्ष्म मांसपिण्ड र दशपल बोसो हुन्छ ।६३।

महारक्त तीन पल, मासी त्यसको चारगुणा अर्थात् बाह्र पल र शुक्र सोह्रतोला अथवा आधा पाउ हुने गर्दछ। यो शुक्र मानिसहरूको सर्वश्रेष्ठ सामर्थ्य हो ।६४।

मासु र हाडहरूलाई एकत्र गर्ने हो भने झण्डै हजार पल हुन्छ। रगत सय पल हुन्छ भने मलमूत्रको कुनै निश्चित मात्रा हुँदैन ।६५।

यसरी विशुद्ध र नित्य आत्माको कर्मबन्धनद्वारा बनाइएको अनित्य र अपवित्र शरीररूपी घर हुन्छ ।६६।

पुरुषको वीर्य र स्त्रीरजको संयोगबाट शरीरको उत्पत्ति हुन्छ जो सधैं मलमूत्रले भरिएको हुन्छ। त्यसैले यो अपवित्र छ ।६७।

जसरी भित्र मल भरिएको घैंटो बाहिरबाट कुनै पनि स्थितिमा पवित्र मानिँदैन, त्यसैगरी बाहिरबाट जति सफा गरिए पनि शरीर पवित्र हुन सक्दैन ।६८।

यं प्राप्यातिपवित्राणि पञ्चगव्यं हवींषि च ।
अशुचित्वं क्षणाद्यान्ति किमन्यदशुचिस्ततः ॥६९॥

हृद्यान्यप्यन्नपानानि यं प्राप्य सुरभीणि च ।
अशुचित्वं प्रयान्त्याशु किमन्यदशुचिस्ततः ॥७०॥

हे जनाः ! किन्न पश्यध्वं यन्निर्याति दिने दिने ।
स्वदेहात्कश्मलं पूतिस्तदाधारः कथं शुचिः ॥ ७१॥

देहः संशोध्यमानोऽपि पञ्चगव्यकुशाम्बुभिः ।
घृष्यमाणमिवाङ्गारं निर्मलत्वं न गच्छति ॥ ७२॥

---

२९ ग. वरम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्रोतांसि यस्य सततं प्रवहन्ति गिरेरिव ।
कफमूत्राद्यमशुचि स देहः शुद्ध्यते कथम् ॥७३॥

सर्वाशुचिनिधानस्य शरीरस्य न विद्यते ।
शुचिरेकः प्रदेशोऽपि विण्मूत्रस्य दृतेरिव ॥७४॥

जुन मानव शरीरलाई प्राप्त गरेर अत्यन्त पवित्र मानिएका पञ्चगव्य र हव्य सामग्रीहरू क्षणभरमै अशुचि हुन्छन् त्यस शरीरभन्दा अपवित्र अन्य के हुन सक्दछ ? ६९।

अत्यन्त स्वादु तथा सुगन्धित खाद्य तथा पेय वस्तुहरू जुन शरीरलाई प्राप्त गर्दैमा तत्काल अपवित्र बन्दछन्, त्यस शरीरभन्दा अन्य के अपवित्र हुन सक्दछ र ?७०।

हे मानिस हो ! दिन-दिनै आफ्नो शरीरबाट दुर्गन्धयुक्त मल निस्किरहेको के देख्दैनौ ? त्यो दुर्गन्धि मलको भाँडो कसरी पवित्र हुन सक्दछ ? ७१।

अङ्गारलाई जति घोटे पनि निर्मल हुन नसके झैं शरीरलाई पञ्चंगव्य र कुशको पानीले जति चोख्याए पनि चोखो हुन सक्दैन ॥७२।

पहाडहरूबाट नदीका मुहानहरू बगेझैं कफ, मूत्र आदि फोहोर जहाँबाट निरन्तर निस्किरहन्छ, त्यस्तो शरीर कसरी शुद्ध हुन सक्दछ ?।७३।

स्मृत्वात्मदेहस्रोतांसि मृत्तोयैर्धावतः करौं ।
तथाप्यशुचिभाण्डस्य न विरज्यन्ति किञ्जनाः ॥ ७५॥

कायः[३०] स्रगन्धपुष्पाद्यैर्यत्नेनापि सुसंस्कृतः[३१] ।
न जहाति स्वभावं हि श्वपुच्छमिव नामितम् ॥७६॥

यथा जात्यैव कृष्णोर्णा[३२] न शुक्ला स्यादुपायतः ।
तथा संशोध्यमानापि भवेन्मूर्तिरनिर्मला ॥७७ ॥

जिघ्रन्नपि स्वदुर्गन्धं पश्यन्नपि स्वकस्मलम् ।
न विरज्यति लोकोऽयं पीडयन्नपि नासिकाम् ॥ ७८॥

सम्पूर्ण अपवित्रताको खानी विष्ठा र मूत्रवाही छालाको झोलाजस्तो शरीरको कुनै यौटा पनि भाग पवित्र छैन ।७४।

अपवित्रताको स्रोत आफ्नो शरीरलाई संझेर माटो र पानीले हात धुँदै गरेका मानिसहरूलाई त्यस अपवित्रताको पेटारो शरीरबाट वैराग्य किन हुँदैन ?।७५।

३० घ. काय ।
३१ घ. सुसंस्कृतम् ।
३२ ग. कृष्णार्णी ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

माला, अन्तर, फूल आदिले शरीरलाई जति सफा बनाउने प्रयास गरे पनि कुकुरको पुच्छर जसरी जति सोझ्याए पनि सोझिदैन त्यसै गरी शरीरले पनि आफ्नो अपवित्रतारूप स्वभावलाई कहिल्यै छोड्दैन ।७६।

जसरी जन्मजात कालो ऊनलाई कुनै उपायले सेतो बनाउन सकिदैन त्यसै गरी जति सफा गरे पनि शरीर चोखो हुन सक्दैन ।७७।

आफ्नो फोहोर हेर्दै गर्दा र आफ्नो दुर्गन्ध सुँघ्दा नाक थुनेर रहनु पर्दा पनि मानिस त्यसबाट विरक्त हुँदैन, आश्चर्य छ ।७८।

अहो मोहस्य माहात्म्यं येन व्यामोहितं जगत् ।
जिघ्रन् पश्यन् स्वदोषांश्च कायस्य न विरज्यते ॥७९॥

स्वदेहाशुचिगन्धेन न विरज्येत यो नरः ।
विरागकारणन्तस्य किमन्यदुपदिश्यते ॥८०॥

सर्वमेतज्जगत्पूतं देह एवाशुचिः परः ।
[३३]तन्मलावयवस्पर्शाच्छुचिरप्यशुचिर्भवेत् ॥८१॥

गन्धलेपापनोदार्थं शौचं देहस्य कीर्तितम् ।
द्वयस्यापगमात्पश्चाद् भावशुद्ध्या विशुद्ध्यति ॥८२॥

गङ्गातोयेन सर्वेण मृद्भारैश्च नगोपमैः ।
आमृत्योराचरन् शौचं भावदुष्टो न शुद्ध्यति ॥८३॥

मोहको माहात्म्य कमालको छ, जसले सारा संसारलाई मुग्ध तुल्याएको छ। आफ्ना शरीरका दोषहरूलाई सुँघ्दा र हेर्दा पनि मानिस त्यसबाट विरक्त हुँदैन ।७९।

जुन मानिसलाई आफ्नो शररिको दुर्गन्धबाट वैराग्य हुँदैन, त्यसलाई वैराग्यका लागि अरू के उपदेश दिन सकिन्छ र ?।८०।

यो सारा संसार पवित्र छ र शरीर मात्र अत्यन्त अपवित्र छ किनभने त्यसको मल र अङ्गहरूको स्पर्श मात्रले पवित्र वस्तु पनि अपवित्र भैहाल्दछ ।८१ ।

गन्धको लेप र त्यसको अपसारणका लागि शरीरको पवित्रता चाहिन्छ। लेप र अपसारण दुबै भइसके पछि भावशुद्धिद्वारा शरीर शुद्ध हुन सक्दछ ।८२।

सम्पूर्ण गङ्गाजल र पहाडतुल्य माटाका थुप्राहरूले जीवनपर्यन्त जति धोए पनि भावदुष्ट शुद्ध हुन सक्दैन ।८३।

---

३३ ग. तत्पला ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तीर्थस्नानैस्तपोभिर्वा भावदुष्टो न शुद्ध्यति[३४] ।
श्वदृतिः[३५] क्षालितस्तीर्थे किं शुद्धिमधिगच्छति ॥८४॥

अन्तर्भाविन[३६] दुष्टस्य विशतोऽपि हुताशने ।
न स्वर्गो नापवर्गश्च देहनिर्दहनम्परम् ॥ ८५॥

भावशुद्धिः परं शौचं प्रमाणं सर्वकर्मसु ।
अन्यथालिङ्ग्यते कान्ता भावेन दुहितान्यथा ॥८६॥

मनसा भिद्यते वृत्तिरभिन्नेष्वपि वस्तुषु ।
अन्यथैव स्तनं पुत्रश्चिन्तयत्यन्यथा पतिः ॥८७॥

पश्य पश्य च भावस्य महाभाग्यमशेषतः ।
परिष्वक्तोऽपि यन्नार्या भावहीनो न कामयेत् ॥८८॥

जति तीर्थहरूमा नुहाए पनि र जति तपस्या गरे पनि भावदुष्ट कहिल्यै पवित्र हुन सक्दैन । कुकुरको छाला जति तीर्थहरूमा पखाले पनि के चोखो हुन सक्दछ र ?।८४।

अन्तर्भावनाद्वारा दूषित मानिस आगोमा पसे पनि शरीर त डढ्न सक्छ, तर स्वर्ग र मोक्ष प्राप्त हुन सक्दैन ।८५।

भावशुद्धि नै सबैभन्दा ठूलो पवित्रता र सबै कार्यहरूमा प्रमाण हो किनभने प्रियाको आलिङ्गन अन्य भावले र पुत्रीको आलिङ्गन अन्य भावले नै गरिन्छ ।८६।

यौटै वस्तुमा पनि मनले भिन्न भिन्न व्यवहार हुने गर्दछ । पुत्रको चिन्तनमा स्तनको रूप अर्कै हुन्छ भने त्यसै स्तनको पतिको चिन्तनमा अर्कै रूप हुने गर्दछ ।८७।

हेर हेर भावको सम्पूर्ण माहात्म्य कति ठूलो छ ? सुन्दर नारीद्वारा आलिङ्गन गरिएता पनि पुरुष भावहीन छ भने उसलाई चाहँदैन ।८८।

नाद्याद्विविधमन्नाद्यं[३७] भक्ष्याणि सुरभीणि च ।
अभावेन नरस्तस्माद् भावः सर्वत्र कारणम् ॥८९॥

चित्तं शोधय[३८] यत्नेन किमन्यैर्बाह्यशोधनैः ।
भावतः सुविशुद्धात्मा स्वर्गं मोक्षञ्च विन्दति ॥९०॥

ज्ञानामलाम्भसा पुंसः सद्वैराग्यमृदा पुनः ।

---

३४ घ. दुष्टात्मा नैव शुद्ध्यति ।
३५ क. श्वकृदिः । ग, घ. अदृतिः ।
३६ ख, ग, घ. अन्तर्भावप्र ।
३७ ग. भावना द्विविधानस्यम् ।
३८ घ. विशोध्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अविद्यारागविण्मूत्रलेपगन्धविशोधनम् ॥ ९१॥

एवमेतच्छरीरं हि निसर्गादशुचि स्मृतम् ३९ ।
त्वङ्मात्रसारं निस्सारं कदलीसारसन्निभम् ॥९२॥

ज्ञात्वैवं दोषवद्देहं यः प्राज्ञः शिथिलीभवेत् ।
सोऽतिक्रामति संसारं दृढग्राही च तिष्ठति ॥९३॥

भाव छैन भने स्वादु र सुगन्धि नानाथरी खाद्यहरू पनि मानिसले खाँदैन । त्यसैले भाव नै सम्पूर्ण कुराको कारण हो ।८९।

त्यसैले यत्नपूर्वक मनलाई शुद्ध गर्नु पर्दछ । बाह्य शुद्धिको कुनै अर्थ छैन । भाव शुद्धिबाट नै स्वर्ग र मोक्ष दुबै प्राप्त हुन सक्दछन् ।९०।

ज्ञानरूपी निर्मल पानीद्वारा र वैराग्यरूपी राम्रो माटोद्वारा अज्ञान र रागरूपी मलमूत्रको लेपको दुर्गन्धलाई सफा गर्नु पर्दछ ।९१।

यसरी यो शरीर स्वाभविकरूपमै अपवित्र मानिएको छ । केराका बोक्रातुल्य यसको छालामा मात्र सार छ । अत एव यो सारहीन छ ।९२।

जुन बुद्धिमान् मानिसले देहलाई दोषयुक्त छ भन्ने ठानेर त्यस विषयमा शिथिल हुन्छ, उसले संसार पार गर्दछ । जसले दृढतापूर्वक त्यसलाई अँगाल्दछ, त्यो संसारमै रहन्छ ।९३।

एवमेतन्महाकष्टं जन्मदुःखं प्रकीर्तितम् ।
पुंसामज्ञानदोषेण नानाकर्मवशेन च ॥९४॥

गर्भस्थस्य स्मृतिर्यासीत्सा जातस्य प्रणश्यति ।
सम्मूर्च्छितस्य दुःखेन योनियन्त्रप्रपीडनात् ॥९५॥

बाह्येन वायुना तस्य मोहाज्ञानेन देहिनः[४०] ।
स्पृष्टमात्रस्य घोरेण ज्वरः समुपजायते ॥९६॥

तेन ज्वरेण महता महामोहः प्रजायते ।
सम्मूढस्य स्मृतिभ्रंशः शीघ्रं सञ्जायते पुनः ॥९७॥

स्मृतिभ्रंशात्ततस्तस्य पूर्वकर्मवशेन च ।
रतिः[४१] सञ्जायते तूर्णं जन्तोस्तत्रैव जन्मनि ॥९८॥

---

३९ घ. विद्धः ।
४० घ. देहिनम् ।
४१ ग. रसः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यसरी मानिसहरूको अज्ञानजन्य दोष र अनेक कर्महरूको पराधीनताका कारण यो संसार कष्टमय छ र जन्मदा हुने दुःख महादुःख मानिएको छ ।९४।

गर्भमा छँदा जो पूर्वजन्मको सम्झना थियो, त्यो योनियन्त्रको पीडाबाट मूर्छित भएको मानिसको जन्मपछि सबै नष्ट भइहाल्छ ।९५।

प्राणीलाई मोह र अज्ञानद्वारा तथा बाह्य वायुको संस्पर्शमात्रले पनि भयङ्कर जरो आउने गर्दछ ।९६।

त्यस महाज्वरोबाट महामूर्छा उत्पन्न हुन्छ र यसरी मूर्छित भएको मानिसको तत्काल स्मरण शक्ति नष्ट हुन्छ ।९७।

त्यसपछि पूर्वजन्महरूका कर्महरूको अधीन भएको त्यस नवजात मानिसको स्मरणशक्तिको विनाश भई यसै जन्मसँग मोह हुने गर्दछ ।९८।

रक्तो मूढश्च लोकोऽयमकार्ये सम्प्रवर्तते ।
न चात्मानं विजानाति न परं न च दैवतम् ॥९९॥

न श्रृणोति परं भूयः सति चक्षुषि नेक्षते ।
समे पथि शनैर्गच्छन् स्खलतीव पदे पदे ॥१००॥

बुद्धौ सत्यां[४२] न जानाति बोध्यमानो बुधैरपि ।
संसारे क्षिप्यते तेन रागलोभवशानुगः ॥ १०१॥

गर्भ[४३]स्मृतेरभावेन शास्त्रमुक्तं शिवेन तु ।
तद्दुःखकथनार्थाय स्वर्गमोक्षप्रसाधकम् ॥ १०२॥

ये सत्यस्मिन् शिवज्ञाने सर्वकामार्थसाधके ।
न कुर्वन्त्यात्मनः श्रेयस्तदत्र महदद्भुतम्[४४] ॥ १०३॥

यसरी आफ्नो जुनीप्रति अनुरक्त भएको मूढ मानिस कुकृत्यमा प्रवृत्त हुन्छ । न उसले आफूलाई चिन्दछ, न अरूलाई चिन्दछ र न देवतालाई चिन्दछ ।९९।

कान भएर पनि सुन्दैन, आँखाहरू भएर पनि देख्दैन र सम्म बाटोमा सुस्तरी हिड्दा पनि ठाउँ ठाउँमा चिप्लिन्छ, लड्छ ।१००।

विद्वान्हरूद्वारा सम्झाउँदा पनि र बुद्धि रहँदा पनि बुझ्दैन, त्यसैले राग र लोभको अधीनमा परेर संसार सागरमा पर्दछ ।१०१।

गर्भमा भएको दुःख र त्यस समयमा गरेको प्रतिज्ञाको सम्झना न हुने भएकाले भगवान् शिवले त्यो दुःख सम्झाउनका लागि स्वर्ग र मोक्ष प्रदान गर्ने यस शास्त्रको कथन गरेका हुन् ।१०२।

४२ घ. सत्यां बुद्धौ ।

४३ ग. गङ्गा ।

४४ घ. न कुर्यादात्मनः श्रेयस्तेनात्मा वञ्चितश्चिरम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जुन मानिसहरू सम्पूर्ण चाहनाहरू र पुरुषार्थहरूलाई सिद्ध गर्न सक्ने यो शिवज्ञान छँदा पनि आफ्नो कल्याण गर्न सक्दैनन्, त्यो ठूलो आश्चर्यको कुरा हो ।१०३।

अव्यक्तेन्द्रियवृत्तित्वाद्बाल्ये[४५] दुःखं महत्पुनः ।
इच्छन्नपि न शक्नोति वक्तुं कर्तुञ्च सत्क्रियाम् ॥१०४॥

दन्तोत्थाने महद्दुःखं मौलेन व्याधिना तथा ।
बालरोगैश्च विविधैः पीडा बालग्रहैरपि ॥ १०५॥

तृड्बुभुक्षापरीताङ्गः क्वचित्तिष्ठति चारटन् ।
विण्मूत्रभक्षणाद्यञ्च मोहाद् बालः समाचरेत्[४६]॥ १०६॥

कौमारे कर्णवेधेन[४७] मातापैत्रञ्च ताडनम्[४८] ।
अक्षराध्ययनाद्यैश्च दुःखं स्याद् गुरुशासनात् ॥ १०७॥

प्रमत्तेन्द्रियवृत्तेश्च कामरागप्रपीडनात् ।
रागावृतस्य सततं कुतः सौख्यं हि यौवने ॥१०८ ॥

बाल्यकालमा इन्द्रियहरूको व्यापार व्यक्त नहुने भएकाले ठूलो दुःखको अनुभूति हुन्छ किनभने बालकले चाहेर पनि राम्रो काम भन्न र गर्न सक्दैन ।१०४।

दाँत उम्रदा धेरै ठूलो दुःख हुन्छ । पहिलेदेखिको व्याधि, नानाथरी बालरोगहरू र बालग्रहहरूको पनि त्यत्तिकै पीडा हुन्छ ।१०५।

तीर्खा र भोकले युक्त भएर कहिले रोइरहन्छ र मोहवश बालकले मलमूत्र आदि पनि खाने गर्दछ ।१०६।

किशोरावस्थामा कान छेड्दा र आमा बुबाको पिटाइबाट दुःख हुने गर्दछ भने गुरुको नियन्त्रणमा अक्षरहरू चिन्दा र पढ्दा पनि कष्ट नै हुन्छ ।१०७।

चाहना र प्रेमका कारण इन्द्रियहरूको व्यापारबाट मताएको बेलामा प्रेमले युक्त चित्त भएको मानिसले जवानीमा कसरी सुख पाउँदछ र ? १०८।

ईर्ष्यया च महद्दुःखं मोहाद्रक्तस्य जायते ।
नेत्रस्याकुपितस्येव रागो दुःखाय केवलम् ॥१०९॥

न रात्रौ विन्दते निद्रां कामाग्निपरिखेदितः ।
दिवा चास्य कुतः सौख्यमर्थोपार्जनचिन्तया ॥११०॥

स्त्रियायासितदेहस्य ये पुंसः शुक्रविन्दवः ।

---

४५ ग. आस्ते ।

४६ ग. करोति वै ।

४७ ग. कर्णवेधे च ।

४८ ख. यन्मातापित्रवताडनम् । ग. च तन्मातापितृताडनम् । घ. मातापित्रोश्च ताडनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न ते सुखाय मन्तव्याः खेदजा इव विन्दवः ।।१११।।

कृमिभिः खाद्यमानस्य कुष्ठिनः पामितस्य च ।
कण्डूयनाग्नितापेन यद्भवेत् स्त्रीषु तद्विधः ।।११२।।

यादृशं मन्यते सौख्यं गण्डपूयविनिर्गमात् ।
तादृशं स्त्रीषु मन्तव्यं नाधिकं तासु विद्यते ।।११३।।

गण्डस्य वेदना यद्वत् स्फुटितस्य निवर्तते ।
तद्वत् स्त्रीष्वपि तद्विद्धि न सौख्यं परमार्थतः ।।११४।।

नरिसाएका मानिसको आँखामा देखिने रातोपन जस्तै रागयुक्त मानिसको राग मोह र ईर्ष्याका कारण केवल दुःखका निमित्त हुन्छ ।१०९।

कामाग्निद्वारा परितप्त मानिस राति निदाउँदैन भने दिनमा पनि धन आर्जनको चिन्ताले उसलाई कतैबाट सुख हुँदैन ।११०।

स्त्रीद्वारा श्रान्त शरीर बनाइएका पुरुषहरूका जुन वीर्यका थोपाहरू निस्कन्छन्, तिनीहरूलाई श्रमबाट उत्पन्न भएका पसिनाका थोपा झैं हुन्छन् । अतः ती सुखका निमित्त हुँदैनन् ।१११।

कीराहरूले खाइरहेको, कोर लागेको वा लुतो भएको मानिसलाई कन्याउँदा हुने ताप जत्तिकै स्त्रीहरूसँगको संसर्गलाई पनि तापकारी बुझ्नु पर्दछ । ११२।

फोडाबाट पीप निस्कदा जति सुख प्राप्त हुन्छ स्त्रीसंसर्गमा पनि त्यत्तिनै सुख हुन्छ त्यो भन्दा अधिक तिनीहरूमा केही हुँदैन ।११३।

फोडा फुट्दा जति पीडा न्यून हुन्छ, त्यत्तिनै स्त्रीसंसर्गमा पनि बुझ्नु । वास्तवमा त्यसमा कुनै आनन्द छैन ।११४।

बर्चोमूत्रसमुत्सर्गात्सुखं भवति यादृशम् ।
तादृशं स्त्रीषु विज्ञेयं मूढैः[४९] कल्पितमन्यथा ।।११५।।

नारीष्ववस्तुभूतासु सर्वदोषाश्रयासु च ।
नाणुमात्रकमप्येवं सुखमस्ति विचारतः ।।११६।।

सम्मानमपमानेन वियोगेनेष्टसङ्गमम्[५०] ।
यौवनं जरया ग्रस्तं क्व सौख्यमनुपद्रवम् ।।११७।।

वलीपलितखालित्यैः शिथिलीकृतविग्रहः ।
सर्वक्रियास्वशक्तश्च जरया जर्जरीकृतः ।।११८।।

स्त्रीपुंसोर्यौवनं रूपं यदन्योन्यं प्रियं पूरा ।
तदेव जरया ग्रस्तमुभयोरपि न प्रियम् ।। ११९।।

४९ ख. मुर्खैः ।
५० ग. वियोगेन च सङ्गमः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपूर्ववत्स्वमात्मानं जरया परिवर्तितम् ।
यः पश्यन्न विरज्येत कोऽन्यस्तस्मादचेतनः ॥१२०॥

मलमूत्र त्याग गर्दा जति सुख प्राप्त हुन्छ त्यति नै सुख स्त्रीसंसर्गमा हुन्छ । मूर्खहरूले अरू नै कल्पना गर्दछन् ।११५।

विचार गर्दा सम्पूर्ण दोषका आश्रय तथा तत्त्वहीन स्त्रीहरूमा थोरै पनि सुख छैन ।११६।

सम्मान अपमानद्वारा, संयोग वियोगद्वारा र जवानी बूढोपनद्वारा ग्रस्त छन् । त्यसैले सुख कहिल्यै पनि विपत्तिरहित छैन ।११७।

चाउरी, फुलाइ र खुइल्याइद्वारा शरीर शिथिल हुन्छ र वृद्धत्वले जर्जर भएको मानिस सम्पूर्ण काम गर्न असमर्थ हुन्छ ।११८।

स्त्री पुरुषहरूको जवानी र सौन्दर्य जो पहिले एक अर्काका लागि अत्यन्त प्रिय थियो, त्यही नै जराग्रस्त भएपछि अप्रिय हुन थाल्दछ ।११९।

जराभिभूतः पुरुषः पत्नीपुत्रादिबान्धवैः ।
अशक्तत्वाद्दुराचारैर्भृत्यैश्च परिभूयते ॥ १२१॥

धर्ममर्थञ्च कामञ्च मोक्षञ्च न जरीकृतः[५१] ।
शक्तः साधयितुं तस्माद्युवा धर्मं समाचरेत् ॥ १२२॥

वातपित्तकफादीनां वैषम्यं व्याधिरिष्यते ।
वातादीनां समूहश्च देहोऽयं परिकीर्तितः ॥१२३॥

तस्माद् व्याधिमयं ज्ञेयं शरीरमिदमात्मनः ।
वाताद्यव्यतिरिक्तत्वाद् व्याधीनां पञ्जरस्य च ॥१२४॥

रोगैर्नानाविधैर्यानि देहे दुःखान्यनेकधा ।
तानि नैवात्मवेद्यानि किमन्यत्कथयाम्यहम् ॥१२५॥

पहिले नभएको जस्तो आफूलाई वृद्धत्वद्वारा बदलिएको देखेर जसलाई वैराग्य उत्पन्न हुँदैन, त्यसभन्दा बढी अबुझ को हुन सक्दछ ? १२०।

वृद्धत्वले अभिभूत मानिस पत्नी पुत्र आदि बान्धबहरूद्वारा र दुराचारी सेवकहरूद्वारा असमर्थ भएका कारणले तिरस्कृत हुन्छ ।१२१।

वृद्धावस्थामा धर्म, अर्थ, काम तथा मोक्ष कसैलाई पनि साँध्न सकिँदैन । त्यसैले जवानीमा नै धर्मको आचरण गर्नु पर्दछ ।१२२।

---

५१ ख, ग. जरीयतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वात, पित्त र कफहरूको विषमता व्याधि हो र वात, पित्त र कफकै समूह यो शरीर पनि हो ।१२३।

त्यसैले आफ्नो यस शरीरलाई व्याधिमय छ भनी जान्नू । किनभने व्याधिहरू र शरीर दुबै वात, पित्त र कफ भन्दा पृथक् छैनन् ।१२४।

शरीरमा जुन नानाथरी दु:खदायी रोगहरू छन्, ती कदापि आत्मीय होइनन्, यस बाहेक अरू के भन्न सकिन्छ र ?१२५।

एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम् ।
तत्रैकः कालसंज्ञश्च शेषास्त्वागन्तवः स्मृताः ॥१२६॥

ये त्विहागन्तवः प्रोक्तास्ते प्रशाम्यन्ति भेषजैः ।
जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति ॥ १२७॥

यदि वाऽपमृत्युर्न स्याद् विषमद्या[५२]दशङ्कितः ।
न चास्ति पुरुषस्तस्मादपमृत्योर्विभेति यः ॥१२८॥

विविधा व्याधयः शस्त्रं सर्पाद्याः प्राणिनस्तथा ।
विषाणि चाभिचाराश्च मृत्योर्द्वाराणि देहिनाम्[५३] ॥१२९॥

पीडितं सर्वरोगाद्यैरपि धन्वन्तरिः स्वयम् ।
स्वस्थीकर्तुं न शक्नोति कालप्राप्तं हि देहिनम् ॥१३०॥

नौषधं न तपो दानं न मन्त्रा न च बान्धवाः ।
शक्नुवन्ति परित्रातुं[५४] नरं कालप्रपीडितम् ॥ १३१॥

यस शरीरमा एक शय एक मृत्युहरू प्रतिष्ठित रहेका छन् । तिनमा यौटा कालनामक मृत्यु अवश्यम्भावी छ भने अन्य सबै आगन्तुक हुन् ।१२६

यी एक शय एक मृत्युहरूमा आगन्तुक मृत्युहरू औषधी, जप, होम र दान आदिद्वारा टर्न सक्दछन् भने काल मृत्यु कुनै हालतमा टर्न सक्दैन ।१२७।

यदि अकालमृत्यु हुँदैनथ्यो भने मानिसले निसङ्कोच विष खान्थ्यो होला र त्यस्तो मानिस भेटिन्नथ्यो होला जो अकाल मृत्युबाट डराउँदछ ।१२८।

नानाथरी रोगहरू, हतियारहरू, सर्प आदि विषालु प्राणीहरू, विषहरू तथा तन्त्रमन्त्र प्रयोगहरू प्राणीहरूका मृत्युका द्वारहरू हुन् ।१२९।

अनेक रोगहरूद्वारा आक्रान्त तथा काल आएको प्राणीलाई स्वयं आयुर्वेदका अधिष्ठाता धन्वन्तरिले पनि निको पार्न सक्दैनन् ।१३०।

---

५२ ग. विषयः स्या ।

५३ ग. दूहिनी ।

५४ ख. परित्राणम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रसायनतपोजप्यैर्योगसिद्धैर्महात्मभिः ।
कालमृत्युरपि प्राज्ञैर्जीयते नालसैर्नरैः ॥१३२॥

नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम् ॥
नास्ति मृत्युसमस्त्रासः सर्वेषामेव देहिनाम् ॥ १३३॥

सद्भार्यापुत्रमित्राणि राजैश्वर्यसुखानि च ।
अबध्यानि च वैराणि मृत्युः सर्वाणि कृन्तति ॥१३४॥

हे नराः ! किन्न पश्यध्वं सहस्रस्यापि मध्यतः ।
जनाः शतायुषः पञ्च भवन्ति न भवन्ति वा ॥१३५॥

अशीतिका विपच्यन्ते केचित्सप्ततिका नराः ।
परमायुः स्थितं षष्टिस्तदप्यनिश्चितं पुनः ॥ १३६॥

काल आइपुगेको मानिसलाई औषधी, तपस्या, दान, मन्त्र र बन्धुबान्धवहरू कसैले पनि बचाउन सक्दैनन् ।१३१।

रसायन, तपस्या, जपहरूद्वारा योग सिद्धि प्राप्त महात्माहरूले कालमृत्युलाई पनि जित्न सक्दछन् तर आलस्ययुक्त व्यक्तिहरूले सक्दैनन् ।१३२।

समस्त प्राणीहरूका लागि मृत्युभन्दा ठूलो दुःख छैन, मृत्युभन्दा ठूलो कुनै भय छैन र त्यसभन्दा ठूलो कुनै त्रास पनि छैन ।१३३।

असल पत्नी, पुत्र, मित्र, राजसी ऐश्वर्यहरू, सुखहरू तथा कहिल्यै साम्य नहुने दुश्मनीहरू मृत्युले सबैलाई छिनालिदिन्छ ।१३४।

हे मानिसहरू हो ! के तिमीहरूले देख्दैनौ ? एक हजार जनामा पाँच जना पनि शय वर्ष बाँच्छन् वा बाँच्दैनन् ।१३५।

केही असी वर्षमा र केही सत्तरी वर्षको उमेरमा मर्दछन् । सामान्यतया मान्छेको अधिकतम उमेर साठी वर्षको छ तर त्यो पनि निश्चित छैन ।१३६।

यस्य यावद् भवेदायुर्देहिनः पूर्वकर्मभिः ।
तस्यार्द्धं चायुषो रात्रिर्हरतेऽर्द्धं स्मृतो यमः ॥१३७॥

बालभावे च मोहेन वार्द्धक्ये जरया पुनः ।
वर्षाणां विंशतिर्याति धर्मकामार्थवर्जिताः ॥१३८॥

आगन्तुकैर्भयैः पुंसां व्याधिशोकैरनेकधा ।
ह्रियतेऽर्द्धञ्च तत्रापि यच्छ्रेयस्तद्धि जीवितम्[५५] ॥१३९॥

५५ ग. तद्विवर्जितम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जीवितान्ते च मरणं महाघोरमवाप्नुयात् ।
जायते योनिकोटिषु मृतः कर्मवशात्पुनः ॥१४०॥

देहभेदेन यः पुंसां वियोगः कर्मसंक्षयात् ।
मरणं तद्विनिर्दिष्टं न नाशः परमार्थतः ॥ १४१॥

जुन प्राणीको आफ्ना पूर्वकर्मअनुसार जति आयु तोकिएको हुन्छ त्यसको आधा रातमा बितिहाल्छ भने त्यसको पनि आधा यमका अधीन हुन्छ ।१३७।

बचपनमा मुग्धतावश र वृद्धावस्थामा वृद्धत्ववश बीस वर्षहरू धर्म, अर्थ, काम आदि विहीन हुन्छन् ।१३८।

त्यसमा पनि आइलाग्ने भय, रोग र शोकहरूले मानिसहरूको आधा समय खाइदिन्छन् किनभने त्यसमा पनि आत्मकल्याणकारी कार्य गर्न सकिँदैन, त्यसैले श्रेय नै जीवन हो ॥१३९।

जीवनपछि जीवले डरलाग्दो मृत्युलाई प्राप्त गर्दछ र मरेपछि आफ्ना कर्मअनुसार करोडौं जुनीमा जन्म लिने गर्दछ ।१४०।

मानिसहरूको कर्म नाश नहुँदासम्म देह भेदका कारणले यौटा देहसँग जुन वियोग हुन्छ, त्यसलाई मृत्यु भनेर भनिएको छ तर वास्तविकरूपमा जीवको नाश हुँदैन ।१४१।

महातमः प्रविष्टस्यच्छिद्यमानेषु कर्मसु ।
यद् दुःखं मरणे जन्तोर्न तस्येहोपमा क्वचित् ॥१४२॥

हा तात ! मातर्हा कान्ते ! क्रन्दन्त्येवं सुदुःखिताः ।
मण्डूका इव सर्पेण गीर्यन्ते मृत्युना जनाः ॥ १४३॥

बान्धवैः स परिष्वक्तः प्रियैश्च परिवारितः ।
निश्वसन्दीर्घमुष्णञ्च मुखेन परिशुष्यता ॥१४४॥

चतुरन्तेन खट्वायाः परिवर्तं मुहुर्मुहुः ।
स मूढः क्षिप्यतेऽत्यर्थं हस्तपादानितस्ततः ॥१४५॥

खट्वातो वाञ्छते भूमिं भूमेः खट्वां पुनर्महीम् ।
विवस्त्रस्त्यक्तलज्जश्च मूत्रविष्ठानुलेपितः[५६] ॥१४६॥

कर्महरूको नाश भइरहँदा अत्यधिक अन्धकारमा फसेको प्राणीलाई मर्दा जुन दुःख हुन्छ त्यसको उपमा कहीँ छैन ।१४२।

मृत्युको समयमा हे बाबा !, हे आमा !, हे प्यारी भनेर अत्यन्त पीडाका साथ रुने गर्दछन् । सर्पले भ्यागुता निलेझैं मृत्युले मानिसलाई निल्दछ ।१४३।

---

५६ ग. लेपनः ।

CC0. In Public Domain. Digitization by eGangotri

बान्धवद्वारा आलिङ्गन गरिएको र प्रियजनबाट घेरिएको ऊ लामो र तातो सास फेर्दछ र मुख सुकिरहेको हुन्छ ।१४४।

खाटको चारै कुनामा पटक पटक कोल्टे फेर्छ र विमूढ भएको उसले यताउता हात र खुट्टा पछार्दछ ।१४५।

खाटबाट भूँइमा झर्न चाहन्छ, त्यहाँबाट फेरि खाटमा र फेरि भूँइमा झर्न खोज्छ । मल र मूत्रले लिपिएको ऊ लज्जाहीन र निर्वस्त्र बन्दछ ।१४६।

याचमानश्च सलिलं शुष्ककण्ठोष्ठतालुकः ।
चिन्तमानश्च वित्तानि कस्यैतानि मृते मयि ॥१४७॥

क्षणं पञ्चकतां भूयः[५७] कालपाशेन कर्षितः ।
म्रियते पश्यतामेव गले घुरुघुरायते ॥१४८॥

जीवस्तृणजलौकेव देहाद्देहं विशेत्क्रमात् ।
सम्प्राप्योत्तरमंशेन[५८] देहं त्यजतिपूर्वकम् ॥१४९॥

मरणा[५९]त्प्रार्थनादुःखमधिकं हि विवेकिनः ।
क्षणिकं मरणे दुःखमनन्तं प्रार्थनाकृतम् ॥१५०॥

जगताम्पतिरर्थित्वाद्विष्णुर्वामनताङ्गतः ।
अधिकः कोऽपरस्तस्माद्यो न यास्यति लाघवम् ॥१५१॥

ओठ, घाँटी र तालु सुक्दछन् र पानी माग्दै म मरेपछि यो धनसम्पत्ति कसले खाला भनेर चिन्ता गर्दछ ।१४७।

कालको पाशद्वारा तानिएको क्षणभरमै पञ्च महाभूतमा प्राप्त हुँदै घाँटी घर्‌घर् गर्दा गर्दै र आफन्तहरूले हेर्दा हेर्दै मर्दछ ।१४८।

घाँसे जुका एउटा बोटबाट अर्को बोटमा सरेझैं जीव एउटा शरीरबाट अर्को शरीरमा क्रमैसँग पस्दछ । पछिल्लो शरीरलाई आंशिकरूपमा प्राप्त गरेर अघिल्लो शरीरलाई त्यग्दछ ।१४९।

मानिसलाई मृत्युभन्दा पनि माग्नु धेरै पीडादायक हुन्छ । त्यसमा पनि विवेकीलाई त्यो पीडा अझै धेरै हुन्छ किनभने मृत्युको दुःख क्षणिक हुन्छ तर प्रार्थनाजन्य दुःखको अन्त्य हुँदैन ।१५०।

संसारका मालिक मानिने विष्णु बलिसँग माग्ने भएर पुट्के भए, उनी भन्दा ठूलो अरू को होला जसले माग्दा सानो हुनु पर्दैन ।१५१।

ज्ञातं मयेदमधुना मृतो भवति यद् गुरुः ।

---

५७ ग. खे नयञ्च बलात्भूयः । क, ख, ङ. खनन् पञ्चवटान्भूयः ।

५८ ग. मङ्गेन ।

५९ ग. नराणाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न परं प्रार्थयेद् भूयस्तृष्णा लाघवकारणम् ॥ १५२॥

आदौ दुःखं मध्यदुःखमन्ते दुःखञ्च दारुणम्[६०] ।
निसर्गादेवभूतानामिति दुःखपरम्परा ॥ १५३॥

वर्तमानान्यतीतानि दुःखान्येतानि यानि तु ।
नरा न भावयन्त्यज्ञा न विरज्यन्ति तेन ते ॥१५४॥

अत्याहारान्महादुःखमनाहारात्ततोऽधिकम् ।
तुलितं[६१] जीवितं कष्टमन्येऽप्येवं कुतः सुखम् ॥१५५॥

क्षुधा हि सर्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ।
सा चान्नौषधिमात्रेण क्षणमात्रं प्रशाम्यति ॥ १५६॥

मैले ऐले के थाहा पाएँ भने मानिस मर्दा बरु ठूलो हुन्छ, त्यसैले कसैसँग केही नमागोस् । तिर्सना लघुताको कारण हो ।१५२।

शुरुमा पनि दुःख, माझमा पनि दुःख र अन्तमा पनि दारुण दुःख हुन्छ । स्वाभाविकरूपमा प्राणीहरूमा दुःखपरम्परा विद्यमान रहन्छ ।१५३।

वर्तमान र अतीतका यी जो दुःखहरू छन् । अज्ञ मानिसहरूले तिनलाई बुझ्न सक्दैनन् । त्यसैले तिनीहरूलाई वैराग्य हुँदैन ।१५४।

धेरै खाँदा कष्ट हुन्छ भने नखाँदा पनि त्यसभन्दा बढी कष्ट हुन्छ । सन्तुलित जीवनमा पनि दुःख हुन्छ भने अन्यत्र सुख कहाँ होला ?।१५५।

सबै रोगहरूमा भोक नै सबैभन्दा ठूलो आन्तरिक रोग हो । त्यो अन्नरूपी औषधीको सेवनले एकक्षणमै शान्त हुन्छ ।१५६।

क्षुद्व्याधिवेदना तीव्रा निःशेषबलकृन्तनी ।
तयाभि[६२]भूतो म्रियते यथान्यैर्व्याधिभिर्नरः[६३] ॥१५७॥

तद्रसे मिहिका[६४] गन्धा जिह्वाग्रपरिवर्तिनी ।
तत्क्षणार्द्धार्द्धकालेन कण्ठं प्राप्य निवर्तते ॥ १५८॥

इति क्षुद्व्याधितप्तानामन्नौषधबलं स्मृतम् ।
न तत्सुखाय मन्तव्यं परमार्थेन पण्डितैः ॥ १५९॥

---

६० घ. एषा पङ्क्तिर्नास्ति ।

६१ क, ग. तुरितम् ।

६२ ग. ते यान्ति ।

६३ ग. व्याधितोर्नरः ।

६४ क. तद्रसेन्यहीका । ख, ङ . तद्रसे पिहिका । ग. तद्रसं मिहिका । घ. तद्रते हिका ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मृतोपमश्च यच्छेते सर्वकार्यविवर्जितः । CC-0. In Public Domain. Digitization by eGangotri
तत्रापि तु कुतः सौख्यं तमसाच्छादितात्मनः ॥१६०॥

प्रबोधेऽपि कुतः सौख्यं कार्यैरुपहतात्मनः ।
कृषिसेवाध्वगोरक्षावाणिज्यादिपरिश्रमैः ॥ १६१॥

भोकरूपी रोगबाट हुने वेदना अत्यन्त तीव्र हुन्छ। यसले सम्पूर्ण बललाई समाप्त गरिदिन्छ। जसरी अन्य रोग लाग्दा मानिस मर्दछ, त्यसै गरी भोकले पनि मर्दछ।१५७।

अन्नको रसमा विद्यमान शीतल तथा सुगन्धले युक्त औषधि जिब्राको अग्रभाग हुँदै घाँटीसम्म पुगेपछि आधाभन्दा पनि आधा क्षणमा भोक निवृत्त हुन्छ।१५८।

यसरी भोकरूपी रोगबाट ग्रस्त भएका मान्छेहरूको अन्नरूपी औषधी नै तागत हो । विद्वान्‌हरूले खानपानलाई वास्तविक रूपमा सुखका लागि मान्नु हुँदैन।१५९।

जब सबै काम छोडेर मरेझैं सुत्दछ, त्यसमा पनि अन्धकारले आत्मा आच्छन्न हुने भएकाले सुख कहाँ छ र।१६०।

कृषि, नोकरी, हिँडाइ, पशुपालन र व्यापार आदि श्रमहरूले गर्दा जागा रहँदा पनि कार्य व्यग्रताका कारण आहत हुने भएकाले सुख कहाँ हुन्छ र ?१६१।

प्रातः पुरीषमूत्राभ्यां मध्याह्ने तृड्बुभुक्षया ।
तृप्ता कामेन[६५] बाध्यन्ते निद्रया निशि जन्तवः ॥१६२॥

अर्थस्योपार्जने दुःखमर्जितस्य च रक्षणे ।
नाशे दुःखं व्यये दुःखमर्थेऽप्येवं कुतः सुखम् ॥१६३॥

चौरेभ्यः स्वजनादग्नेः सलिलात् पार्थिवादपि ।
भयमर्थवतान्नित्यं मृत्योर्देहभृतामिव ॥ १६४॥

खे यथा पक्षिभिर्मांसं भक्ष्यते श्वापदैर्भुवि ।
जले च भक्ष्यते मत्स्यैस्तथा सर्वत्र वित्तवान् ॥ १६५॥

विमोहयन्ति सम्पत्सु ताडयन्ति विपत्तिषु ।
खेदयन्त्यर्जनाकाले कदा भोगाः सुखावहाः ॥१६६॥

यश्चार्थपतिरुद्विग्नो यश्च सर्वार्थनिस्पृहः ।
तयोरर्थपतिर्दुःखी सुखी सर्वार्थनिस्पृहः ॥ १६७॥

बिहान मलमूत्र त्याग्दैमा, मध्याह्नमा भोक र प्यासले र तृप्त भइसकेपछि कामले र रातिमा निद्राले प्राणीहरू पीडित हुन्छन्।१६२।

---

६५ ग. तृप्ताहं येन।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पहिले आर्जन गर्न दुःख छ, आर्जेकालाई बचाउन दुःखै छ, त्यसको नाशमा पनि र खर्चमा पनि दुःख हुन्छ भने धनार्जनमा पनि सुख कहीं छैन ।१६३।

प्राणीहरूलाई मृत्युको डर भए झैं धनीहरूलाई चोर, आफन्त, अग्नि, पानी र राजा सबैबाट भय हुन्छ।१६४।

जसरी चराहरूले आकाशमा, स्याल र बाघ आदि चौपायाहरूले थलमा र मगरमच्छहरूले जलमा मासु खान्छन्, त्यसै गरी धनवान् पनि सर्वत्र लुटिन्छ ।१६५।

सम्पत्तिमा मोहित पार्दछन्, विपत्तिहरूमा प्रताडना दिन्छन्, कमाउने बेलामा पीडा दिन्छन् त्यसैले भोगहरू कहिले सुखप्रद हुन्छन् र ? १६६।

शीतेन दुःखं हेमन्ते ग्रीष्मे तापेन दारुणम् ।
वर्षासु वातवर्षाभ्यां कालेऽप्येवं कुतः सुखम् ।।१६८।।

विवाहे विस्तरं[६६] दुःखं तद्गर्भोद्वहने पुनः ।
प्रसवेऽपत्यदोषैश्च दुखं विष्ठादिकर्मभिः ।।१६९।।

दन्ताक्षिरोगः पुत्रस्य हा कष्टं किं करोम्यहम् ।
गावो नष्टा वृत्तिर्भग्नाः क्वाप्यश्वाः[६७] प्रपलायिताः ।।१७०।।

अमी प्राघुणकाः[६८] प्राप्ता भक्तच्छेदश्च मे गृहे ।
बालापत्या च मे भार्या कः करिष्यति राधनम् ।।१७१।।

प्रदेयकालः कन्यायाः कीदृशश्च वरो भवेत् ।
इति चिन्ताभिभूतानां कुतः सौख्यं कुटुम्बिनाम् ।।१७२।।

यौटा धनी पीडामा रहन्छ भने अर्को कुनै अर्थको चाहना राख्दैन, तिनीहरूमा धनी दुःखी नै हुन्छ भने कुनै अर्थको चाहना नराख्ने सुखी हुन्छ ।१६७।

हेमन्तमा जाडाले, ग्रीष्ममा प्रचण्ड गर्मीले, वर्षा ॠतुमा हावा र पानीले कष्ट दिन्छन् । त्यसैले कालमा पनि कतै सुख छैन ।१६८।

विवाहमा तामझामबाट, त्यसपछि गर्भधारणबाट र प्रसूतिमा बच्चाहरूका विष्ठा आदि अनेक दोषहरूबाट दुःखै दुःख छ ।१६९।

छोराका दाँत र आँखा दुःखे, अत्यन्त दुःख छ, म के गरूँ ? गाईहरू हराए, जागिर छुट्यो, घोडाहरू कतै भागे, यी पाहुनाहरू आए, घरमा चामलको गेडो छैन, पत्नी भरखरकी सुत्केरी छ, कसले चाँजोपाजो मिलाइदेला ? छोरीको विवाह गर्ने बेला भयो, कस्तो केटा भेटिने होला इत्यादि चिन्तामा परेका गृहस्थहरूलाई कहाँबाट सुख प्राप्त हुन सक्दछ र ?।१७०-१७२।

---

६६ ग. विस्तरैः ।
६७ ग. क्वधिं वा । क. कार्यश्वाः । घ. नकाप्यश्वाः ।
६८ घ. प्राघूणकाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुटुम्बचिन्ताकुलितस्य पुंसः श्रुतञ्च शीलञ्च गुणाश्च सर्वे ।
अपक्वकुम्भे निहिता इवापः प्रयान्ति देहेन समं विनाशम् ॥१७३॥

राज्येऽपि हि महद् दुःखं सन्धिविग्रहचिन्तया ।
पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम् ॥१७४॥

स्वजातीयाद् भयं प्रायः सर्वेषामेव देहिनाम् ।
एकद्रव्याभिलाषित्वाच्छुनामिव परस्परम् ॥१७५।

नाप्यधृष्य[६९]बलः कश्चिन्नृपः ख्यातोऽस्ति भूतले ।
निखिलं यत्तिरस्कृत्य सुखं तिष्ठति निर्भयः ॥१७६॥

युद्धे बाहुसहस्रं हि प्रपपात महीतले ।
श्रीमतः कार्तवीर्यस्य ऋषिपुत्रः प्रतापवान् ॥१७७॥

परिवारजनको भरण पोषणको चिन्ताले व्याकुल मानिसका शास्त्रश्रवण, शील तथा सबै गुणहरू नपकाएको माटाको घडामा राखेको पानीभैं शरीरसँगै विनष्ट हुन्छन् ।१७३।

राज्यमा पनि सन्धि र युद्धको ठूलो चिन्ता हुन्छ । जहाँ छोराबाट पनि डर हुन्छ, त्यहाँ कस्तो सुख हून्छ होला ? ।१७४।

सम्पूर्ण प्राणीहरूलाई यौटै वस्तुको चाहनाले गर्दा हाडका लागि कुकुरहरूलाई एक आपसमै डर भएभैं आफ्नै जातिकाहरूसँग सबभन्दा बढी डर हुने गर्दछ ।१७५।

यस संसारमा पराजित गर्ने नसकिने शक्ति सम्पन्न राजा प्रख्यात छैन, जो सबैलाई तिरस्कृत गरेर निडर भै आनन्दसँग बस्न सक्दछ ।१७६।

प्रतापी ऋषिपुत्र परशुरामबाट युद्धमा श्रीमान् कृतवीर्यपुत्र अर्जुनका हजार हात काटिएर भुँइमा खसालिए ।१७७।

ऋषिपुत्रस्य रामस्य रामो दशरथात्मजः ।
जघान वीर्यमतुलमूर्ध्वगं यन्महात्मनः ॥१७८।

जरासन्धेन रामस्य कृष्णत्वे नाशितं यशः ।
जरासन्धस्य भीमेन तस्यापि पवनात्मजः[७०] ॥१७९॥[७१]

हनुमानपि सूर्येण विक्षिप्तः पतितः क्षितौ ।
सूर्यः प्रतापयुक्तोऽपि मेघैः प्रच्छाद्यते क्वचित् ॥११८०॥

---

६९ ग. चापधृष्य ।

७० ग. भीमस्यापि हनूमता ।

७१ घ. पद्यमिदं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्षिप्यन्ते वायुना मेघा वायोर्वीर्यं नगैर्जितम् ।
दह्यन्ते वह्निभिः शैलाः स वह्निः शाम्यते जलैः ॥१८१॥

तज्जलं शोष्यते सूर्यैस्ते सूर्याः सह वारिणा ।
त्रैलोक्येन समेताश्च नश्यन्ति ब्रह्मणो दिने ॥१८२॥

तिनै महात्मा ऋषिपुत्र परशुरामको ऊर्ध्वगामी अतुल सामर्थ्यलाई दशरथपुत्र रामले समाप्त पारिदिए।१७८।

दशरथपुत्र रामको पनि कृष्णावतारमा जरासन्धले यश नष्ट गरिदिए भने जरासन्धको भीमले र भीमको हनुमान्ले शेखी झारिदिए।१७९।

ती हनुमान्लाई पनि सूर्यले समातेर पृथिवीमा पछारिदिए भने प्रतापी सूर्यलाई पनि कतै बादलहरूले नै ढाकिदिन्छन्।१८०।

सूर्यलाई तिरोहित गर्ने बादललाई वायुले उडाइदिन्छ। वायुको तागतलाई पहाडहरूले छेक्दछन्। पहाडलाई आगोले जलाइदिन्छ भने आगोलाई पानीले निभाइदिन्छ।१८१।

त्यस पानीलाई सूर्यहरूले सोस्छन् भने सूर्यहरू पनि पानी र तीन लोकसँगै ब्रह्माको एक दिन पूरा हुँदा नष्ट हुन्छन्।१८२।

ब्रह्मापि त्रिदशैः सार्द्धमुपसंह्रियते पुनः ।
परार्द्धद्वयकालान्ते शिवेन परमात्मना ॥१८३॥

एवं नास्ति स संसारे यस्य सर्वोत्तमं बलम् ।
विहायैकं जगन्नाथं परमात्मानमव्ययम् ॥१८४॥

ज्ञात्वा सातिशयं सर्वमभिमानं विवर्जयेत् ।
एवम्भूते जगत्यस्मिन् कः शूरः पण्डितोऽपि वा ॥१८५॥

नेहास्ति सर्ववित् कश्चिन् न च मूर्खश्च सर्वदा ।
यो यद्वस्तु विजानाति तेन तत्र स पण्डितः ॥१८६॥

न सर्वदा न सर्वत्र प्रभावः सदृशः स्मृतः ।
स्थितः[७२] सातिशयत्वेन प्रभावः कस्यचित् क्वचित् ॥१८७॥

दानवैनिर्जितादेवास्ते देवैर्निर्जिता पुनः ।
इत्यन्योन्यस्थितावेषां भोगौ जयपराजयौ ॥१८८॥

ब्रह्मा पनि देवताहरूका साथ दुई परार्ध कल्पका अन्तमा परमेश्वर भगवान् शिवद्वारा उपसंहृत हुन्छन्।१८३।

यौटा परमात्मा परमेश्वर अविनाशी जगदीश्वर शिवलाई छोडेर यस संसारमा अजेय वा सर्वाधिक बलशाली छैन।१८४।

---

७२ ग. स्थितिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यो सबै अतिशयताको विषयलाई बुझेर अहङ्कारलाई त्याग्नु पर्दछ। किनभने यस संसारमा सबैभदा ठूलो वीर वा विद्वान् को छ र ?।१८५।

यस संसारमा कुनै मानिस सर्वज्ञ छैन, न त कुनै सर्वथा मूर्ख नै हुन्छ। जसले जे जान्दछ, त्यो त्यस विषयको विद्वान् हो ।१८६।

सधैं सबै ठाउँ वा विषयमा एकनास प्रभाव कसैको पनि हुँदैन। कसैको कहीं वा कुनै विषयमा र कसैको कुनै विषयमा मात्र सर्वाधिक प्रभाव विद्यमान रहन्छ ।१८७।

निवातकवचाः सर्वे दानवा बलगर्विताः ।
निर्जितास्तेऽर्जुनेनैव गोपालैः सोऽपि निर्जितः ॥१८९॥

एवं वस्त्रयुगं[७३] राज्ञः प्रस्थमात्रान्नभोजनम् ।
पानं शय्यासनञ्चैकं शेषं दुःखाय केवलम् ॥१९०॥

सप्तभौमेऽपि भवने खट्वापादपरिग्रहः ।
उदकुम्भश्चवन्तीभ्यः[७४] क्लेशायान्यः प्रविस्तरः ॥१९१॥

प्रत्यूषे तूर्यनिर्घोषः समः सर्वनिवासिभिः ।
राज्ञोऽभिमानमात्रं हि ममैतद् वाद्यते गृहे ॥१९२॥

सर्वमाभरणम्भारः सर्वमालेपनं मलम् ।
सर्वं प्रलपितं गीतं नृत्यमुन्मत्तचेष्टितम् ॥१९३।

दैत्यहरूले देवताहरूलाई जिते फेरी देवताहरूले उनीहरूलाई जिते। यसरी यिनीहरूको एकआपसमा जय र पराजयको भोग निर्भर रहेको छ ।१८८।

अभेद्य ढाल लिएका अत्यन्त बलको घमण्ड भएका दानवहरूलाई अर्जुनले जितिदिए भने गोठालाहरूले अर्जुनलाई पनि परास्त गरिदिए। १८९।

यसरी राजाका लागि पनि एक जोड लुगा, एक सेर खानलाई अनाज, पिउनलाई पानी, सुत्नलाई यौटा बिछ्यौना र बस्नका लागि यौटा आसनमात्र राख्नु उपयुक्त हुन्छ। त्यस भन्दा बढी केवल कष्टका लागि हुन्छ ।१९०।

साततले घरमा पनि खाटको खुट्टा नसमाती उपाय छैन । मरेपछि दिइने अन्नजललाई चुहाउने सबै सम्पदाहरूको विस्तार कष्टका लागि मात्र हुने गर्दछ ।१९१।

सम्पूर्ण नगरवासीद्वारा बिहानै बाजागाजाको ध्वनि मेरो घरमा हुने गर्दछ भन्ने राजाको घमण्ड मात्र हो ।१९२।

इत्येवं राज्यसम्भोगैः कुतः सौख्यं विचारतः ।

---

७३ ग. वस्त्रषुगम् ।
७४ ग. चवन्तीभ्यः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
नृपाणां व्यग्रचित्तानामन्योन्यविजिगीषया[७५] ॥१९४॥

प्रायेण श्रीमदालेपा नहुषाद्या महानृपाः ।
स्वर्गं प्राप्यापि पतिताः कः श्रियां विन्दते सुखम् ॥१९५॥

स्वर्गेऽपि हि कुतः सौख्यं दृष्ट्वा दीप्तां परश्रियम्[७६] ।
उपर्युपरिदेवानामन्योऽन्यातिशयाः स्थिताः ॥[७७]१९६॥

नरैः पुण्यफलं स्वर्गे मूलच्छेदेन भुज्यते ।
न चान्यत् क्रियते कर्म सोऽत्र दोषः सुदारुणः ॥१९७॥

छिन्नमूलस्तरुर्यद्वदवश्यं पतति[७८] क्षितौ ।
तद्वत् पुण्यक्षयात् स्वर्गात्[७९] प्रपतन्ति दिवौकसः ॥१९८॥

सबै गहनाहरू भार हुन् । सबै चन्दन आदि द्रव्यलेपहरू मल हुन् । सबै गीतहरू बकवास हुन् भने सबै नाचहरू उन्मादपूर्ण चेष्टाहरू हुन् ।१९३।

उपर्युक्त रीतिले विचार गर्दा तथा एक अर्कालाई जित्ने इच्छाले गर्दा राज्यका भोगहरूमा पनि कतै कुनै सुख छैन ।१९४।

प्रायः सम्पत्तिको गर्वले पूर्ण नहुष प्रभृति महान् राजाहरू स्वर्ग पुगेर पनि झर्न विवश भए, श्रीसम्पदाहरूबाट कसले सुख पाएको छ र ? ।१९५।

अरूको श्रीसम्पदाको उत्कर्षलाई देखेर स्वर्गमा पनि कहाँ सुख सन्तोष पाइन्छ र ? त्यहाँ पनि देवताहरूमा माथि माथि पुग्नका लागि परस्परको अतिशयता विद्यमान छ ।१९६।

मनुष्यहरूले स्वर्गमा यहाँ गरेका सम्पूर्ण पुण्यहरूको फल भोग्न पाउँछन् तर थप पुण्य कर्म गर्न सक्दैनन् । त्यहाँको यही ठूलो खराबी छ ।१९७

सुखाभिलाषनिष्ठानां दुःखं भोगाभिसंप्लवात्[८०] ।
अकस्मात् पतनाद् दुःखं कष्टं स्वर्गे[८१] दिवौकसाम् ॥१९९॥

इति स्वर्गेऽपि देवानां नास्ति सौख्यं विचारतः ।
क्षयोच्चातिशयाच्छुद्धौ स्वर्गभोगीयकर्मणाम् ॥२००॥

तत्र कष्टं महादुःखं नरकाग्निषु देहिनाम् ।
घोरैश्चतुर्विधैः पापैर्वाङ्मनः कायकर्मभिः ॥१२०१॥

---

७५ ग. न्यातिशयाः स्थिताः ।
७६ ख. परिश्रियम् ।
७७ ग. १९५,१९६ इति पद्यद्वयं नास्ति ।
७८ घ. पतितः ।
७९ ग. स्वर्गे ।
८० ग. संक्षयात् ।
८१ ग. सर्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुठारैश्छेदनं तीव्रं वल्कलानाञ्च तक्षणम् ।
पर्णशाखाफलानाञ्च पातनञ्चोग्रवायुना ॥२०२॥

उन्मूलनं विमर्दश्च गजैरन्यैश्च देहिभिः ।
दावाग्निहिमशोषैश्च दुःखं स्थावरजातिषु ॥२०३॥

जसरी जरा काटिएको रुख अवश्यमेव भुँइमा लड्दछ, त्यसै गरी पुण्य सकिए पछि देवताहरू स्वर्गबाट सुनिश्चितरूपमै झर्दछन् ।१९८।

सुखको अभिलाषा राख्ने मानिसहरूलाई भोगहरू खलबलिनाले कष्ट हुन्छ भने स्वर्गबाट अकस्मात् झर्नुपर्ने भएकाले देवताहरूलाई पनि दुःख नै छ ।१९९।

यसरी विचार गर्दा स्वर्गमा देवताहरूलाई सुख छैन किनभने स्वर्गीय कर्महरूको शुद्धिमा क्षय र उच्चताको अतिशय रहने गर्दछ ।२००।

वाचिक, मानसिक, कायिक र कार्मिक चार प्रकारका डरलाग्दा पापहरूले गर्दा प्राणीहरूलाई नरकरूपी अग्निहरूमा ठूलाठूला दुःखकष्टहरू हुन्छन् ।२०१।

बन्चराहरूद्वारा काटिनु र बोक्राहरू ताछ्निु तथा तेज हावाद्वारा पात झारिनु, हाँगा भाँचिनु र फलहरू खसालिनु, हात्ती तथा अन्य प्राणीहरूद्वारा उखेलिनु, अस्तव्यस्त पारिनु, डढेलो लाग्नु र हिउँले खानु आदि अनेक दुःखहरू स्थावर जीवहरूमा पनि देखिन्छन् ।२०२-२०३।

तृड्बुभुक्षा च सर्पाणां क्रोधदुःखञ्च दारुणम् ।
दृष्ट्वा तद्यातनं[८२] लोके पाशेन च निबन्धनम् ॥२०४॥

अकस्माज्जन्ममरणं कीटानाञ्च मुहुर्मुहुः ।
सरीसृपनिकायानामेवं दुःखान्यनेकधा ॥२०५॥

वर्षाशीतातपैर्दुःखं सुकष्टं मृगपक्षिणाम् ।
क्षुत्तृष्णाक्लेशादिभिश्च[८३] भयत्रस्ताः सदा मृगाः ॥२०६॥

क्षुत्तृषादिदमनञ्च[८४] वधबन्धनताडनम् ।
नासावेधेन सन्त्रासः प्रतोदकशघातनम् ॥२०७॥[८५]

वेणुकुन्तादिनिगडं मुहुरङ्कुशवाधनम् ।
भारोद्वहनसंक्लेशः शिक्षायुद्धादिपीडनम् ॥२०८।

भोक, प्यास र रीसका साथ साथै देख्नासाथ मान्छे गरुड आदिद्वारा मारिनु र सपेराहरूद्वारा बन्धनमा पारिनु

---

८२ ग. घातनम्

८३ क, घ. क्षुत्तृष्णाभयादिभिः ।

८४ ख. तमनसाम् । ग. मन्तश्च ।

८५ घ. पङ्क्तिरियं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
आदि अनेक दुःख सर्पको जुनीमा पनि रहेका छन् ।२०४।

अकस्मात् पटक पटक जन्मनु मर्नु आदि दुःख कीराको जुनीमा र अनेक घम्रने प्राणीहरूको जुनीमा अगणनीय दुःखहरू रहेका छन् ।२०५।

मृग तथा पक्षिजातिमा पनि वर्षा, जाडो र गर्मीका साथै भोक, प्यास आदिले अत्यधिक कष्ट हुने गर्दछन् भने मृगहरू सधैं भयभीत रहन्छन् ।२०६।

भोक, प्यास, दमन, वध, बन्धन, पिटाइ, नाक छेड्नुको डर, अङ्कुश र कोर्राको कुटाइ बाँसका किला तथा भालाहरूको गडाइ, पटक पटक अङ्कुशको बाधा, भार बोकाइको पीडा, तालिम तथा युद्धादिको पीडा आफ्नो बगालबाट विछोड, बलपूर्वक घिसारिनु र बाँधिनु,

आत्मयूथवियोगश्च बला[८६]नयनबन्धनम् ।
पशुनागनिकायानामेवं दुःखान्यनेकधा ।।२०९।।

गर्भवासे महद् दुःखं जन्मदुःखं तथा नृणाम् ।
बाल्ये च दुःखमज्ञानं[८७] कौमारे गुरुशासनात् ।।२१०।।

यौवने कामरागाभ्यां दुःखं चैवेर्ष्यया पुनः ।
कृषिवाणिज्यसेवाध्वगोरक्षाद्यैश्च कर्मभिः ।।२११।।

बृद्धभावे च जरया व्याधिभिश्च प्रपीडितम् ।
मरणे च महद् दुःखं प्रार्थनायान्तथाधिकम् ।।२१२।।

राजाग्निजलदायादाच्चौरशत्रुभयं महत् ।
अर्थस्यार्जनरक्षार्थं दुःखं नाशे व्यये पुनः ।।२१३।।

पशु विशेष गरेर हात्ती जातिका प्राणीहरूका लागि यस्ता अनेक कष्टहरू हुने गर्दछन् ।२०७-२०९।

मानिसहरूलाई गर्भवासमा निकै दुःख हुन्छ भने जन्मदा त्यसभन्दा बढी कष्ट हुन्छ। बचपनमा अज्ञताबाट र किशोरावस्थामा गुरुको शासनबाट दुःख हुन्छ ।२१०।

जवानीमा काम, प्रेम र ईर्ष्याद्वारा र खेती, व्यापार, जागिर तथा पशुपालन आदि कामहरूद्वारा दुःख हुन्छ ।२११।

वृद्धावस्थामा बुढापा र रोगहरूले कष्ट दिन्छन् भने मृत्यु त्यसभन्दा पनि ठूलो कष्टकर हुन्छ। मृत्यु भन्दा पनि कष्टकर याचना हुन्छ ।२१२।

धन कमाएपछि पनि राजा, आगो, पानी, बन्धुबान्धव, चोर तथा शत्रुबाट जोगाउन दुःख हुन्छ। त्यस धनको विनाश तथा खर्चमा पनि दुःखै हुन्छ ।२१३।

---

८६ ग. वील ।
८७ ग. मज्ञानम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कार्पण्यं मत्सरो दम्भः तृष्णाधिक्यं भयं मदः ।
CC0. In Public Domain. Digitization by eGangotri
अकार्ये सम्प्रवृत्तिश्च दुःखानि धनिनां सदा ॥२१४॥

भृतिर्वृत्तिः कुसीदञ्च[८८] दासत्वं परतन्त्रता ।
इष्टानिष्टैर्वियोगश्च संयोगश्च सहस्रशः ॥२१५॥

दुर्भिक्षं दुर्भगत्वञ्च मूर्खत्वञ्च दरिद्रता ।
अधरोत्तरभावश्च[८९] मरकं राष्ट्रविभ्रमः ॥२१६॥

अन्योन्यातिशयाद् दुःखमन्योन्याभिभवात् पुनः ।
अन्तर्बहिः प्रकोपाश्च राज्ये दुःखं महीभृताम् ॥२१७॥

अनित्यता च भावानामच्छूपाणाञ्च यातनम्[९०] ।
अन्योन्यं स्यान्महीयस्त्वमन्योन्यञ्चापि भक्षणम्[९१] ॥२१८॥

इत्येवमादिभिर्दुःखैर्यस्माद् व्याप्तं चराचरम् ।
निरयादिमनुष्यान्तं तस्मात्सर्वं जयेद् बुधः ॥ २१९॥

दरिद्रता, ईर्ष्या, तिर्सनाको बहुलता, डर, मद, कुकार्यमा संलग्नता आदि धनिहरूका लागि सधैं कष्टकर हुन्छन् ।२१४।

सेवकत्व, नोकरी, व्याजमा धन ल्याउनु, दासता, पराधीनता, इष्टहरूसँगको वियोग, अनिष्टको योग आदि हजारौं कष्ट हुन्छन् ।२१५।

भोकमरी, कुरूपता, मूर्खता, दरिद्रता, उच्च र नीचभाव, मृत्यु र राष्ट्रविप्लव एक आपसमा वडप्पन र एक आपसको जयपराजय का साथै आन्तरिक र बाह्य प्रकोपहरू राज्यमा राजाहरूका लागि कष्टकर हुन्छन् ।२१६-२१७।

स्कन्धात् स्कन्धं नयन्[९२] भारं विश्राम्य[९३] मन्यते यथा ।
तद्वत्सर्वमिदं लोके दुःखं दुःखेन शाम्यते ॥२२०॥

अन्योन्यातिशयात्पाताभिभवाद्[९४] भोगसम्प्लवात् ।
धर्मक्षयाच्च देवानां दिवि दुःखमवस्थितम्[९५] ॥२२१॥

---

८८ ग. भृतिर्धृतिः कुसीदश्च ।
८९ क, ग, घ, ङ. अधरोत्तरभागश्च ।
९० ग. भावानामधुपानाञ्च । घ. भावानामच्छ्र्याणाञ्च पातकम् ।
९१ ग. अन्योन्यस्मान्महीयस्त्वमन्योन्यश्चापि लक्षणम् ।
९२ ग. स्कन्धात् क्वचिन्नयन् । ङ. स्कन्धात् स्कन्धं नयेत् ।
९३ ग. विश्रामम् ।
९४ ग. पापाभिभवाद् ।
९५ ग. मवन्तितम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
नानायोनिसहस्रेषु सम्भवः पुण्यसंक्षयात् ।
रोगाश्च विविधाकारा देवलोकेऽपि संस्थिताः ॥२२२॥

यज्ञस्य हि शिरच्छिन्नमश्विभ्यां संहितं पुनः ।
तेन दोषेण यज्ञस्य शिरोरोगः सदैव हि ॥२२३॥

भावहरूको अनित्यता तथा राक्षसहरूबाट पाइने यातना, एक अर्काप्रतिको बडप्पन र एउटाले अर्कोलाई खाने यस प्रकारका अनेकौं दुःखहरूबाट सबै नरकदेखि मनुष्यसम्म सम्पूर्ण स्थावर र जङ्गम व्याप्त छन् । त्यसैले विद्वान्ले यी सबैलाई जित्नु पर्दछ २१८-२१९।

एउटा काँधबाट अर्को काँधमा भार सार्दा जसरी विश्राम भएको मानिन्छ त्यसैगरी यस दुनियामा यो सबै दुःख दुःखद्वारानै शान्त गरिन्छ ।२२०।

एक अर्कासँग अधिक देखिने चाहना, एक अर्कासँग पराजय र तिरस्कार, भोगहरूमा डुबाइ तथा पुण्यको नाशले गर्दा स्वर्गमा पनि देवताहरूलाई कष्ट रहन्छ ।२२१।

पुण्यको नाश हुँदा हजारौं जुनीमा जन्म पर्दा र रोग लाग्दा अनेक किसिमका कष्ट स्वर्गलोकमा पनि विद्यमान रहन्छन् ।२२२।

यज्ञको काटिएको टाउको अश्विनीकुमारहरूले जोडिदिए । त्यस दोषले गर्दा यज्ञको सधैं टाउको दुखिरहन्छ ।२२३।

मार्तण्डभानोः कुष्ठञ्च वरुणस्य जलोदरम् ।
पूष्णो दशनवैकल्यं भुजस्तम्भः शचीपतेः ॥२२४॥

क्षयरोगश्च सुमहान् सोमस्य परिकीर्तितः ।
ज्वरश्च सुमहानासीद् दक्षस्यापि प्रजापतेः ॥२२५॥

कल्पे कल्पेऽपि देवानां महतामपि संक्षयः ।
परार्द्धद्वयकाले च ब्रह्मणश्चाप्यनित्यता ॥२२६।

दक्षदुहितर[९६] पौत्रीं ब्रह्मा कामितवान् पुनः ।
क्रोधेन च जयां देवीं योगस्थां शप्तवान् पुनः[९७] ॥२२७॥

कामक्रोधौ स्थितौ यत्र तत्र दोषास्तदात्मकाः ।
दुःखानि च समस्तानि संस्थितानि न संशयः ॥२२८॥

विष्णोश्च जन्ममरणं मायावित्वञ्च सर्वतः ।
स्त्रीवधः कामसक्तिश्च सारथ्यम्पाण्डवे बले ॥२२९॥

---

९६ घ. तक्षदुहितरं ।
९७ ग. प्रभुः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri.

मार्तण्डनामक सूर्यलाई कुष्ठरोग, वरुणलाई जलोदर, सूर्यको दाँत बिग्रिनु, इन्द्रको भुजस्तम्भ चन्द्रमालाई क्षयरोग र दक्षप्रजापतिलाई ठूलो जरो आएको थियो ।२२४-२२५।

कल्प कल्पमा ठूला देवताहरूको पनि नाश हुन्छ भने दुई परार्द्ध समय वितेपछि ब्रह्मा पनि मर्दछन्। त्यसैले यिनी सबै अनित्य छन् ।२२६।

ब्रह्माले दक्षकी छोरी आफ्नी नातिनीलाई चाहेका थिए भने रीसले योगमा रहेकी जया देवीलाई सरापेका थिए ।२२७।

जहाँ काम र क्रोध रहन्छन् त्यहाँ तिनीहरूसँग सम्बद्ध दोषहरू र समस्त दुःखहरू पनि रहन्छन्। त्यसमा कुनै संशय छैन ।२२८।

विष्णुलाई पनि जन्म र मृत्युको फल भोग्नु पर्छ र उनमा मायाविता, स्त्रीवध र कामासक्तिजस्ता दोषहरू छन् भने पाण्डवको सेनामा सारथि समेत रहनुपरेको थियो ।२२९।

रुद्रेण त्रिपुरं दग्धं दक्षयज्ञश्च नाशितः ।
स्कन्दस्य जन्म तच्छ्रुत्वा क्रीडाश्चान्याः सहस्रशः ॥२३०॥

एवं त्रयोऽपि रागाद्यैर्दोषैर्देवाः समन्विताः ।
एभ्यः परः शिवः शान्तः परिपूर्णः स[९८] मुक्तिदः ॥२३१॥

एवमेतज्जगत्सर्वमन्योन्यातिशये स्थितम् ।
दुःखैराकुलितं ज्ञात्वा निर्वेदं परमं व्रजेत् ॥२३२॥

निर्वेदाच्च विरागः स्याद् विरागाज्ज्ञानसम्भवः ।
ज्ञानेन तत्परं ज्ञात्वा शिवमुक्तिमवाप्नुयात्[९९] ॥२३३॥

समस्तदुःखनिर्मुक्तः स्वस्थात्मा स सुखी सदा ।
सर्वज्ञः परिपूर्णश्च मुक्तः इत्यभिधीयते ॥२३४॥

इति श्री शिवधर्मोत्तरे संसारगतिर्नामाष्टमोऽध्यायः ।

रुद्रले त्रिपुर जलाएका थिए, दक्षको यज्ञ नाश गरेका थिए भने स्कन्द जन्मेको सुनेर अन्य हजारौं क्रीडाहरू गरेका थिए ।२३०।

यसरी ठूला भनिएका ब्रह्मा , विष्णु र रुद्रदेवहरूमा पनि रागादि दोष रहेका छन् । यिनीहरू भन्दा माथि भगवान् शिव शान्त र परिपूर्ण रूपमा रहेका छन् र उनले नै मुक्तिप्रदान गर्दछन् ।२३१।

---

९८ ग. परिपूर्णश्तु ।

९९ ग. शिवमुक्तिन्तदाप्नुयात् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यसरी यो संसार एक अर्कासँग उत्कृष्ट हुनका लागि दुःखै दुःखले परिपूर्ण बनेको छ। यो सबै जानेर परम निर्वेदलाई प्राप्त गर्नु पर्दछ।२३२।

निर्वेदबाट वैराग्य र वैराग्यबाट ज्ञान प्राप्त हुन्छ। ज्ञानबाट परम शिवसायुज्य प्राप्त गर्न सकिन्छ।२३३।

सम्पूर्ण दुःखहरूबाट नितान्त मुक्त, आफ्नै आत्मामा रमाउने, सदा सुखी, सर्वज्ञ र परिपूर्णलाई मुक्त भनिन्छ।२३४।

यस शिवधर्मोत्तरमा संसारगति नाम गरेको आठौं अध्याय समाप्त भयो।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ स्वर्गनारकचिह्ननिरूपणं नाम नवमोऽध्यायः

अथ स्वर्गभोगमनुभूय नराः क्षीणपुण्यास्तद्वासनानुभवादिमं लोकमागत्य शुभदेश-जाति-कुल-रूपायुः श्रुत- प्रज्ञा- शील- शौच- सत्य- दम- दान- दया- दाक्षिण्य- क्षमारोग्य- सत्त्व- बलोत्साह- प्रभावः[१] प्रधान- धन- धान्य- रत्न- यान- वाहन- हर्म्य- प्रासाद-गीत- नृत्य- वाद्य- कला- सुख- शय्यासन- मिष्टान्न[२]- पान- सुगन्धवास- स्त्रीरत्न-पुत्र-पशु-वस्त्रालङ्कार-हिरण्य-मही-भोगाईतनावसथ-सभा-सत्रप्रपाराम-तडाग-दीर्घिका-कूपोद्यान-देव-द्विज-गुरु-विद्या-विनीतः साधु- तपस्वि- पूजा- सत्कारानुष्ठानाभिरतस्तपः- स्वाध्याय-ध्यान-ज्ञानापवर्ग-स्वर्ग[३]-कथाभिरामश्च भवतीति तस्माद्युक्तञ्च[४] स्वर्गीयं कर्म कर्तुं वक्तुञ्च[५] ।१।

अब स्वर्गनरकचिह्न नाम गरेको नवौं अध्याय प्रारम्भ हुन्छ।

मानिसहरू स्वर्ग सुखको अनुभव गरेर पुण्य समाप्त भएपछि त्यस पुण्यको वासना र अनुभवले पुनः यस पृथ्वीलोकमा आएर राम्रो देश, असल जाति, उच्च कुल, रूप, आयु, शास्त्राध्ययन, प्रज्ञा, शील, पवित्रता, सत्य, इन्द्रियहरू बशीकरण, दान, दया, दाक्षिण्य, क्षमा, आरोग्य, सत्त्व गुण, बल तथा उत्साहका प्रभावले प्रधान, धन, धान्य, रत्न, सवारी साधन, घोडा गाडी, महल, दरबार, गीत, नृत्य, वाद्य, कला, सुख, शय्या, आसन, मिष्टान्न, राम्रो पेय, सुगन्ध, अत्तर, स्त्रीरत्न, पुत्र, पशु, वस्त्र, आभूषण, सुन, भूमि, भोगका विस्तृत आश्रयहरू, वस्तीहरू, सभा, यज्ञ, पँधेरो, बगैंचा, तलाउ, पोखरी, कुवा, उद्यान, देवता, ब्राह्मण तथा गुरुहरूप्रति विद्याले विनम्र साधु, तपस्वी, पूजा तथा सत्कार आदि कार्यमा संलग्न तपस्या, स्वाध्याय, ज्ञान, धर्म, अर्थ, काम, मोक्ष एवं स्वर्गका कथाहरूले मनोज्ञ हुन्छ। त्यसैले स्वर्गीय कर्म गर्नु र त्यसको बयान गर्नु उपयुक्त हुन्छ।१।

धर्माद्राज्यं[६] धनं सौख्यमधर्माद् दुःखसम्भवः ।
तस्माद् धर्मं[७] सुखार्थाय कुर्यात्पापञ्च वर्जयेत् ॥२॥

लोकद्वयेऽपि यत्सौख्यं धर्मात्तत्प्राप्यते यतः ।
धर्ममेवमतः कुर्यात्सर्वकामार्थसिद्धये ॥३॥

मुहूर्त्तमपि जीवेत नरः शुक्लेन कर्मणा ।
न कल्पमपि कृष्णेन लोकद्वयविरोधिना ॥४॥

---

१ क, घ. प्रभाव।
२ क, ग, घ ङ. मृष्टान्न।
३ ख. स्वर्ग इति नास्ति।
४ क, ख, घ. तस्माद्युक्तम्। ङ. तस्मादुक्तम्
५ ग. कर्तुञ्च वस्तुतः।
६ ग. धर्माद्रक्ष्यम्।
७ घ. धर्माधर्म।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ नरकेषु नराः केन पापेन कर्मणा यातना विचित्राः कष्टाश्चानुभूय भूमिभागमागच्छन्ति[८] ।५।

ततः पापशेषेण वृक्ष-कीट-मृग-पक्षि[९]-पशुजाति-लक्षणैः प्रत्यक्ष नरकेषु पुनर्दुःखान्यनुभवन्ति ।६।

धर्मबाट राज्य, धन तथा सुख र अधर्मबाट दुःख हुन्छ त्यसैले सुखका निमित्त धर्म गर्नु पर्दछ र पापलाई त्याग्नु पर्दछ ।२।

धर्मबाट नै यसलोक र परलोक दुबैमा सुख पाइन्छ त्यसैले सबै चाहनाहरू र पुरुषार्थहरूका सिद्धिका निमित्त धर्म गर्नु पर्दछ ।३।

मानिस एक क्षण पनि राम्रा कामहरू गरेर बाँचोस् । तर यसलोक र परलोकको विरोधि नराम्रो काम गरेर कल्पसम्म पनि नबाँचोस् ।४।

नरकहरूमा मानिसहरूले कुन पापकर्मले कस्ता किसिमका यातनायुक्त कष्टहरूलाई अनुभव गरेर यस भूमिमा आउँछन् ? ५।

त्यसपछि शेष पापका कारणले वृक्ष, कीरा, मृग, पक्षी, पशु आदि जातिका लक्षणले युक्त भएर प्रत्यक्ष नरकहरूमा फेरि पनि दुःखको अनुभव गर्दछन् ।६।

ततः क्षीणावशिष्टपापास्तद्वासनामात्रानुभावादेतैर्लक्षणैर्मनुष्यजातौ जायन्ते ।७।

तद्यथा - ब्रह्महा क्षयी, सुरापः श्यावदन्तः[१०], सुवर्णचौरः कुनखी, दुश्चर्मा गुरुतल्पगः, तत्परिवादश्रवणाद्[११] बधिरः, स्वयमनुकीर्तनात् खरः, श्वा निन्दकः[१२], प्रतिहन्ता गुरोरपस्मारी, तदाज्ञाभङ्गाद् भगन्दरी, मत्सरी च भवेत् कृमिः, अवज्ञाकारी चान्धः, कृमिः गुरुकार्योत्प्रेक्षी[१३], दुष्प्रज्ञस्तत्कर्मणि शठः कृकलाशः[१४], कुपितमक्षमापय्य[१५] गुरुमपक्रामतः शिरोरोगः[१६], एते गुरुकर्म- विपाकाः ।८।

श्वपचः चाण्डालः पतितः पापिष्ठः[१७], रजस्वला[१८] संव्यवहार्यन्त्यजातिः[१९] , श्वित्री वस्त्रापहारी, अग्निदः कुष्ठी, रजतापहारी दर्दुरः, कूटसाक्षी मुखरोगी, मातापितृगुरुतपस्विव्याधित -बालवृद्धार्त्तशरणागतत्यागी अनिमित्ततः[२०] पादाक्षिरोगी, प्रतिज्ञाय ब्राह्मणस्यादानादल्पायुः,

---

८ ग. भूमिमभ्यागच्छन्ति ।

९ ग. पक्षी इति नास्ति ।

१० ख, ग. श्यामदन्तः ।

११ क, घ, ङ. तद्वादपरिश्रवणाद् । ग. तदपवादपरिश्रवणाद् ।

१२ ख, ग. आनिन्दकः ।

१३ ग. कार्योपेक्षी ।

१४ ख, ग. कृकलासः ।

१५ ख, ग. कुपितमक्षमाप्य ।

१६ घ. शिरोरोगी ।

१७ घ. पापिष्ठो ।

१८ ग. द्विजखराः ।

१९ ख. संव्यवहार्थं त्यजति ।

२० ख. निमित्तदः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्यसपछि सकिएर केही बचेका पापहरू र ती पापहरूको वासना मात्रको अनुभवले अघो निर्दिष्ट लक्षणले युक्त भएर मनुष्य जातिमा जन्मन्छन् ।७।

जस्तै- ब्रह्महत्यारो क्षयरोगी, मदिरा पिउने दाँत कालो हुने रोगले युक्त, सुन चोर नराम्रो नङ भएको, गुरुको बिछ्यौनामा(मान्य स्त्री समागम गर्ने) जाने चर्मरोगी, गुरुको निन्दा सुन्नाले बहिरो, स्वयं गुरुको निन्दा सुनेर अरूलाई सुनाउने गधा, निन्दा गर्ने कुकुर, गुरुलाई हान्ने मृगी रोगले युक्त, आदेश नमान्ने भगन्दर रोगले युक्त, गुरुको ईर्ष्या गर्ने कीरो, तिरस्कार गर्ने अन्धा, गुरुका कार्यको उपेक्षा गर्ने कीरो, गुरुका काममा धूर्त्याइँ गर्ने दुर्बुद्धि छेपारो, रीस र दम्भले युक्त भएर गुरुको अतिक्रमण गर्ने व्यक्ति टाउकाको रोगी हुन्छ । यी गुरुकर्मका परिणाम हुन् ।८।

पतित पापी तथा कुकुर खाने चण्डाल हुन्छ । रजस्वलासँग व्यवहार गर्ने शूद्र हुन्छ । लुगा चोर्ने सेतो कोढले युक्त, आगलागि गर्ने कोढी, चाँदी चोर्ने भ्यागुतो र झूटो गवाही दिने मानिस

तद्वृत्यपहारी दामगर्भान्तःपाकी, प्रपानाशकनैष्ठिक- प्रतिनिर्वृत्तः सदारोगी, पत्नीबहुत्वे सत्येकरमः ल्कीबः, स्वामिना धर्मे नियुक्तस्तदनुष्ठानसत्कार- पूजाप्रदानादिषु शाठ्यव्यवहारी जलोदरी, दुर्बलबधे बलवतः समुत्प्रेक्षादङ्गहीनत्वम्, अन्नहार्यजीर्ण- व्यवहारपक्षपाती जिह्वारोगी, स्वयं प्रवर्तितव्रतधर्मानुष्ठानविच्छेदिनः प्रतिपत्तिषु वियोगः,[२१] स्वयमग्रभुग्गलरोगी [२२], अकृतपञ्चमहायज्ञभोगी विड्वराहः, पर्वमैथुनी प्रमेही, स्वदारेभ्योऽन्यत्र दीव्यतः केशाल्पत्वम्, परिक्षीणमित्रबन्धुस्वामिसाधुजनावमन्ता परिभूतकष्टवृत्तिः क्षीणवृत्ते- रप्यतिथिमनश्नतः कपोलपिटकः, सूर्योढस्या[२३]प्रतिश्रयदानादिष्टपत्नीवियोगः, छद्मना गुरुस्वामि- मित्रमुपचरतः प्राप्तार्थपरिभ्रंशः, विश्रम्भापहारी सर्वःदुःखाश्रयी, मिथ्यागुणैरात्मोपकर्षी[२४] वामनः,

मुखरोगी हुन्छ । विना कारण आमा, बुबा, गुरु, तपस्वी, रोगी, बालक, वृद्ध, पीडित र शरणमा आएका व्यक्तिहरूको परित्याग गर्ने मानिस खुट्टा र आँखाको रोगले युक्त हुन्छ । दिन्छु भनी प्रतिज्ञा गरेर ब्राह्मणलाई नदिंदा अल्पायु हुन्छ । ब्राह्मणको वृत्ति हरण गर्ने लहरे र गर्भैदेखि भित्री पाकेका फोडाहरूले युक्त हुन्छ । पौशाला नष्ट गर्ने र लिएको ब्रतबाट पछि हट्ने सँधै रोगी हुन्छ । धैरै पत्नी राख्ने तर यौटामा मात्र रमाउने नपुंसक तथा मालिकले धर्मकार्य सम्पादनका लागि नियुक्त गरे तापनि उसको धार्मिक अनुष्ठान सत्कार र पूजासम्भार प्रदान गर्ने आदि काममा धूर्त्याइ गर्ने मानिस जलोदर रोगले ग्रस्त हुन्छ । बलवान्को उक्साहटमा दुर्बलको वध गर्दा अङ्गहीनता हुन्छ । अन्नचोर तथा अजीर्ण हुदासम्म भोजनको पक्षपाती जीब्राको रोगी हुन्छ । स्वयं शुरु गर्‍याएको व्रत वा धार्मिक अनुष्ठानको परित्याग गर्ने मानिसको कार्यसिद्धिमा वियोग हुन्छ । खञ्चुवा मानिसलाई गलरोग लाग्छ । पञ्चमहायज्ञ विनानै भोजन गर्ने व्यक्ति सुँगुर हुन्छ । पर्वमा मैथुन गर्ने मानिसलाई प्रमेहरोग र आफ्नी पत्नीबाहेक अन्यत्र खेल्ने मानिस गञ्जा (केश नभएको) हुन्छ । धनहीन मित्र, बन्धु, स्वामी र साधुहरूको अपमान गर्ने तिरस्कृत र कष्टपूर्ण जीविकोपायले युक्त हुन्छ । धनहीन भए पनि अतिथिलाई नखुवाउनेको घाँटीमा फोडा हुन्छ । सूर्यास्तको समयमा आएको अतिथिलाई आश्रय नदिंदा इष्टजन वा पत्नीसँग वियोग हुन्छ । गुरु, स्वामी र मित्रको सेवा गर्दा छल गर्ने मानिसले पाएको धन नष्ट हुन्छ । विश्वासघात गर्ने सम्पूर्ण दुःखको आश्रय बन्दछ । असत्य गुण देखाएर आफूलाई उत्कृष्ट देखाउने मानिस पुड्को हुन्छ ।

---

२१ क. प्रतिपत्तिष्ववियोगः । ख, ङ. स्वनियोगिनः । ग. प्रतिपत्नीष्ववियोगः ।

२२ ग. अग्रहितुर्गलरोगी ।

२३ ख. सूर्योदयस्या ।

२४ ग. रात्मापकर्षी ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गोपृष्ठयायी[२५] कटलुती, गोघ्नो जात्यन्धः, गोदुःखकारी गोनासः, गोनिर्दयश्चिपिटनासः , निस्तेजस्कः सभायां गलगण्डी, क्रोधनश्चण्डालः, पिशुनः पूतिनासिकः, सूचकः[२६] पूतिवक्त्रः, त्रपुचमरसीसहंसाजैडकाशेषविक्रयी मृगव्याधः, कुण्डाशी भृतकः, तैलिको नास्तिकः, रङ्गोपजीवी[२७] अभक्ष्यभक्षी , गण्डमाली अप्रतिरूपव्यवहारदर्शी, ज्ञानमन्यायतः प्रतिगृह्णन् मूकः, पुस्तकहार्यन्धः, पुण्यकथाक्षेपको वक्रनासः, शिष्टाचीर्णधर्मदूषकः, केकराक्षः साधुतपस्विदेवतन्त्रद्विजातिज्ञानयोगद्वेष्टावक्रास्यः[२८],पुण्यदानप्रवृत्तप्रतिषेधककृमिदन्ती,देवब्रह्मस्वापहारकोवान्ताशी, तडागाराम- भेत्ताङ्गहीनः[२९], प्रभुसुरादिव्यवस्थासमयभेदकस्तस्कराणामवरक्षिताव्यवहारेषु माध्यस्थान्[३०] छलग्राह्यजितभृत्यः,

गाई गोरुमा चढ्ने मान्छेको पिठ्युमा फोडा हुन्छ। गोहत्यारा जन्मान्ध र गाईलाई दुःख दिनेको नाक गाईको जस्तो हुन्छ। गाईलाई दया नगर्नेको नाक चेप्टो हुन्छ। सभामा अरूलाई नीचा देखाउँनेको गाँड आउँछ। रिसाहा चण्डाल हुन्छ। अर्काको कुरा लाउनेको नाक गन्हाउँछ। गुप्त सूचना दिनेको मुख गन्हाउँछ। राङ, चमर, सीसा, हाँस, बाख्रा, भेडा आदि धातु, पक्षी वा पशु सबैको बिक्री गर्ने शिकारी हुन्छ। जारका छोराको घरमा खाने नोकर हुन्छ। नास्तिक तेल बेच्ने हुन्छ। अभक्ष्यभक्षण गर्ने मानिसको जीविका रङ्गमञ्चको कामबाट चल्दछ। समान व्यवहारलाई पनि असमान व्यवहार देख्नेको घाँटीमा खटिराको माला हुन्छ। अन्यायपूर्वक ज्ञानार्जन गर्ने लाटो हुन्छ। पुस्तक चोर अन्धा हुन्छ। पुण्यकथाहरूमा आक्षेप गर्नेको नाक टेढो हुन्छ। शिष्टद्वारा नभनिएकै अर्थात् शिष्टसम्मत धर्ममा दोष देखाउने डेढो हुन्छ। साधु, तपस्वी, देवता, ब्राह्मण, ज्ञान र योगमा द्वेष राख्नेको मुख बाङ्गो हुन्छ। पुण्यपूर्वक दान गर्न लागेका मानिसलाई रोक्नेका दाँतमा कीरा पर्दछन्। देवता र ब्राह्मणका धनको अपहरण गर्ने मानिसले वान्ता खान्छ। तलाउ र बगैंचा भेदन गर्ने अङ्गहीन हुन्छ। मालिक तथा देवताहरूको व्यवस्था र समयको अतिक्रमण गर्ने, चोरहरूलाई सुरक्षा प्रदान गर्ने र व्यवहारहरूमा अमध्यस्थलाई छलपूर्वक मध्यस्थ गर्न लगाउने मानिस नोकरहरूको अधीनमा रहन्छ।

सदा पुरुषः व्याध्यभिभूतः परदाराभिगाम्यगुप्तदारः, स्वामिमित्रगुरुद्रोहीवातरोगी, गोष्ठोत्कर्षी दुश्चर्मा, खराश्वाभिगामी मधुमेही, धर्मपत्नीष्वन्यमैथुनप्रवर्तकस्तूवरकः, स्वगोत्रसमयस्त्र्यभिगामी श्लीपदी, मातापितृभगिनीस्त्र्यभिगाम्यजीवी, परापवाद्यलसः,स्फुटिताक्षः कृतघ्नः,सर्वारम्भविफलास्तदशेषाः कुब्जकुण्डपण्डव्यङ्गदरिद्राः स्फुटितपाणिपादाङ्गावयवाः, धूसराश्छद्मिनः, परपिण्डोपजीविन- श्चीरकर्पटधराः स्थूलमलिनवाससः, क्षुत्पिपासातुराः प्रेतरूपिणः सततमुद्विग्नहृदयाः, बहुप्रलापिनः पुण्यकथापराङ्मुखाः, स्त्रीष्वासक्तचित्ताः दुर्भगाः[३१], स्त्रीपराधीनान्नपानमैथुनाम्बरा देवाग्निगुरु- बृद्धब्राह्मणावमन्तारः प्रसभाभिसृष्टस्त्रीकाः सदापहृतसर्वस्वा बधबन्धनताडननिर्भर्त्सनाभिभूताः, स्त्रीद्यूतमद्यपाननिरतानित्यक्रुद्धास्याः, पापनिरताः स्मृतिपरिहीनाः, पुण्यद्वेष्टारः परमर्मकर्तनरता हीनाङ्गाः, हीनाचारा हीनान्नपानवस्त्रशय्यासनाः स्वल्पायुषः स्वल्पबुद्धयः, शठषण्ढचण्डभण्डशैलूष- तस्करपरप्रेष्यपरकर्मव्याधिता दुःखिताः क्रूरकर्माणश्चोपजायन्ते।९।

---

२५ ग. गोपृष्ठघाती।

२६ क, घ, ङ. सूचिकः।

२७ घ. नास्तिको रङ्गोपजीवी।

२८ ग. वक्रास्य इति नास्ति।

२९ ख, ग. भेत्ताछेत्ताङ्गहीनः

३० घ. माध्यस्थम्।

३१ घ. दुर्भगा इति पदं नास्ति।

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0 In Public Domain. Digitization by eGangotri

परस्त्रीसँग संसर्ग गर्ने र आफ्ना स्त्रीहरूको रक्षा नगर्ने मानिस सधैं रोगग्रस्त हुन्छ। स्वामी, मित्र र गुरुको द्रोह गर्ने मानिस वातरोगी हुन्छ। गोठ भत्काउने चर्मरोगी हुन्छ। खच्चड र घोडामा अभिगमन गर्ने मधुमेहको रोगी हुन्छ। धर्मपत्नीहरूलाई अरूसँग मैथुन गर्न लगाउने नपुंसक हुन्छ। आफ्ना गोत्रका र सिद्धान्तका स्त्रीहरूसँग संसर्ग गर्ने मानिसलाई हात्तीपाइले हुन्छ। सानिमा र फुपूसँग संसर्ग गर्ने अत्यन्त अल्पायु हुन्छ। अर्कालाई दोष लगाउने आलसी हुन्छ। कृतघ्न कानो हुन्छ। सम्पूर्ण कार्यारम्भलाई विफल पार्ने सम्पूर्ण मानिसहरू कुब्ज, जारपुत्र, नपुंसक, अधिकाङ्ग, दरिद्र र विकलाङ्ग हुन्छन्। छल गर्नेहरू खैरा हुन्छन्। अर्काको खानाबाट गुजारा गर्नेहरू रूखको बोक्रा र थाङ्नाका लुगा लगाउने अथवा मोटा र मैला लुगा लगाउने हुन्छन्। सधैं दुःखी रहने मानिसहरू भोक प्यासले आत्तिएका प्रेत हुन्छन्। पुण्य कथा नसुन्ने मानिसहरू बकबासी भएर जन्मन्छन्। सधैं स्त्रीहरूमा आसक्त रहनेहरू कुरूप हुन्छन्। स्त्रीको अधीनता, अन्नपान, मैथुन तथा वस्त्र आदिमा लम्पट र देवता, गुरु, अग्नि, वृद्ध एवं ब्राह्मणको अपमान गर्ने मानिसका स्त्रीहरू हठपूर्वक अभिसरण गर्दछन्, उनको सधैं सर्वस्वहरण हुन्छ र उनीहरू बध, बन्धन, पिटाइ र हप्काइका चपेटामा रहन्छन्। स्त्री, जुवा र मदिरामा लम्पट भएका मानिसहरू सधैं रिसाएको जस्तो मुख लिएर जन्मन्छन्। पापमा डुबेका मानिसहरू स्मरणशक्तिले विहीन हुन्छन्। धर्मको द्वेष गर्ने,

तस्मादेनसि प्रायश्चित्तं कर्तव्यं तीर्णप्रायश्चित्ताः परिशुद्धलक्षणा जायन्ते ।१०।

स्वर्गानारकाश्च[३२]पुण्यहेतुत्वादुभयरूपाः,सङ्कीर्णफलास्तत्कर्मफलात्कर्माधिक्येनभोग्यव्यवहाराधारपरिरक्षिता भवन्ति ।११।

तदत्रैतेश्लोकाः -

यस्मात् पापेन दुःखानि तीव्राणि सुबहूनि च ।
तस्मात्पापं न कर्तव्यमात्मपीडाकरं हि तत् ॥१२॥

यस्मिन् काले च देशे च वयसा यादृशेन च ॥
कृतं शुभाशुभं कर्म तत्तथा तेन[३३] भुज्यते ॥१३॥

अरूलाई मर्मान्त हुने गरी व्यवहार गर्ने मानिसहरू अङ्गहीन हुन्छन्। आचरण नराम्रो भएका व्यक्तिहरू अन्नपान, लुगालत्ता, शय्यासन आदिले हीन स्वल्पायु र स्वल्पबुद्धिका हुन्छन्। क्रूर कार्य गर्ने व्यक्तिहरू शठ, नपुंसक, उग्र, भँडुवा, नटुवा, चोर, अर्काको काममा खटाइने, अरूको काम गर्ने, रोगी, दुःखी र क्रूर भएर जन्मन्छन् ।९।

त्यसैले पाप भएमा प्रायश्चित्त गर्नुपर्दछ। प्रायश्चित्त गरिसकेपछि उनीहरू विशुद्ध स्वरूपका हुन्छन् ।१०।

स्वर्गवासी र नरकवासीहरू पुण्यका कारणले दुई थरी हुन्छन्। मिश्र फल भएका त्यस कर्मको फलबाट कर्मको आधिक्यले गर्दा भोग गर्नु पर्ने व्यवहारको आधारमा संरक्षित हुन्छन् ।११।

त्यस विषयमा यहाँ यी श्लोकहरू छन् -

पापले तीव्र र धेरै दुःखहरू पाइन्छन्। त्यसैले पाप गर्नु हुँदैन किनभने पाप पीडादायक हुन्छ ॥१२॥

जुन समयमा जुन देशमा जस्तो उमेरमा जस्तो शुभ वा अशुभ कर्म गरिएको हुन्छ त्यसै समयमा त्यसै ठाउँमा र त्यसै अवस्थामा उसले त्यसको भोग गर्दछ ।१३।

३२ घ. जयन्तु इत्यधिकपाठः ।

३३ ग. तत्तस्मात्तेन ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

तस्मात्सदैव दातव्यमविच्छिन्नं सुखार्थिभिः ।
CC-0. In Public Domain. Digitization by eGangotri
विच्छिद्यन्ते यथा भोगा ग्रीष्मे कुसरितो यथा ॥१४॥

सत्यं वक्तुमशेषतोऽस्ति सुलभा वाणी मनो ध्यायितुं
दातुं दानवरं शरण्यमभयं बाह्यं पितृभ्यो जलम् ।
पूजार्थं हि सदाशिवस्य विमलः सन्धानयज्ञः परः
क्षुद्व्याधेः फलमूलमस्ति रसितुं क्लेशात्मकैः किन्धनैः ॥१५॥

इति श्री शिवधर्मोत्तरे स्वर्गनारकचिह्ननिरूपणं नाम नवमोऽध्यायो ।

त्यसैले सुख चाहने मानिसहरूले निरन्तर सधैं दान गर्नु पर्दछ। जसरी ग्रीष्म ऋतुमा कुनदीहरू सुक्दछन् त्यसै गरी भोगहरू विच्छिन्न हुने गर्दछन् ॥१४॥

सत्य बोल्नका निमित्त निःशेषरूपमा वाणी, ध्यान गर्नका लागि मन, दिनलाई श्रेष्ठ दान शरणमा आएकालाई दिन अभय र पितृहरूका लागि बाहिर कुवा नदी आदिको जल तथा पूजाका लागि सदाशिवको स्वच्छ र परम ज्ञानयज्ञ विद्यमान रहेको छ भने भोक रूपी व्याधिलाई शान्त पार्न फलहरू र कन्दमूलहरू सुलभ छन् । यस अवस्थामा दुःखदायी धनहरूको के प्रयोजन ?। १५॥

यसरी शिवधर्मोत्तरमा स्वर्गनारकचिह्न नाम गरेको नवौं अध्याय समाप्त भयो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ ज्ञानयोगो नाम दशमोऽध्यायः

अथ संसारमुक्त्यर्थं ज्ञानयोगं ब्रवीमि ते[१] ।
शिवप्रकाशकं ज्ञानं योगस्तत्रैकचित्तता[२] ॥१॥

स्वसिद्धान्ताविरुद्धेन[३] यस्तर्केण विचारयेत् ।
धर्मं ज्ञानापवर्गार्थं स तत्त्वं वेद[४] नेतरः ॥२॥

पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्याद्यव्यूहनं तर्कः शुष्कतर्कं विवर्जयेत् ॥३॥

तस्मादागमयुक्त्यैव[५] सूक्ष्मार्थप्रविचारणम्[६] ।
कर्तव्यं नानुमानेन केवलेन विपश्चिता ॥४॥

अब ज्ञानयोग नामक दशौं अध्याय आरम्भ हुन्छ ।

स्कन्द अगस्तिलाई भन्दछन् - अब संसारको मुक्तिका लागि म तिमीलाई ज्ञानयोगका विषयमा बताउँदैछु। शिवको प्रकाशक तत्त्व ज्ञान हो भने शिवमा एकाग्रचित्त हुनु योग हो ।१।

जसले आफ्ना सिद्धान्तको विरोध नहुने गरी तर्कका साथ विचार गर्दछ त्यसले ज्ञान र मोक्ष प्रयोजन भएको तत्त्वसहित धर्मलाई जान्दछ, अरूले होइन ।२।

अघि पछिको कुरा नबाझ्ने गरी कुन अर्थ यहाँ शास्त्र सङ्गत होला भनी वितर्क गर्नु तर्क हो । तर यस्तोमा व्यर्थको फोस्रा तर्कबाट भने बच्नु पर्दछ ।३।

हीनमध्योत्तमफलं बहुद्वारं यतः शुभम् ।
तस्मात्परीक्ष्य कुर्वीत पुण्यं साधु महत्फलम् ॥५॥

आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः ।

---

१ ख. ब्रवीहि मे ।
२ घ. कचिन्तना ।
३ ख. स्वसिद्धान्ताविरोधेन । ग .स्वसिद्धावविरुद्धेन पुस्तकेन ।
४ ग. सतस्त्वं वद ।
५ ग. युक्तैव ।
६ ग. विचारतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे[७] ॥६॥
CC0. In Public Domain. Digitization by eGangotri

सर्वार्थसाधकं ज्ञानं शिवयोगञ्च शाश्वतम् ।
प्रकाशयति मुक्त्यर्थं मुमुक्षूणामयं शिवः ॥७॥

बहुत्वेऽपि च शास्त्राणां सर्वज्ञेन शिवेन यत् ।
प्रणीतममलं ज्ञानं तत् प्रमाणं न संशयः ॥ ८॥

त्यसैले बुद्धिमानूले केवल अनुमानले मात्र होइन शास्त्रसम्मत युक्तिद्वारा गहिराइका साथ शास्त्रार्थबारे विचार गर्नु पर्दछ ।४।

अधम, मध्यम र उत्तम फलले गर्दा पुण्यका धेरै ढोकाहरू छन् । त्यसैले राम्रोसँग परीक्षा गरेर धेरै फल दिने राम्रो पुण्य गर्नुपर्दछ ।५।

आदि, मध्य र अन्त रहित स्वभावतः निर्मल, सर्वशक्तिमान्, सर्वज्ञ र परिपूर्ण शिव नै शिवशास्त्रका बोध्य हुन् ।६।

यी शिवले मोक्षको इच्छा राख्नेहरूको मुक्तिका लागि सबै पुरुषार्थ साध्ने ज्ञान र शाश्वत शिवयोगलाई प्रकाशित गर्दछन् ।७।

यद्यपि शास्त्रहरू धेरै छन् तथापि सर्वज्ञ शिवले उपदेश गरेको निर्मल ज्ञान नै प्रामाणिक शास्त्र हो भन्नेमा कुनै सन्देह छैन ।८।

यः सर्वज्ञः सुसम्पूर्णः स्वभावविमलः शिवः ।
सर्वदोषविनिर्मुक्तो ब्रूयात् स कथमन्यथा ॥९॥

अभावादीश्वरस्येयं जगत्सृष्टिः कथम्भवेत् ।
अचैतन्यात्प्रधानस्य अज्ञत्वात् पुरुषस्य च ॥१०॥

प्रधान[८]परमाण्वादि यावत् किञ्चिदचेतनम् ।
तदकर्तृ स्वयं दृष्टं बुद्धिमत्कारणं विना ॥११॥

न यथा घटभावेन मृत्पिण्डं स्वयमृच्छति ।
तथाज्ञा बुद्धिभावेन न तिष्ठेत् प्रकृतिः स्वयम् ॥१२॥

धर्माधर्मोपदेशश्च बन्धमोक्षविचारणम् ।
न सर्वज्ञं विना पुंसामादिसर्गे प्रसिद्ध्यति ॥१३॥

---

७ क, घ. शिवागमः ।
८ क. अज्ञान ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जो शिव स्वयं सर्वज्ञ परिपूर्ण स्वभावले नै शुद्ध र सम्पूर्ण दोषहरूबाट अस्पृष्ट छन् त्यस्ता भगवान्द्वारा उपदिष्ट शास्त्र कसरी अप्रामाणिक हुन सक्दछ ।९।

प्रधान अचेतन र पुरुष अज्ञ भएकाले जगदीश्वर शिवका अभावमा यस संसारको सृष्टि कसरी हुन्थ्यो होला ।१०।

स्वयं चैतन्ययुक्त नभएकाले प्रधान एवं परमाणु आदि जे जति अचेतनहरू छन् ती जगत्का कर्ता हुन सक्दैनन् ।११।

जसरी कुनै कर्ता विना माटाको थुप्रो आफै घडामा परिणत हुन सक्दैन त्यसै गरी अज्ञ प्रकृति स्वयं कर्तृत्वेन बुद्धिभावमा परिणत हुन सक्दैन ।१२।

पुण्य तथा पापको उपदेश र बन्धन तथा मुक्तिको विचार सर्वज्ञ विना प्रारम्भिक सृष्टिमा आफै सिद्ध हुदैन ।१३।

वैद्यं विना निराक्रन्दाः क्लिश्यन्ते रोगिणो यथा ।
शिवं विना जगत्तद्वन्निराक्रन्दं भवेत् सदा ॥१४॥

तस्मादनादिः सर्वज्ञः परिपूर्णः परः शिवः ।
अस्ति नाथः परित्राता पुंसां संसारसागरात् ॥१५॥

येऽभ्यस्यन्ति शिवज्ञानं शिवोक्तं शिवभाविताः ।
ते भवन्ति शिवाः शान्ता भवे मज्जन्त्यभाविताः ॥१६॥

असत्यस्मिञ्जगन्नाथे तमोभूतमिदञ्जगत् ।
सूर्येणैव विहीनं हि निरालोकं जगद्यथा ॥ १७॥

यथानादिप्रवृत्तोऽयं घोरः संसारसागरः ।
शिवोऽपि हि तथानादिः संसारान्मोचकः स्थितः ॥१८॥

चिकित्सक नहुदा जसरी रोगीहरू असहाय भएर दुःख पाउँदछन् त्यसै गरी भगवान् शिव विना यो सम्पूर्ण जगत् सँधै असहाय हुन्थ्यो होला ।१५।

त्यसैले अनादि सर्वज्ञ परिपूर्ण जगन्नाथ परम शिव संसारसागरबाट मानिसहरूको रक्षा गर्नका लागि छन् ।१५।

जुन मनुष्यहरू शिवद्वारा प्रतिपादित शिवज्ञानको अभ्यासले शिवभावनाले भावित हुन्छन् ती शिव र शान्त बन्दछन् । तर जो शिवभावनामय हुदैनन् ती संसारसागरमा डुब्दछन् ।१६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0 In Public Domain. Digitization by eGangotri

जगत्का मालिक भगवान् शिव नहुँदा जसरी सूर्य नहुँदा यो दुनियाँ प्रकाशहीन हुन्छ त्यसै गरी अन्धकारपूर्ण हुनेथियो ।१७।

जसरी अनादि कालदेखि नै यो संसाररूपी समुद्र चलिआइकोछ त्यसैगरी संसारबाट मुक्ति प्रदान गर्ने भगवाशिव पनि अनादि कालदेखि नै विद्यमान छन् । १८।

व्याधीनाम्भेषजं यद्वत् प्रतिपक्षः स्वभावतः ।
तद्वत्संसारदोषाणां प्रतिपक्षः शिवः स्थितः ॥१९॥

तस्मादनादिः सर्वज्ञः परिपूर्णः स्वभावतः ।
मुक्तिहेतुः शिवः शान्तः सर्वज्ञो ज्ञानभाषकः ॥२०॥

यदि चेदं प्रमाणं स्यान्न सर्वज्ञस्य भाषितम् ।
किं प्रमाणं तदा ग्राह्यं ब्रूत पश्याम हे बुधाः ॥२१॥

वाक्यलिङ्गा हि वक्तारः क्रियालिङ्गाश्च कारकाः ।
तस्मात्स्वेनैव लिङ्गेन विज्ञेयास्तद्गुणा बुधैः ॥२२॥

आगमत्वेऽपि सामान्ये कः प्रद्वेषः[१] शिवागमे ।
अनायासेन यत्रोक्ता मुक्तिरेकेन जन्मना ॥२३॥

जसरी रोगहरूको औषधी स्वाभाविकरूपमै प्रतिपक्ष हुन्छ त्यसै गरी भगवान् शिव दुनियाँका दोषहरूको प्रतिपक्षका रूपमा रहेका छन् १९।

त्यसैले भगवान् शिव अनादि सर्वज्ञ र स्वभावतः परिपूर्ण छन् । तिनै सर्वज्ञ शान्त शिवज्ञानका प्रवक्ता र मुक्तिका कारण हुन् ।२०।

यदि सर्वज्ञ शिवले भनेको कुरा प्रामाणिक हुँदैन भने केलाई प्रमाण मान्ने ? हे विद्वान्हरू   हो ! भन, हामी पनि हेरौं ।२१।

वक्ताहरू वाक्यप्रमाण हुन्छन्, कारकहरूमा क्रियाप्रमाण हुन्छन् । त्यसैले आफ्नै प्रमाणहरूद्वारा विद्वान्हरूले ती गुणहरूलाई जान्ने प्रयास गर्नुपर्दछ ।२२।

शास्त्रत्व सामान्य भए पनि शिवशास्त्रप्रति किन द्वेष गरिन्छ ? अझ शिवशास्त्र सजिलैसँग एकै जन्ममा हुने मुक्तिको निर्देश गर्दछ ।२३।

स्वपक्षरागमुत्सृज्य गुणेष्वाधीयतां मनः ।

---

१ ग. प्रद्वैष्णाः (द्वेष्टा) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यतो गुणास्तत पुंसां कल्याणं सफलं स्थितम्[१०] ॥२४॥

युक्तञ्चैतद्गुणैः सर्वैर्यस्माज्ज्ञानं शिवात्मकम् ।
तस्मात्तेन तदभ्यस्यं यस्यास्ति गुणगौरवम् ॥२५॥

अभ्यासश्चास्ति सुकरस्तदतीव महत्फलम् ।
कः प्राज्ञः कार्यमुत्सृज्य दीर्घसूत्रीं समाश्रयेत् ॥२६॥

मध्वर्थी पर्वतं कश्चिद् दूरं सम्प्रस्थितः शनैः ।
यद्यधो मधु सम्पश्येत् किमर्थं पर्वतं व्रजेत् ॥२७॥

एवमेवैकभविकां विमुक्तिं पुरतः स्थिताम् ।
विहायानेकभविकां कः प्राज्ञः प्रतिपत्स्यते[११] ॥२८॥

आफ्नो पक्षप्रतिको मोहलाई परित्याग गरेर गुणहरूमा मन लगाउनु आवश्यक छ किनभने जहाँ गुण छन् त्यहाँ नै मानिसहरूको कल्याण सफल र सुस्थिर हुन्छ ।२४।

यो शिवात्मक ज्ञान सम्पूर्ण र महान् गुणहरूले युक्त छ, त्यसैले मानिसहरूले जुन शास्त्रमा गुणहरूको भारी छ त्यसको अभ्यास गर्नु पर्दछ ।२५।

शिवागमकोअभ्यास सजिलो छ र धेरै ठूलो फलले युक्त पनि छ। त्यसैले कुन बुद्धिमान् पुरुषले सजिलैसँग प्राप्त हुने ठूलो फललाई छोडेर आलस्यले युक्त शास्त्रको आश्रय लेला ? ।२६।

महको अपेक्षा राख्ने कुनै मानिस मह प्राप्त गर्नका लागि पर्वततिर प्रस्थान गर्दछ। यदि पहाडतिर जाँदै गर्दा घरकै नजिक तलै मह फेला पारिहाल्यो भने त्यो किन पर्वततिर जान्छ र ? २७।

इयान्यत्र गतः कालस्तत्रैकं जन्म गच्छतु ।
जिज्ञास्यतामियं तावन्मुक्तिरेकेन जन्मना ॥२९॥

यदि नाम न मुक्तिः स्यादेकेनैवात्र जन्मना ।
अनेकभविका मुक्तिर्भवतः केन वार्यते ॥३०॥

तस्मादत्रैकभविका[१२] मुक्तिर्ज्ञानेन निश्चिता ।
तच्छुद्धा[१३] तु भवेन्न्याय्यमप्रत्यक्षासु मुक्तिषु ॥३१॥

१० ग. स्थिरम् ।

११ क. प्रतिपत्यते । ग. प्रतियास्यति ।

१२ ख, ग, ङ. द्यत्रैकभविका ।

१३ ग. तद्बुध्वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

यथा समीपे दूरे च सदृशं भोजनद्वयम्[१४] ।
CC-0. In Public Domain. Digitization by eGangotri
सा नु काले विकाले च भोक्ता चाति बुभुक्षितः ॥३२॥

तयोर्गृह्णातु कतमत् कथयध्वं विपश्चितः ।
समीपे यदि मन्येथा मुक्तिमेवं शिवात्मिकाम् ॥ ३३॥

यसरी एकै जन्ममा सम्पन्न हुने अगाडि रहेको मुक्तिलाई छोडेर अनेक जन्ममा सम्पन्न हुने मुक्तिका पछाडि को बुद्धिमान् जाला र ?२८।

जहाँ यति समय वितिहाल्यो त्यहाँ एक जन्म अरू वितोस् । तर यो जन्म एकै जन्ममा प्राप्त हुने मुक्तिको जिज्ञासा गरेर वितोस् ।२९।

यदि यस जन्ममा तपाइँको मुक्ति भएन भने पनि अनेक जन्ममा हुने मुक्तिलाई कसले छेकेको छ र ? ३०।

त्यसैले यहाँ एकै जन्ममा ज्ञानद्वारा मुक्ति निश्चित छ। अप्रत्यक्ष मुक्तिहरूमा त्यो नै मुक्ति शुद्ध छ भन्नुमा युक्ति छ ।३१।

सन्मार्गौषधदृष्टान्तैः स्वयमुत्प्रेक्ष्य युक्तितः ।
वक्तव्यः प्रतिबोधाय कार्याकार्यविवेकिनः ॥३४॥

इति ये[१५] परमं शान्तं प्रतिपन्ना महेश्वरम् ।
ते लभन्ते सुखेनैव विमुक्तिम्भवसागरात् ॥३५॥

अकर्ता ज्ञः पशुर्भोक्ता विभुर्नित्यश्च स प्रभुः ।
किञ्चित्कर्ता स किञ्चिज्ज्ञः पुरुषः पञ्चविंशकः ॥३६॥

न करोति यतः सर्वं स्वभोगाद्यं करोति च ।
अस्वातन्त्र्यादकर्ता यः किञ्चित्कर्त्ताणुरन्ध्रवत् ॥३७॥

जसरी नजिक र टाढा समान दुईवटा भोजन राखिएका छन्, त्यो समय होस् वा असमय होस्, खाने मानिस अत्यन्त भोकाएको छ भने हे पण्डित हो भन ती दुबै खाना मध्ये भोकाएको मान्छेले कुन खाना खानु उचित हुन्छ । यदि नजिककै खाना ठीक मान्छौ भने शिवात्मक मुक्ति नै ठीक हो भन्ने मान्नु पर्दछ ।३२-३३।

सन्मार्गको र औषधि आदिको दृष्टान्तद्वारा आफै युक्तिपूर्वक् कार्य र अकार्यको विवेक गर्ने मानिसको जानकारिका लागि भन ।३४।

---

१४ ख, ग. भोजनद्वयम् ।

१५ ग. इत्येवम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यसरी उपर्युक्त तरिकाले जुन मानिसहरू परम शान्त महेश्वर शिवको शरणमा पुग्दछन्, तिनीहरूले संसार सागरबाट सजिलैसँग मुक्ति पाउँन सक्दछन् ।३५।

भगवान् शिव कर्तृत्व रहित, सर्वज्ञ, सबैलाई समानरूपले हेर्ने, भोग गर्ने, व्यापक, नित्य र सर्वसामर्थ्य युक्त छन् भने सांख्यशास्त्रमा प्रतिपादित पच्चीसौं तत्त्वरूप पुरुष केही रूपमा कर्ता र केहीको मात्र ज्ञाता सिद्ध हुन्छन् ।३६।

जसले केही पनि गर्दैन तर पनि स्वभोगादि कार्य गर्दछ। स्वतन्त्र न भएकाले ऊ कर्ता होइन परन्तु सानो छिद्र झैं कर्ता हो ।३७।

न वेत्ति तत्त्वतः सर्वं तेनाज्ञः पुरुषः पशुः ।
बुद्ध्या व्यवस्थितं किञ्चिज्ज्ञानं किञ्चिज्ज्ञ उच्यते ॥३८॥

अचेतनं विभु सूक्ष्मं भोग्यं साधारणं ध्रुवम् ।
चतुर्विंशकमेकञ्च प्रधानं गुणलक्षणम् ॥३९॥

पुंसां भोगापवर्गार्थमीश्वरेच्छा प्रचोदिता ।
प्रधानादभव[१६]द्रुद्रस्तथा विष्णुपितामहौ ॥४०॥

सत्कार्यकरणोपेताः सुविशुद्धा महाबलाः ।
जगतः कारणत्वेन त्रयो देवा व्यवस्थिताः ॥४१॥

तत्त्वतः सबै कुरा नजान्ने भएकाले पुरुष अज्ञ र पशु हो। बुद्धिको व्यापारबाट केही ज्ञान हुने भएकाले उसलाई किञ्चिज्ज्ञ पनि भनिन्छ ।३८।

मूलप्रकृति अर्थात् प्रधान, बुद्धि, अहङ्कार, पाँच तन्मात्राहरू, पाँच ज्ञानेन्द्रियहरू, पाँच कर्मेन्द्रियहरू, पाँच महाभूतहरू, र मन यी चौबीस तत्त्वहरूको समूह अचेतन, व्यापक, सूक्ष्म, भोग्न योग्य, सर्वसामान्य र निश्चित छ। यस बाहेक एउटा पुरुष तत्त्व पनि छ। यसरी व्यक्ताव्यक्त जगतका पच्चीस तत्त्वहरू सांख्यशास्त्रमा निर्दिष्ट छन्। प्रधान तत्त्व अर्थात् मूलप्रकृतितत्त्व सत्त्व, रज र तम यी तीन गुणहरूले युक्त छ ।३९।

पुरुषहरूको भोग र मोक्षका लागि ईश्वरेच्छा प्रेरक हुन्छ र प्रधानबाट रुद्र, विष्णु र ब्रह्मा तीन देवताहरूको उत्पत्ति भएको मानिन्छ ।४०।

सत्कार्यका असाधारण कारणाहरूले युक्त अत्यन्त पवित्र तथा बलशाली ब्रह्मा, विष्णु र रुद्र यी तीन देवताहरू जगत्को कारणको रूपमा व्यवस्थित छन् ।४१।

प्रधानाच्च भवेद् बुद्धिर्जगद्धेतुः शिवेच्छया ।
बुद्धेरपि च सङ्क्षोभादहङ्कारस्त्रिधा भवेत् ॥४२॥

१६ ग. प्रधानं न भवे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अहङ्काराच्च सूक्ष्माणि तन्मात्राणीन्द्रियाणि च ।
सूक्ष्मेभ्यः पञ्च भूतानि तेभ्यः स्थूलमिदं जगत् ॥४३॥

चतुर्विंशकमित्युक्तं पुरुषः पञ्चविंशकः ।
रुद्रः षड्विंशकः प्रोक्तः शिवश्च परमस्ततः ॥४४॥

सप्तविंशतिमः शान्तः सुसूक्ष्मः परमेश्वरः ।
स्वर्गापवर्गयोर्दाता तं विज्ञाय विमुच्यते ॥ ४५॥

ज्ञानेन हि[१७] भवेन्मुक्तिर्न वा यस्यास्ति संशयः [१८]।
समुक्तिप्रत्ययार्थाय[१९] शिवयोगं समभ्यसेत् ॥४६॥

भगवान् सदा शिवको इच्छाअनुसार प्रधानबाट जगत्को कारण बुद्धि उत्पन्न हुन्छ। बुद्धिको संक्षोभबाट सात्त्विक, राजस र तामस तीन किसिमको अहङ्कार पैदा हुन्छ।४२।

अहङ्कारबाट सूक्ष्म गन्ध आदि पाँच तन्मात्राहरू र इन्द्रियहरू उत्पन्न हुन्छन् । गन्ध आदि सूक्ष्म पञ्चतन्मात्राहरूबाट पृथ्वी आदि पाँच महाभूत तयार हुन्छन् र तिनीहरूबाट नै यो स्थूल संसार बन्दछ।४३।

पञ्च तन्मात्राहरू, मनसहित एघार इन्द्रियहरू, पञ्चमहाभूतहरू, प्रधान, बुद्धि र अहङ्कार समेत चौबीस तत्त्व, पच्चीसौं पुरुष, छब्बीसौं रुद्र र त्यसभन्दा पर परम शिव यी सत्ताइस संसारका कारण हुन्।४४।

योगसिद्ध्यैकदेशेऽपि दृष्टे मोक्षे भवेन्मतिः ।
दृष्टमेतन्मया यद्वन्मोक्षस्तद्वद् ध्रुवं भवेत् ॥४७॥

न केवलं हि योगेन मुक्तिसम्प्रत्ययो भवेत् ।
अप्यष्टगुणमैश्वर्यं योगाभ्यासात् प्रवर्तते ॥४८॥

ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम् ।
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत योगवित् ॥४९॥

ज्ञानवैराग्यसम्पन्नः श्रद्धानः क्षमान्वितः ।
शिवभक्तः सदोत्साही ध्यानेच्छः[२०] पुरुषः स्मृतः ॥५०॥

---

१७ क. ज्ञानेन तु । घ. ज्ञानेन ।

१८ क. चास्या अस्ति संक्षयः ।

१९ क, घ, ङ. मुक्तिः प्रत्ययार्थाय । ग. मुक्तिसम्प्रत्यार्थाय ।

२० क, घ. ध्यानेक्षम् । ख, ङ. ध्यानेच्छम् । ग. ध्यानेङ्कम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सत्ताइसौं जगत्सृष्टिका कारण शान्त एवं अत्यन्त सूक्ष्म परमेश्वर शिव नै स्वर्ग तथा मोक्षका दाता हुन्। तिनलाई जान्ने मानिस मुक्त हुन्छ।४५।

ज्ञानबाट मुक्ति हुन्छ भन्ने विषयमा कुनै सन्देह छैन। मुक्तिका साथ ज्ञानको प्रयोजनका लागि शिवयोगको अभ्यास गर्नुपर्दछ।४६।

जसरी मैले योगसिद्धिलाई सुनिश्चितरूपमा देखें यद्वा प्राप्त गरें त्यसै गरी निश्चित रूपमा मोक्ष प्राप्त हुनेछ।४७।

योगद्वारा केवल मुक्तिको मात्र प्रत्याभूति हुँदैन प्रत्युत योगको अभ्यासबाट आठगुणा ऐश्वर्य पनि बढ्दछ।४८।

योगका ज्ञाताले ध्यानकर्ता, ध्यान, ध्यानको विषय र त्यसको प्रयोजन यी चारवटालाई राम्रोसँग बुझेर योगमा संलग्न हुनू।४९।

ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः।
ज्ञानेन परिशुद्धेन ज्ञानं ध्यानमतः परम् ॥५१॥

सकलः स तु तत्त्वज्ञः सर्वज्ञः सर्वदः प्रभुः।
नानारूपविकल्पेन ध्येयः सिद्ध्यर्थमीश्वरः ॥५२॥

विमुक्ति[२१]प्रत्ययः पूर्वमैश्वर्यञ्चाणिमादिकम्।
इत्येतद् विविधं ज्ञेयं शिवध्यानप्रयोजनम् ॥५३॥

युञ्जत्यनेन पुरुषः[२२] शिवः संयोजकः स्मृतः।
फलेन योजकं तस्माद् ध्यायेत् सततमीश्वरम् ॥५४॥

ध्यानप्रति इच्छा भएको मानिस ज्ञान र वैराग्यले युक्त, श्रद्धालु, क्षमावान्, शिवभक्त र सधैं उत्साही हुनुपर्दछ।५०।

ध्यै धातु चिन्ता अर्थमा प्रयुक्त हुन्छ। यहाँ शिवध्यानको अर्थ पटकपटक विशुद्ध ज्ञानद्वारा शिवको चिन्तन गर्नु हो। त्यसैले पहिले ज्ञान र पछि ध्यान हुने गर्दछ।५१।

ती सर्वशक्तिमान् शिव सम्पूर्ण कलाहरूले युक्त, तत्त्वहरूका ज्ञाता, सम्पूर्ण जगत्का ज्ञाता र सम्पूर्ण वस्तु दिन सक्ने, सर्व सामर्थ्यवान् ईश्वरको सिद्धिका लागि अनेक रूपहरूको विकल्पद्वारा ध्यान गर्नुपर्दछ।५२।

पहिले अणिमा, महिमा, गरिमा, लघिमा आदि अष्टसिद्धिहरूको प्राप्ति र मोक्षको प्रत्याभूति आदि अनेक किसिमका शिवध्यानका प्रयोजनहरू छन्।५३।

---

२१ घ. विमुक्तिः।
२२ ग. युञ्जन्त्यन्येन पुरुषम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अधिकारी पुरुष शिवध्यानको प्रयोजनसँग जुट्दछ र शिवले त्यसलाई फलसँग जोड्दछन् त्यसैले निरन्तर योजक ईश्वरको ध्यान गरोस् ।५४।

नाजीर्णाम्लरसोद्गारे[२३] न च विण्मूत्रबाधने ।
न छर्द्यानातिसारे[२४] च नातिभुक्तः श्रमान्वितः ॥५५॥

न चातिकर्मनिरतश्चिन्ताव्याकुलितेन्द्रियः ।
नडिम्बे[२५] गुरुकार्ये वा न चापि क्षुत्पिपासितः ॥५६॥

न दंशमशकाकीर्णे न च प्राणिसमन्विते ।
श्मशानचैत्यबल्मीकसर्पश्वापदसेविते ॥५७॥

नदीसमुद्रतीरे वा न जलाश्रयसन्निधौ ।
जीर्णोद्यानगृहारामे न भीस्थाने विचिन्तयेत् ॥५८॥

सुस्निग्धान्नाल्पभोजी च वातलाहारवर्जितः ।
युक्ताहारविहारात्मा[२६] युक्तचेष्टेन कर्मसु ॥५९॥

न पचेको र अमिलो डकार आएको समयमा, मलमूत्रको वेगमा, वान्तामा, अत्यन्त खाएको बेलामा, अत्यन्त थाकेको बेलामा, धेरै काममा व्यस्त भएको बेलामा, चिन्ताले इन्द्रियहरू व्याकुल भएको बेलामा, राज्य विप्लव भएको बेलामा, ठूलो काम गरिरहेको बेलामा, भोक र प्यासले आत्तिएको बेलामा, डाँस र मच्छरहरू भएको वा धेरै जीव जन्तु भएको ठाउँमा, मसानघाटमा, चिता वा कुनै स्मृतिस्तम्भको नजिकमा, धमिराको गोलो भएको ठाउँमा, सर्प अथवा जङ्गली जनावरहरूले आश्रय लिने ठाउँमा, नदी वा समुद्रको नजिकको किनारामा वा ताल पोखरीहरूको नजिकमा, पुराना बगैंचा वा घरबगैंचाहरूमा र अन्य कुनै डरलाग्दो ठाउँमा ध्यान नगर्नू ।५५-५८।

युक्तनिद्रावबोधश्च सर्वायुक्तविवर्जितः ।
श्रद्धधानः क्षमी नित्यं यावदर्थपरिच्छदः ॥६०॥

स्थितः शिवाश्रमे गुह्ये निःशब्दे जनवर्जिते ।
पुष्पाम्रादिफलोपेते पूर्वोक्तावसथान्विते ॥६१॥

---

२३ क. नाजीर्णाम्ररसोद्भारे । ग. नाजीर्णसुरसोङ्गारे । घ. नाजीर्णामरसोद्भारे ।

२४ क. छिद्यान्नातिसारे । ग. छर्यान्तातिसारे ।

२५ ख. निडिम्बे । ग. नात्रिस्ते । घ. न डिम्भे ।

२६ ग. विहारश्च ।

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
सोपलिप्ते सुसंमृष्टे गन्धधूपाधिवासिते ।
मुक्तपुष्पसमाकीर्णे वितानोपरिसंयुते ॥६२॥

आसनं तूलसम्पूर्णं सितवस्त्रावगुण्ठितम् ।
कृष्णाजिनोत्तरीयञ्च विन्यसेन्मृदु चर्मणि ॥६३॥

पद्मकस्वस्तिकादीनामभ्यस्तेनासनेन तु ।
समध्यास्य नमस्कृत्य शिवं देवीं गणाधिपम् ॥६४॥

ऋजुग्रीवशिरोवक्षा[२७] नातिश्लिष्टौष्ठलोचनः ।
किञ्चिदुन्नमितशिरा दन्तैर्दन्तान् न च स्पृशेत् ॥६५॥

वायु विकार नबढाउने कमलो थोरै अन्नको भोजन गर्ने, उपयुक्त आहार विहार, काममा उपयुक्त चेष्टा, ठीक समयमा सुत्ने, ठीक समयमा उठ्ने, वेठीक कुनै पनि काम नगर्ने, श्रद्धावान्, सधैं क्षमावान् मानिसले चाहिने जति सामग्रीले युक्त भएर शिवाश्रममा गुप्त ठाउँमा होहल्ला नभएको, मान्छेहरूको आवागमन नभएको, फूल तथा आँप आदि फलहरूले युक्त, पहिले भनिएअनुसारको वस्तीमा, लिपिएको अत्यन्त मिलेको अत्तर धूप आदिको वासनाले युक्त, झरेका फूलहरूले व्याप्त भएको ठाउँमा, तूलले बनाइएको सेतो वस्त्रको खोल भएको आसनमा कृष्णसारमृगको कोमल छालाको उपर्नाले युक्त भई ध्यान गर्नू ।५९-६३।

दन्ताग्रसन्निधौ जिह्वामचलां सन्निवेश्य च ।
पार्ष्णिभ्यां बृषणौ रक्ष्यौ तथा प्रजननं पुनः ॥६६॥

ऊर्ध्वोपरि प्रसंस्थाप्य[२८] बाहू तिर्यक् प्रयत्नतः ।
दक्षिणं करपृष्ठन्तु न्यसेद् वामतलोपरि ॥६७॥

उन्नाम्य शनकैः पृष्ठमुरो विष्टभ्य चाग्रतः ।
सम्प्रेक्ष्य नासिकाग्रन्तु दिशञ्चानवलोकयन् ॥६८॥

संहृतप्राणसञ्चारः पाषाण इव निश्चलः ।
मैत्र्यादिवासनायुक्तः परवैराग्यमाश्रितः ॥६९॥

अमार्गेणापि यो योगं श्रद्दधानः समभ्यसेत् ।
सोऽपि कालेन बहुना ध्रुवं योगमवाप्नुयात् ॥७०॥

---

२७ क. ऋजुग्रवः शिरोवक्षा । ख. ऋजुग्रीवः शिरोवक्षा । ग, घ, ङ. ऋजुग्रीवः शिरो वक्षो ।
२८ ख. उर्ध्वोरुपरिसंथाप्य । ग. उर्वोपरिप्रसंस्थाप्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ध्यान गर्दा पद्मासन, स्वस्तिकासन आदिहरू मध्ये जुन आसनमा आफ्नो अभ्यास बढी छ त्यस आसनमा बसेर भगवान् शिव, भगवती उमा र गणनायकलाई नमस्कार गरेर, गर्धन, टाउको र छातीलाई सीधा राखेर, ओठ र आँखाहरूलाई धेरै बन्द नगरेर तथा टाउकोलाई केही उठाएर, दाँतहरूले दाँतहरूलाई नछोई, तिनीहरूको नजिकमा जीव्रोलाई निश्चलताका साथ राखेर, कुर्कुच्चाले अण्डकोशहरूको वा प्रजनन् अङ्गको संरक्षण गर्दै, जाँघमाथि बाहुहरूलाई यत्नपूर्वक तेर्सो गरी राखेर, दाहिने हातको पछिल्लो भागलाई बायाँ हातको हत्केलामाथि राखेर, सुस्तरी पृष्ठ भागलाई उचालेर, छातीलाई अगाडि रोकेर, यता उता तल माथि दिशाहरूतिर नहेरेरै, नाकको टुप्पोमा दृष्टि राखेर, सास प्रणालीलाई रोक्दै, ढुङ्गोझैं निश्चल भएर, मित्रभावको वासनाले युक्त भएर एवं अत्यन्त वैराग्यको आश्रय लिंदै योगाभ्यास गर्नू ।६४-६९।

यसरी जसले श्रद्धाका साथ त्रुटिपूर्ण तरिकाले योगको अभ्यास गर्दछ त्यसले धेरै समयपछि भए पनि योगसिद्धि प्राप्त गर्दछ ।७०।

गच्छन् तिष्ठन् स्वपन् जाग्रदुन्मिषन्निमिषन्नपि ।
शुचिर्वाप्यशुचिर्वापि[२९] शिवं सर्वत्र चिन्तयेत् ॥७१॥

स्वदेहायतनस्यान्तर्मनसा स्थाप्य शङ्करम् ।
हृत्पद्मपीठिकामध्ये शिवं ध्यानेन चिन्तयेत्[३०] ॥७२॥

ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः ।
तेनेष्ट्वा मुक्तिमाप्नोति बाह्यशुद्धैश्च नाध्वरैः ॥७३॥

हिंसादिदोषमुक्तत्वाद् विशुद्धश्चित्तसाधनः ।
ध्यानयोगःपरस्तस्मादपवर्गफलप्रदः ॥७४॥

तस्मादशुद्धं स्वर्गीयमनित्यं बाह्यसाधनम् ।
यज्ञाद्यं कर्म सन्त्यज्य मुक्त्यर्थं योगमभ्यसेत् ॥७५॥

हिँड्दा, उभिदा, सुत्दा, जाग्दा, आँखा उघार्दा वा झिम्काउँदा जे गर्दा पनि सधैं शिवमा मन लगाएर सबै ठाउँमा शिवकै चिन्तन गर्नू ।७१।

आफ्नो शरीररूपी मन्दिरभित्र मनैदेखि भगवान् शिवलाई प्रतिष्ठित गरेर हृदयकमलको मध्यभागमा शिवको ध्यानद्वारा चिन्तन गर्नू ।७२।

ध्यानयज्ञ अत्यधिक पवित्र र सम्पूर्ण दोषहरूबाट मुक्त छ। त्यसै ध्यानयज्ञद्वारा मोक्ष प्राप्त हुन्छ। बाहिरबाट मात्र शुद्ध देखिने यज्ञहरूद्वारा होइन ।७३।

---

२९ ग. सदा शिवपरो भूत्वा ।

३० ग. चिन्तये ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हिंसा आदि दोषहरूबाट मुक्त भएकाले मनको पवित्र साधन ध्यानयोग सर्वाधिक उच्च र मोक्षरूप फलदायक छ ।७४।

विकारयुक्तमव्यक्तं भोग्यभोक्तृसमन्वितम् ।
चिन्तयेद् हृदये पूर्वं क्रमाद्वापि गुणत्रयम् ॥७६॥

तमः प्रच्छाद्य रजसा रजः सत्त्वेन छादितम् ।
ध्यायेत्त्रिमण्डलं पूर्वं कृष्णं रक्तं सितं क्रमात् ॥७७॥

सत्त्वोपरि गुणातीतं पुरुषं पञ्चविंशकम् ।
हेयमेतदशुद्धञ्च त्यक्त्वा शुद्धं विचिन्तयेत् ॥७८॥

ऐश्वर्यं[३१] पङ्कजं दिव्यं पुरुषोपरि संस्थितम् ।
द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम् ॥७९॥

त्यसैले अपवित्र स्वर्ग आदि अनित्य बाह्यफलहरूका साधक यज्ञ आदि कर्महरूलाई त्यागेर मुक्तिका लागि योगको अभ्यास गर्नू ।७५।

विकारयुक्त, भोगको विषयत्व र भोक्तृत्वले युक्त अव्यक्त प्रधानादि तत्त्वहरूलाई पहिले र त्यसपछि क्रमैसँग तीन गुणहरूको विषयमा चिन्तन गर्नू ।७६।

पहिले रजो गुणद्वारा तमोगुणलाई अभिभूत गर्नू र त्यसपछि सत्त्वगुणद्वारा रजोगुणलाई तिरस्कृत गरेर क्रमैसँग पहिले कालो अनि रातो त्यसपछि सेतो तीनवटा मण्डलमा ध्यान गर्नू ।७७।

सत्त्वगुणमाथि गुणहरूभन्दा पर रहेका पच्चीसौं तत्त्व पुरुषको ध्यान गर्नू र त्याज्य र अपवित्रलाई छोडेर शुद्ध तत्त्वको ध्यान गर्नू ।७८।

पुरुषभन्दा माथि रहेको दिव्य र ऐश्वर्यपूर्ण कमलमा जो बाह्रअङ्गुलसम्म फैलिएको, पवित्र, पूर्णतया फुलेको र सेतो हुन्छ । ७९।

नालमष्टगुणन्तस्य नाभीकन्दसमुद्भवम् ।
पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम् ॥८०॥

तत्कर्णिका[३२] च वैराग्यन्नालं ज्ञानं शिवात्मकम् ।
शिवधर्मश्च तत्कन्दमिति पद्मं विचिन्तयेत् ॥८१॥

---

३१ ग. ऐश्वरम् ।
३२ क. तकर्णिकाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

तद्धर्मज्ञानवैराग्यशिवैश्वर्यमयं परम्।
CC-0. In Public Domain. Digitization by eGangotri
ज्ञात्वा पद्मासनं शार्वं सर्वदुःखान्तमाप्नुयात् ॥८२॥

तत्पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिः[३३] ।
अङ्गुष्टमात्रमचलं ध्यायेदोङ्कारमीश्वरम् ॥८३॥

कदम्बगोलकाकारं तारारूपमिव स्थितम् ।
ध्यायेद्वा रश्मिजालेन दीप्यमानं समन्ततः ॥८४॥

यो कमलको नाल बाह्र अङ्गुल भन्दा आठगुणा बढी अर्थात् छ्यानब्बे अङ्गुल लामो हुन्छ । नाभीको गाँठोबाट उत्पन्न भएको यस कमलको फूलका आठवटा पातहरू अणिमा, गरिमा, लघिमा, महिमा, प्राप्ति, प्राकाम्य, ईशित्व र वशित्व यी आठगुणहरूले युक्त हुन्छन् ।८०।

त्यस कमलका फूलको केसर रहने मध्य विन्दु वैराग्य हो भने शिवसम्बन्धिज्ञान डाँठ हो । शिवधर्म त्यसको उद्भव स्थानसँग जोड्ने गाँठो हो भन्ने ठानेर त्यस कमलको ध्यान गर्नू ।८१।

त्यस कमललाई धर्म, ज्ञान, वैराग्य, शिव र ऐश्वर्यले युक्त भगवान् शिवको पद्मासनको रूपमा जानेर सम्पूर्ण दुःखहरूबाट पार पाइन्छ ।८२।

पवित्र वत्तीको ज्वालाझैं उज्ज्वल आकृतिले युक्त ध्याताले त्यस कमलको केसर रहने मध्य विन्दुमा बूढीऔंला जत्रो स्वच्छ ओङ्काररूप शिवको ध्यान गर्नू ।८३।

ध्यायेद्वा सततं शान्तं वक्षमाणकरूपकम् ।
प्रधानपुरुषातीतं सितपद्मस्थमीश्वरम् ॥८५॥

जपेद्ध्यायेच्च सततमोङ्कारं शिवरूपिणम् ।
वाच्यवाचकभावेन मात्रात्रयविभागतः ॥८६॥

मात्रास्तिस्रः समाख्याताः स्कन्ददेवीमहेश्वराः ।
अकारोकारमकारास्ताश्च मात्राः प्रकीर्तिताः ॥८७॥

अकारादग्निगर्भत्वात् कुमारः परिगृह्यते ।
उकारादप्युमादेवी मकाराच्च महेश्वरः ॥८८॥

कदमको रूखको जस्तो गोलाकार, तारा जस्तो चम्किलो र चारैतिर किरणसमूहद्वारा दीप्यमान ओङ्काररूप ईश्वरको ध्यान गर्नू ।८४।

---

३३ क, ख, ग, घ, ङ. शिखाकृतिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथवा अधोनिर्दिष्ट स्वरूप भएका, शान्त, प्रधान तथा पुरुष तत्त्वभन्दा माथि रहेका, श्वेतकमलमा बसेका ओङ्काररूपी ईश्वरको निरन्तर ध्यान गर्नू ।८५।

अर्थ तथा त्यसको बोधकशब्दको रूपमा विद्यमान अ उ म यी तीन मात्रामा विभक्त भएको शिवरूप ओङ्कारको जप तथा ध्यान गर्नू ।८६।

ओङ्कारमा रहेका अ उ म यी तीनवटा मात्राहरूमा अकारबाट स्कन्द, उकारबाट उमादेवी र मकारबाट महेश्वर यी तीन अर्थहरू बताइएका छन् ।८७।

अकारबाट अग्निबाट गर्भमा आएको हुनाले कार्तिकेयको ग्रहण गरिन्छ भने उकारबाट देवी उमा र मकारबाट भगवान् महादेवको ग्रहण गरिन्छ ।८८।

अथवान्यप्रकारेण ब्रह्माविष्णुमहेश्वराः ।
क्रमान्मात्राः समुद्दिष्टास्तत्परश्चार्द्धमात्रया ॥८९॥

भावनामात्रगम्यत्वादचिन्त्यः परमः शिवः ।
सकलं चिन्तयेत् तस्मात् सिद्धार्थं सततं शिवम् ॥९०॥

अथवा व्यक्तमव्यक्तं पुरुषं चेदनुक्रमात्[३४] ।
मात्रास्तिस्रः समाख्याताः शिवश्चाप्यर्द्धमात्रया ॥९१॥[३५]

श्रीकण्ठनाथं वरदं चतुर्वेदं परं हरम् ।
ध्यायमानस्य सततमैश्वर्यं सम्प्रवर्तते ॥ ९२॥

केचित् क्षित्यादितत्वानां जप[३६]मिच्छन्त्यनुक्रमात् ।
तत्र तं निश्चलीभूतं लभेत् सूक्ष्मेऽपि संस्थितम् ॥९३॥

अथवा अर्को किसिमले अकारबाट ब्रह्मा उकारबाट विष्णु र मकारबाट महेश्वरको बोध हुन्छ। क्रमैसँग अ उ म यी तीन मात्राहरूमा अर्धमात्रारूप अन्तिममात्राद्वारा परम शिवको बोध हुन्छ ।८९।

भावनाद्वारा मात्र बुझिने भएकाले परमशिव अचिन्तनीय छन् त्यसैले अर्थसिद्ध भएका शिवको निरन्तर र सम्पूर्णरूपमा चिन्तन गर्नू ।९०।

अथवा व्यक्त, अव्यक्त र पुरुष यसैक्रममा तीन मात्रा मानिएका छन् भने मकारपछिको अर्धमात्राबाट शिवको बोध हुन्छ ।९१।

---

३४ ग. वेदमुत्क्रमात् ।

३५ घ. ९०, ९१ इति पद्यद्वयं न स्तः ।

३६ ग. क्षित्यादिव्योमान्तं जयम् । घ. क्षित्यादितत्वानां जयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कण्ठमा विशेष शोभा भएका सबैका मालिक वरदाता चतुर्वेदमय परम शिवको निरन्तर ध्यान गर्ने मानिस ऐश्वर्ययुक्त हुन्छ ।९२।

स्थित्यर्थं मनसा शर्वं[३७] स्थूलरूपं विचिन्तयेत् ।
नानारूपाकृतिभेदोऽनन्ततत्त्वमचेतनम् ॥९४॥

यच्छिवाधिष्ठितं रूपं तद्ध्यानं पापशुद्धिदम् ।
मनःस्थितिकरञ्चाशु न तु तत्त्वमचेतनम् ॥९५॥

तस्माद् ध्येयानि सर्वाणि त्यक्त्वा ध्येयो महेश्वरः[३८] ।
तत्सिद्धौ सर्वतः सिद्धिर्न सर्वैः सिद्ध्यते शिवः ॥९६॥

यदा शिवात्मकं रूपं ध्यायन् प्राणैर्विमुच्यते ।
तदा स शिवतां याति नान्यं ध्यायेदतः शिवम्[३९] ॥९७॥

केहीले पृथ्वी, जल आदि तत्वहरूको क्रमैसँग जप गर्दै योगाभ्यास गर्न भन्दछन् । उनका अनुसार ती सूक्ष्म तत्त्वहरूमा निश्चलरूपमा विद्यमान ती परमतत्त्व शिवलाई अभ्यास कर्ताले प्राप्त गर्न सक्दछ ।९३।

स्थितिका लागि मनले अनेकरूप तथा आकारभेदमा अनन्ततत्त्व अचेतन शिवको स्थूलरूपको चिन्तन गर्नू ।९४।

जो ध्यान शिवद्वारा अधिष्ठित हुन्छ त्यसैले पापबाट शुद्धता प्रदान गर्दछ र मनलाई तत्काल स्थिर बनाउँदछ अचेतन तत्त्वले होइन ।९५।

त्यसैले अन्य सबै ध्यानका विषयहरूलाई त्यागेर महादेवको मात्र ध्यान गर्नू किनभने भगवान् शिवको सिद्धिमा सबै कुरा सिद्ध हुन्छन् भने अन्य सबै कुरा सिद्ध हुँदा पनि शिव सिद्ध हुँदैनन् ।९६।

यद्यत्तत्त्वन्तदेवं वा[४०] ध्यायेदभ्यासकारणात् ।
तत्तदीश्वररूपेण तत्त्वं ध्यायेदधिष्ठितम्[४१] ॥९८॥

मेरुसंस्थं क्षितौ शर्वं ध्यायेत्तञ्चेदुमापतिम्[४२] ।
अग्नेरधिपतिं रुद्रमुग्रं पवनमूर्तिनम्[४३] ॥९९॥

३७ ग. भूतम् ।
३८ क, ख, घ, ङ. धेयं महेश्वरम् ।
३९ ख. शिवात् ।
४० ग. यद्यत्तत्त्वन्न देवत्वाद् । ङ. यद्यत्तत्वनदेवं वा ।
४१ घ. दधीश्वरम् ।
४२ ख. भवमुमापतिम् । ग. तञ्च उमापतिम् । घ. च्च तमुमापतिम् ।
४३ घ. मूर्तितम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आकाशाधिपतिं भीममीशानं सूर्यसत्पतिम् ।
चन्द्राधिपं महादेवं पुंसां पशुपतिं परम्[४४] ॥१००॥

अहङ्कारं स्मरेदीशं बुद्धौ सर्वज्ञमीश्वरम् ।
पुंप्रकृत्यासनं शान्तं ध्यायीत परमेश्वरम् ॥१०१॥

जब शिवस्वरूप भगवान्का रूपको ध्यान गर्दै प्राणहरूबाट मुक्त हुन्छ तब त्यसले शिवत्वलाई प्राप्त गर्दछ। त्यसैले अरूको होइन शिवको ध्यान गर्नू ।९७।

जुन जुन तत्त्वलाई त्यो यस्तो छ भनेर अभ्यासका कारणले ध्यान गरिन्छ त्यस त्यस तत्त्वलाई जगदीश्वरको रूपद्वारा अधिष्ठित तत्त्व ठानेर ध्यान गर्नू ।९८।

यदि पृथ्वीमा सुमेरु पर्वतमा विद्यमान् उमापति शिवको ध्यान गरिन्छ भने उनलाई अग्निका अधिपति रुद्र, उग्र र पवनरूपमा ध्यान गर्नु पर्दछ। ९९।

आकाशका अधिपति, भयङ्कर, ईशान, सूर्यका स्वामी, चन्द्रका मालिक, महादेव, मानिसहरूका परम पशुपति, बुद्धिमा अहङ्काररूप, सर्वज्ञ, ईश्वरलाई सम्झँदै पुरुष र प्रकृतिमा अधिष्ठित शान्त, परमेश्वर शिवको ध्यान गर्नू ।१००-१०१।

भूतसिद्धौ भवेत्सिद्धिर्मनस्तन्मात्रपञ्चके[४५] ।
बुद्ध्यहङ्कार[४६]बुद्धस्य शिवत्वं प्रकृतौ भवेत् ॥१०२॥

यत्रस्थं येन रूपेण शिवरूपमनुस्मरेत् ।
लक्षयेदात्मसंस्थै[४७]र्यन्तत्तद् ध्येयं पुनः पुनः ।१०३॥

शुद्धस्फटिकसङ्काशं जटामुकुटभूषितम् ।
प्रसन्नवदनं शान्तं सर्वावयवशोभनम् ॥१०४॥

सितपङ्कजमध्यस्थं समाधिस्थं त्रिलोचनम् ।
पद्मासनस्थमचलमीषत्संवृतलोचनम् ॥१०५॥

सद्बीजपूरककरं वरदाभयपाणिकम् ।
द्वीपिचर्मपरीधानमक्षमालाधरं हरम् ॥ १०६॥

---

४४ ख, ङ. पतिम् ।
४५ घ. पञ्चकम् ।
४६ क, ख, ग, घ, ङ. बुद्ध्याहङ्कार ।
४७ ख. आत्मनः स्थैर्यम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पञ्चमहाभूतहरूको सिद्धि भएमा मन र पञ्चतन्मात्राहरूको पनि सिद्धि हुन्छ। बुद्धि र अहङ्कारको ज्ञान भइसकेको मानिसका निमित्त प्रकृतिमा पनि शिवत्व हुन्छ।१०२।

जहाँ जुनरूपमा रहेका शिवको स्मरण गर्दछ त्यसले आफूमा रहेका ती ती वस्तुहरूको पटक पटक ध्यान गर्नु पर्दछ।१०३।

शुद्ध स्फटिकझैं स्वच्छ, जटा र मुकुटले सुशोभित भएका, हसिलो अनुहार भएका, शान्त र सबै अङ्गप्रत्यङ्गद्वारा सुशोभित सेतो कमको बीचमा बसेका, समाधि लगाईरहेका, तीनवटा आँखा भएका, पद्मासन लगाएका, निश्चल र आँखालाई केही बन्द गरेका, व्यक्ताव्यक्त जगत्को कारणतालाई पूर्णता प्रदान गर्ने क्षमता हातमा भएका (राम्रा राम्रा बीज भएको बिमिरो हातमा

प्रभाकिरणपर्यन्तं भासयन्तं दिगाननम्।
संसारार्णवपर्यन्तं पुरुषानीकतारणम्[४८] ॥१०७॥

इत्थं रूपं शिवं ध्यायेत्[४९] प्रतितत्त्वमनुक्रमात्।
अष्टाङ्गुलं वितस्तिं वा यथा स्वात्मनि संस्थितिः ॥ १०८॥

रूपवर्णप्रमाणाद्यैः परिकल्प्यात्मबुद्धिना।
तथा ध्यायीत देवेशं यथा चित्तं स्थिरम्भवेत् ॥१०९॥

शिवेनाधिष्ठितं यस्माज्जगत्सर्वं चराचरम्।
सर्वरूपः शिवस्तस्मादिदिति ज्ञात्वा न मुह्यति ॥११०॥

प्राणायामैः सुसम्पूर्णः[५०] कुर्याद्वा निश्चलम्मनः।
सर्वसङ्गविनिर्मुक्तः सेवेद्वा विजनं वनम् ॥१११॥

लिएका), वरदान दिने र निर्भय तुल्याउने शक्ति हातमा भएका (सूर्यमुखीको फूल र उसिरको जरो हातमा लिएका), वाघको छाला लगाएका, रुद्राक्षको माला लगाएका, पाप र संसारका संहर्ता, कान्ति र प्रकाशले दिशाहरूका मुखहरूलाई प्रकाशित गरिरहेका, संसार सागरको पारिसम्म पुरुषरूपी सेनालाई तार्ने यस्ता सदाशिवको प्रत्येक तत्त्वमा क्रमैसँग आठ अङ्गुल वा बाह्र अङ्गुलको विस्तारमा आफ्नो आत्मामा ध्यान गर्नू। १०४-१०८।

रूप, रङ र नाप आदिद्वारा आफ्ना बुद्धिले परिकल्पना गरेर जसरी आफ्नो मन स्थिर हुन्छ त्यसै गरी देवताहरूका देवता भगवान् शिवको ध्यान गर्नू।१०९।

---

४८ ग. पुरुषानीककारणम्।
४९ ग. ध्यानम्।
५० ग, घ. सुसम्पूर्णैः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0 In Public Domain. Digitization by eGangotri

यो स्थावर जङ्गम सम्पूर्ण संसार भगवान् शिवद्वारा अधिष्ठित छ त्यसैले भगवान् शिव सर्वरूप सर्वमय छन् । यो कुरा जानेर मानिस मोहमा पर्दैन ।११०।

उत्साहान्निश्चयाद्धैर्यात्सन्तोषात्तत्त्वदर्शनात् ।
मुनेर्जनपदत्यागात्[५१] षड्भिर्योगः प्रसिद्ध्यति ॥११२॥

प्राणायामः प्रत्याहारः प्रतिष्ठानञ्च धारणा ।
ध्यानञ्जपः समाधिश्च षडङ्गयोगसाधनम् ॥११३॥[५२]

प्राणो वायुः शरीरस्थस्तस्यायामो निरोधनम् ।
रेचकः पूरकः कुम्भस्त्रिविधः संप्रकीर्तितः ॥११४॥

नासिकापुटमङ्गुल्या पीड्यैकमपरेण च ।
औदर्यं रेचयेद् वायुं रेचनाद्रेचकः स्मृतः ॥११५॥

प्राणायामहरूद्वारा युक्त भएर अथवा मनलाई स्थिर बनाएर सबै किसिमका सङ्गहरूबाट मुक्त भएर निर्जन वनको सेवन गर्नू ।१११।

उत्साह, निश्चय, धैर्य, सन्तोष, वास्तविकताको ज्ञान र नगरको त्याग यी छ कुराहरूबाट मुनिले योग सिद्ध गर्न सक्दछन् ।११२।

प्राणायाम, प्रत्याहार–प्रतिष्ठान, धारणा, ध्यान, जप र समाधि यी षडङ्ग योगका साधनहरू हुन् ।११३।

शरीरमा रहेको वायु प्राण कहलाउँछ भने त्यो प्राणलाई रोक्नु आयाम हो । त्यो प्राणायामका रेचक, पूरक र कुम्भक गरी तीनभेद छन् ।११४।

नाकको एउटा प्वाललाई औंलाले थिचेर अर्को प्वालबाट पेटको हावालाई बाहिर निकाल्नू । वायुको विरेचन गर्ने हुनाले नै यसलाई रेचक भनिन्छ ।११५।

बाह्येन वायुना देहं दृतिवत् पूरयेद् भृशम् ।
तथा पूर्णः स तिष्ठेत पूरणात्पूरकः स्मृतः ॥११६॥

न मुञ्चति न गृह्णाति वायुमन्तर्बहिःस्थितम् ।
आपूर्णः कुम्भवत्तिष्ठेदचलः स तु कुम्भकः ॥११७॥

---

५१ क. मुमर्जनयत्यागाद् ।
५२ ग. पद्यमिदं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कन्यसः सकृदुद्घातः[५३] स च द्वादशमात्रकः ।
मध्यमश्च द्विरुद्घात[५४]श्चतुर्विंशतिमात्रकः ॥११८॥

उत्तमश्च त्रिरुद्घातः[५५] षड्त्रिंशत्तालमात्रकः ।
स्वेदकम्पादिपातानां जननश्चोत्तमोत्तमः ॥११९॥

अजित्वा नारुहेद्भूमे[५६]र्वायोरुत्तमकांक्षया ।
अजितारोहणाद्भूमेरुपजायन्त्युपद्रवाः ॥१२०॥

बाहिरको हावाले शरीरलाई खलाँतिमा हावा भरे झैं पूर्ण रूपमा भर्नू । त्यसरी शरीरलाई हावाले भर्ने भएको हुनाले यसलाई पूरक भनिएको छ ।११६।

भित्र रहेको हावालाई बाहिर नछोडेर बाहिरको हावालाई भित्र न तानेर अर्थात् बाहिरकोलाई बाहिरै र भित्रकोलाई भित्रै छेकेर भरिएको घैंटो झैं हावालाई निश्चल बनाएर राख्नु कुम्भक हो ।११७।

एक उद्घात र बाह्र मात्राले युक्त प्राणायाम सबभन्दा सानो र दुई उद्घात र चौबीस मात्राको प्राणायाम मध्यम मानिन्छ। (यहाँ प्राणवायु अपानवायुसँग ठोक्किएर नाभिमूलबाट शिरसम्म पुग्ने प्रक्रियालाई उद्घात भनिन्छ भने घुँडाका चारैतिर हतार नगरी ठिक्कसँग चुटकी बजाउँदै हात घुमाउँदा जति समय लाग्छ त्यस समयावधिलाई मात्रा भनिन्छ) ।११८।

हिक्का श्वासः प्रतिश्यायः कर्णदन्ताक्षिवेदनाः ।
मूकता जडता कासः शिरोरोगः श्रमो ज्वरः ॥१२१॥

इत्येवमादयो दोषा जायन्ते व्युत्क्रमेण तु ।
सर्वरोगचिकित्साश्च संक्षेपाच्छृणु योगिनाम् ॥१२२॥

यस्मिन् यस्मिन् भवेद्देशे योगिनां व्याधिसम्भवः ।
तत्तदङ्गं धिया व्याप्य धारयेत्तत्र धारणाम् ॥१२३॥

आग्नेयीं धारणां ध्यायेद्रोगे वायव्यवारुणे ।
वायव्याग्नेयदोषे च विषदोषे च सर्वतः ॥ १२४॥

तीन उद्घात भएको छत्तीस मात्राको प्राणायाम उत्तम मानिन्छ । पसिना, कम्पन र पतनलाई उत्पन्न गर्ने उत्तम प्राणायाम हो ।११९

---

५३ ग. उद्यातः ।
५४ ग. उद्यातः ।
५५ ग. उद्यातः ।
५६ क, ङ. अजितामारुहेद्भूमे । ग. अजिताप्त (मा) रुहम्दूमे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्राणवायुलाई उत्तम तरिकाले साध्ने आकांक्षाले भूमिलाई नजितेर प्राणायामका लागि आरोहण गर्नुहुँदैन। नजितेको भूमिमा आरोहण गर्दा अनेक किसिमका उपद्रव हुने गर्दछन् ।१२०।

वायुभूमिलाई नजितेर आरोहण गर्दा हिक्का, श्वासप्रश्वास, रुघा, तथा कान, दाँत र आँखाका रोगहरू, लाटोपन, बोझोपन, खोकी, टाउको दुख्ने, थकान महसुस हुने र ज्वरो आउने इत्यादि अनेक किसिमका दोषहरू प्राणायामको व्युत्क्रममा हुने गर्दछन्। योगीहरूका सबै रोगहरूको उपचारका तरिकाहरू संक्षेपमा सुन म भन्छु।१२१-१२२।

जुन जुन ठाउँमा वा अङ्गमा योगीहरूलाई रोगको सम्भावना हुन्छ ती ती अङ्गहरूलाई बुद्धिले व्याप्त गरेर त्यहाँ धारणालाई धारण गर्नू ।१२३।

हावा अथवा पानीसँग सम्बद्ध रोगहरूका लागि अग्निसम्बद्ध धारणा बनाउनू। अग्निसँग सम्बद्ध दोष वा रोग लागेमा वायव्य धारणा बनाउनू। विषको प्रकोप भएमा सबै खाले धारणाहरूको प्रयोग गर्नू ।१२४।

अमृतञ्चिन्तयेत्प्राज्ञः क्षुत्पिपासातुरस्तथाः ।
अन्योन्याभिभवादेव ज्ञात्वा युञ्जीत धारणाम् ॥१२५॥

ध्यानेनैव प्रणश्यन्ति[५७] ये रोगा योगसम्भवाः ।
भेषजैर्जपहोमैश्च दानपुण्यैश्च कर्मजाः ॥१२६॥

यथारण्ये गजः सिंहः पुरुषैरप्रयोगतः ।
नाशयेद्धार्यमाणस्तु तथा वायुरबुद्धिभिः ॥१२७॥

स चैव हि[५८] यथा हस्ती प्रयोगाद् दम्यते शनैः ।
निर्दोषश्च भवेत्कालाद्वश्यः सौम्यश्च जायते ॥१२८॥

शनैः शनैस्तथा प्राणः प्रयोगाद्वश्यताङ्गतः ।
स्वेच्छया धार्यते देहे न तद्दोषं करोति च ॥१२९॥

भोक र प्यासले आतुर भएको बुद्धिमान् मानिसले अमृतको धारणा बनाउने चिन्तन गर्नू। एकअर्कालाई अभिभूत गर्न सक्ने तत्त्वहरूको ज्ञान गरेर धारणा बनाउनू ।१२५॥

योगका कारणबाट उत्पन्न भएका रोगहरू ध्यानद्वारा नष्ट हुन्छन् भने कर्मद्वारा उत्पन्न भएका रोगहरू औषधि, हवन, दान तथा धर्माचरणबाट शान्त हुन्छन् ।१२६।

जसरी पुरुषहरूद्वारा नियन्त्रणमा नलिइएका जङ्गली हात्ती वा सिंह जङ्गललाई नाश गरिदिन्छन् त्यसै गरी बुद्धिहीनले वेठीक तरिकाले धारणा गरेको वायुले पनि नाश गर्दछ ।१२७।

५७ घ. १११ पद्यस्य तृतीयचरणात् १२६ पद्यस्य प्रथमचरणं यावत् नास्ति।
५८ ग. स वै वायुः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0- In Public Domain. Digitization by eGangotri

जसरी हात्तीलाई तह लगाउँदा सुस्तरी नियन्त्रणमा लिन सकिन्छ त्यसैगरी वायुको प्रयोग गर्नाले समय वित्दै जाँदा त्यो वायु निर्दोष आफ्नो अधीन र सौम्य बन्न सक्दछ ।१२८।

यथा प्रचोदितो हस्ती परसैन्यं विनाशयेत् ।
रक्षते च प्रयोक्तारमारूढञ्च बलेन सः ॥१३०॥

तथा शरीरे संरुद्धः प्राणः सम्यक् प्रचोदितः ।
निर्दहेत् सर्वपापानि तच्छरीरञ्च रक्षति ॥१३१॥

प्राणैर्विनिर्जिते देहे चिन्हान्येतानि लक्षयेत् ।
विण्मूत्रश्लेष्मदोषाणामल्पभावः प्रजायते ॥१३२॥

बहुभोजनसामर्थ्यं चिरादुच्छ्वसनन्तथा ।
आरोग्यं शीघ्रगामित्वमुत्साहः स्वरसौष्ठवम्[५९] ॥१३३॥

बलवर्णप्रसादश्च सर्वदोषक्षयस्तथा ।
एवमादीनि चिह्नानि सत्त्वस्थस्य प्रजाग्रति[६०] ॥१३४॥

सुस्त सुस्त प्रयोग भैरहेको प्राणवायु वसमा हुन्छ र आफ्नो इच्छाअनुसार शरीरमा धारणा गरिन्छ त्यसरी वशमा भएर धारणा गरिएको वायुले कुनै किसिमको रोगको दोष हुन दिँदैन ।१२९।

जसरी वशमा लिई निर्दिष्ट गरिएको हात्तीले शत्रुसेनालाई नष्ट गर्दछ र आफूलाई प्रयोग गर्ने आफूमाथि चढेको मानिसको बलपूर्वक रक्षा गर्दछ त्यसै गरी राम्रोसँग नियन्त्रित गरेको प्राणवायुले प्रेरित भएर शरीरका सबै पापहरूलाई नष्ट गर्दछ र शरीरको रक्षा गर्दछ ।१३०-१३१।

प्राणहरूले जितेको शरीरमा निम्नलिखित चिह्नहरू अभिलक्षित हुने गर्दछन्- दिशा, पिशाव तथा कफ आदिजन्यदोषहरू कम हुने गर्दछन् ।१३२।

धेरै खाना खाने सामर्थ्य, लामो समयसम्म सास फेर्न सक्ने क्षमता, निरोगिता, छिटो हिँडाइ, उत्साह र स्वरमा सुन्दरता योगबाट प्राप्त हुन्छ ।१३३।

स चागर्भः[६१] सगर्भश्च प्राणायामो द्विधा स्थितः ।
जपध्यानं विनाऽगर्भः सगर्भस्तत्समन्वितः ॥१३५॥

---

५९ क, ग. सुरसौष्ठवम् ।

६० क, ख, ङ. प्रजायते ।

६१ ग. अगर्भश्च

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

अगर्भाद् गर्भवान् ज्ञेयः प्राणायामः शताधिकः ।
सगर्भं धारयेत्तस्मादिन्द्रियाणां जयोत्सुकः ॥१३६॥

CC-0. In Public Domain. Digitization by eGangotri

समस्तेन्द्रियवृत्तिश्च प्राणो वायुः प्रकीर्तितः ।
तज्जयादिन्द्रियाण्येव निर्जितानि भवन्ति च[६२] ॥१३७॥

वृत्तिवृत्तिमतोर्यस्मादभेदः परिगीयते ।
तस्माद् वृत्तिजयादेव वृत्तिमान्निर्जितो भवेत् ॥१३८॥

सामर्थ्य, राम्रो वर्ण तथा खुशियाली छाउँनु र सम्पूर्ण दोषहरू नष्ट हुनु आदि चिह्नहरू सत्त्वस्थ प्राणीमा जाग्दछन् ।१३४।

अगर्भ र सगर्भ दुई किसिमको प्राणायाम हुन्छ । जप र ध्यान विनाको प्राणायामलाई अगर्भ भनिन्छ भने जप र ध्यानसहितको प्राणायाम सगर्भ कहलाउँदछ ।१३५।

अगर्भ प्राणायामभन्दा सगर्भ प्राणायामको फल सय गुणा बढी हुन्छ । त्यसैले इन्द्रियलाई जित्न चाहने मानिसहरूले सगर्भ प्राणायाम धारण गर्नुपर्दछ ।१३६।

समस्त इन्द्रियहरूका व्यापारहरू प्राणवायुरूप मानिएका छन् । त्यसैले प्राणवायुलाई जित्ने हो भने सम्पूर्ण इन्द्रियहरूलाई जित्न सकिन्छ ।१३७।

व्यापार र व्यापारवाला दुबै अभिन्न मानिने गर्दछन् त्यसैले व्यापारलाई जित्ने हो भने व्यापारवालालाई आफै जितिन्छ ।१३८।

ज्ञानवैराग्ययोक्त्राभ्यां प्राणायामकशेन च ।
इन्द्रियाश्वान् विनिर्जित्य सर्वमेव जितम्भवेत् ॥१३९॥

इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ ।
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥१४०॥

शरीरं रथमित्याहुरिन्द्रियाण्यस्य वाजिनः ।
सारथिः पुरुषः प्रोक्तः प्राणायामः कशः स्मृतः ॥ १४१॥

ज्ञानवैराग्यरश्मिभ्या[६३]मायाम्य विधृतम्मनः ।
शनैर्निश्चलतामेति प्राणायामकशाहतम्[६४] ॥१४२॥

---

६२ ग. तु ।

६३ घ. १३६ पद्यस्य द्वितीयचरणात् १३९ पद्यस्य प्रथमचरणं यावत् नास्ति ।

६४ ग. शाहते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मनोवाजिनमत्युग्रं निगृह्णानःपुनः पुनः ।
विनिर्वेद्य पुनर्गच्छेत् कुर्यादेवात्मनो हितम् ॥१४३॥

CC-0. In Public Domain. Digitization by eGangotri

ज्ञान र वैराग्यका प्रयोक्ताहरूले प्राणायामरूपी कोर्रले इन्द्रियरूपी घोडाहरूलाई जितेर सारा संसारलाई जित्न सक्दछन् ।१३९।

इन्द्रिय नै स्वर्ग तथा नरक दुबैरूप हुन् । वशीकृत इन्द्रियहरू स्वर्गका लागि हुन्छन् भने उन्मुक्त इन्द्रियहरू नरकका लागि हुन्छन् ।१४०।

शरीरलाई रथ भनिन्छ भने त्यस रथका घोडाहरू इन्द्रियहरू हुन् । पुरुष सारथि हो भने प्राणायाम इन्द्रियरूप घोडाहरूलाई तह लगाउने कोर्रा हो ।१४१।

ज्ञानवैराग्यरूपी लगामहरूद्वारा नियन्त्रित गरेर राखिएको मन प्राणायामरूपी कोर्राका प्रहारबाट सुस्तरी निश्चल हुँदै जान्छ । १४२।

जलबिन्दुं[६५] कुशाग्रेण मासे मासे च यः पिवेत्[६६] ।
संवत्सरशतं साग्रं प्राणायामश्च तत्समः ॥१४४॥

तपांसि यानि पठ्यन्ते यज्ञा दानं ब्रतानि च ।
सर्वतीर्थाभिषेकश्च प्राणयामश्च तत्समः ॥१४५॥

प्राणस्यैव जयो योगः प्राणस्यैव जयस्तपः ।
प्राणस्यैव जयात्सर्वं प्राप्यते नात्र संशयः ॥१४६॥

अथ प्रत्याहारचित्तं विसृतं भोगतृष्णया ।
भवदोषविचारेण कुर्यादुन्नीय सर्वतः ॥१४७॥

मनरूपी अत्यन्त उग्र घोडालाई बारंबार नियन्त्रण गर्दै वैराग्यका साथ आफ्नो हितको अभ्यास गर्नू ।१४३।

कुशका टुप्पाले महिना महिनामा पानीको थोपा पिएर सय वर्षसम्ममा सबै पानी सकिए झैं प्राणायाम पनि सुस्त सुस्त गरिन्छ ।१४४।

जति तपस्याहरू, यज्ञहरू, दानहरू, व्रतहरू र तीर्थहरूमा स्नानहरू वताइएका छन् प्राणायाम ती सबै बराबर छ ।१४५।

---

६५ क, ख, ग, घ, ङ. जलविन्दु ।

६६ ग. क्वचित्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्राणलाई नै जित्नु योग हो, प्राणलाई जित्नु नै तप हो, प्राणकै विजयबाट सम्पूर्ण प्राप्तव्य प्राप्त हुन सक्दछन् यसमा कुनै सन्देह छैन ।१४६।

संसारका दोषहरूका बारे विचार गरेर भोगहरूको तिर्सनामा दौडिरहेको चित्तलाई हरतरहले माथि उठाएर प्रत्याहारनामक योगाङ्गबाट स्थिर बनाउनू ।१४७।

उद्धरेदात्मनात्मानमुह्यमानमनाथवत् ।
भोगनद्यतिवेगेन[६७] ज्ञानबृक्षसमाश्रयात् ॥१४८॥

इन्द्रियाणि प्रसक्तानि प्रतिस्वं विषयोदधौ ।
आहृत्य यो निगृह्णाति प्रत्याहारः स उच्यते ॥१४९॥

एवं यः शान्तचित्तात्मा प्रत्याहारमनुक्रमात् ।
स सर्वतीर्थयज्ञानां फलं प्राप्य शिवं व्रजेत् ॥१५०॥

यद्वा यावत् स्थितं लक्ष्यन्न तस्माच्चलते मनः ।
तावत्कालं प्रदेशेषु धारणा मनसः स्थितिः[६८] ॥१५१॥

अनाथ झैं भोगरूपी नदीको अत्यन्त वेगले वगाईरहेको आफूलाई ज्ञानबृक्षको आश्रयबाट आफैले उद्धार गर्नू ।१४८।

विषयरूपी समुद्रमा हेलिएका प्रत्येक इन्द्रियलाई विषयहरूबाट फर्काएर नियन्त्रण गर्नुलाई प्रत्याहार भनिन्छ ।१४९।

यसरी जो क्रमैसँग प्रत्याहारबाट चित्तलाई शान्त तुल्याउँछ त्यसले सबै तीर्थ तथा सबै यज्ञहरूका फलहरू प्राप्त गर्नुका साथै शिवलाई प्राप्त गर्दछ ।१५०।

अथवा जति लक्ष्य निर्धारित गरिएको हुन्छ त्यसबाट मन चञ्चल हुँदैन र त्यसबेलासम्म निर्धारण गरिएका स्थानहरूमा मनको स्थिति विद्यमान रहनुलाई धारणा भनिन्छ ।१५१।

कालावधिपरिच्छिन्नं देहे संस्थापितं मनः ।
न प्रच्यवति पक्षाद्वा धारणा[६९] साऽभिधीयते ॥१५२॥

धारणा द्वादशायामा ध्यानं द्वादशधारणम् ।
ध्यानद्वादशकं यावत्समाधिरभिधीयते ॥१५३॥

६७ क, ख, ग, ङ. भोगमद्यातिवेगेन ।
६८ घ. मनसि स्थितिः । ङ. मनसि स्थिता ।
६९ घ. यन्त क्ष्याद् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

धारणाभ्यासयुक्तात्मा यदि प्राणैर्वियुज्यते ।
कुलैकविंशदुत्तार्य स्वयं याति शिवं पदम् ॥१५४॥

CC-0. In Public Domain. Digitization by eGangotri

ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः ।
अनाक्षिप्तेन मनसा ध्यानमित्यभिधीयते ॥१५५॥

आत्मनः समनस्कृत्य मुक्ताशेषोपधस्य[७०] च ।
शिवचिन्तासमासक्तिर्ध्यानं नाम तदुच्यते ॥१५६॥

अथवा शरीरमा संस्थापित चित्त निर्धारित समयको सीमासम्म आफ्नो ठाउँ वा पक्षबाट च्युत हुँदैन तबसम्मको स्थितिलाई धारणा भनिन्छ ।१५२।

धारणामा बाह्र प्राणायाम हुन्छन् भने ध्यानमा बाह्र धारणा हुन्छन् र बाह्र ध्यान भएको समाधि हुन्छ ।१५३।

धारणाको अभ्यास गरिरहेको मानिस यदि प्राण वियुक्त हुन्छ भने उसले आफ्ना एक्काईस कुल तार्नुका साथै स्वयंले शिवपद प्राप्त गर्दछ ।१५४।

चिन्तार्थक ध्यैधातुबाट ध्यान शब्द बनेको हो र पटक पटक शिवको चिन्तन गर्नु ध्यान हो । कतै आक्षिप्त नभएको मनद्वारा पटक पटक गरिने चिन्तानै ध्यान कहलाउँछ ।१५५।

ध्येयालम्बनसंस्थस्य सदृशः प्रत्ययस्य च ।
प्रत्ययान्तरनिर्मुक्तः प्रवाहो ध्यानमुच्यते ॥१५७॥

ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित् ।
ध्यानन्तत्रेदमुद्दिष्टं प्रत्ययस्यैकतानता ॥१५८॥

एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् ।
कुलस्वजनमित्राणि समुद्धृत्य शिवो भवेत् ॥१५९॥

एवं मुहूर्तमर्द्धं वा ध्यायेद्यः श्रद्धया शिवम् ।
सोऽपि याङ्गतिमाप्नोति न तां सर्वैर्महामखैः ॥१६०॥

यावन्तः कर्मयज्ञाः स्युर्व्रतदानतपांसि च ।
सर्वे ते जपयज्ञस्य नार्घन्ति[७१] षोडशीं कलां ॥१६१॥

---

७० ख, ग, ङ. शेषौषधस्य ।

७१ घ. नार्हीति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आफूलाई मनका साथमा सम्पूर्ण कष्टहरूबाट मुक्त बनाएर शिवचिन्तामा नै आसक्त राख्नुलाई ध्यान भनिन्छ ।१५६

ध्यानयोग्य आलम्बनमा विद्यमान विश्वासको अनुकूल प्रवाहलाई ध्यान भनिन्छ जो अन्य ध्येय र विश्वासहरूबाट सर्वथा मुक्त हुन्छ ।१५७।

जुनसुकै ठाउँमा पनि ध्येयमा मन संलग्न रहेका योगीको विश्वासप्रतिको एकाग्रतालाई ध्यान भनिन्छ।१५८।

यसरी जसले ध्यानमा संलग्न रहेरनै देह परित्याग गर्दछ त्यसले आफ्नो कुल आत्मीय जनहरू र मित्रहरूको उद्धार गर्नुका साथै शिवत्वलाई प्राप्त गर्दछ ।१५९।

यसरी जसले एक मुहूर्त वा आधा मुहूर्त श्रद्धापूर्वक शिवको ध्यान गर्दछ उसले जुन गति पाउँछ त्यो गति सम्पूर्ण महायज्ञ गर्नेहरूले पनि पाउँदैनन् ।१६०।

माहात्म्यं वाचिकस्यैव जपयज्ञस्य कीर्तितम् ।
अस्माच्छतगुणोपांशुः साहस्रो मानसः स्मृतः ॥१६२॥

यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ।
मन्त्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ॥१६३॥

शनैरुत्थापयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।
किञ्चिच्छब्दान्[७२] स्वयं विद्यादुपांशुस्तज्जपः स्मृतः ॥१६४॥

धिया यदक्षरश्श्रेण्या[७३] वर्णाद् वर्णं पदात्पदम् ।
शब्दार्थचिन्तनाभ्यस्तं तदुक्तं मानसं जपः ॥१६५॥

जति पनि कर्मयज्ञहरू, व्रत, दान तथा तपस्याहरू बताइएका छन् ती सबै जपयज्ञको सोह्रौं कलाको बराबर पनि हुँदैनन् ।१६१।

वाचिक जपयज्ञको जति महत्त्व छ उपांशुजपयज्ञ त्यसभन्दा सयगुणा बढी फलदायी हुन्छ भने मानस जप हजारगुणा बढी फलदायी हुन्छ ।१६२।

उच्च अथवा उदात्त, नीच अथवा अनुदात्त तथा स्वरित अथवा मिश्र स्वरहरूका साथ स्पष्ट पद र अक्षरहरू भएका शब्दहरूद्वारा सुनिने गरी जुन मन्त्र उच्चारण गरिन्छ, त्यो वाचिक जपयज्ञ हो ।१६३।

हल्का ओठहरू चलाउँदै उच्चारण भएका शब्दहरूलाई केही रूपमा आफूले मात्र सुन्ने गरी सुस्तरी मन्त्रको उच्चारण गर्नु उपांशुजपयज्ञ कहलाउँछ ।१६४।

---

७२ क, ख, ग, घ. शब्दात् ।
७३ ग. श्रोण्याम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

त्रयाणां जपयज्ञानां श्रेयः स्यादुत्तरोत्तरम् ।
CC-0. In Public Domain. Digitization by eGangotri
भवेद्यज्ञविशेषश्च विशेषस्तत्फलस्य च ॥१६६॥

जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीम् ॥१६७॥

यक्षरक्षःपिशाचाश्च ग्रहाः सर्पादिभीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥१६८॥

जपेन पापं क्षपयेदशेषं यत्तत्कृतं जन्मपरम्परासु ।
जपेन रोगाञ्जयते च मृत्युं जपेन सिद्धिं लभते च मुक्तिम्[७४] ॥१६९॥

बुद्धिले अक्षरहरूको पङ्क्तिमा वर्णबाट वर्णको, पदबाट पदको र शब्द तथा त्यसको अर्थको चिन्तनले युक्त भएर गरिएको जुन जपाभ्यास हो त्यो मानस जप कहलाउँछ ।१६५।

तीनवटै जपयज्ञहरूमा अघिल्लो अघिल्लो भन्दा पछिल्लो पछिल्लो बढी कल्याणकारी छ । यज्ञविशेष तथा यज्ञविशेषका फल विशेष समेत उत्तरोत्तर श्रेयस्कर हुन्छन् ।१६६।

जपद्वारा स्तुति गरिएका देवता सधैं प्रसन्न हुन्छन् र उनले ठूला ठूला भोग सामग्रीहरू र शाश्वत मोक्ष समेत प्रदान गर्दछन् ।१६७।

डराएका यक्ष, राक्षस, पिशाच, ग्रहहरू तथा सर्प आदि डरलाग्दा जीवजन्तुहरू जपशाली व्यक्तिका नजिक पर्दैनन् ।१६८।

जन्मपरम्पराहरूमा जो पाप गरिएका थिए, ती सम्पूर्ण पापहरूलाई जपद्वारा नष्ट गरेर जपद्वारा नै रोगहरूलाई र मृत्युलाई जितिन्छ भने जपद्वारा नै सिद्धि र मोक्ष प्राप्त गर्न सकिन्छ ।१६९।

जपाच्छ्रान्तः शिवं ध्यायेद् ध्यानाच्छ्रान्तः पुनर्जपेत् ।
जपध्यानाभियुक्तस्य शिवः क्षिप्रं प्रसीदति ॥१७०॥

पदार्थमात्रनिर्भासः स्तिमितोदधिवत्स्थितः ।
स्वरूपशून्यवद् ध्यानं तत्समाधिरिहोच्यते[७५] ॥१७१॥

ध्येये मनः सन्निवेश्य यत्तिष्ठेन्निश्चलश्चिरम्[७६]।
निर्वाणानलवद्योगी समाधिस्थः प्रकीर्तितः ॥१७२॥

---

७४ ग. मोक्षम् ।

७५ घ. समाधिरिवोच्यते ।

७६ घ. चिरं यस्तिष्ठेन्निश्चलः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
न श्रृणोति न चाघ्राति न रस्यति न पश्यति ।
न च स्पर्शं विजानाति न सङ्कल्पयते मनः ॥१७३॥

न चातिमन्यते किञ्चिन्न च बुद्ध्यति काष्ठवत् ।
एवमीश्वरसंल्लीनः समाधिस्थः प्रगीयते ॥१७४॥

जपबाट थाकेपछि शिवको ध्यान गर्नू र ध्यानबाट थाकेपछि पुन जप गर्नू । यसरी जसले पालै पालोसँग जप र ध्यान गर्दछ त्यसबाट भगवान् शिव छिटै प्रसन्न हुन्छन् ।१७०।

पदार्थमात्रको पनि बोध नहुने पानी रोकिएको सागर झैं विद्यमान स्वरूपतः शून्यले युक्त जुन ध्यान हो त्यसलाई समाधि भनिन्छ ।१७१।

जो ध्यानको विषयमा मन लगाएर निर्वात अग्नि झैं चिरकालसम्म निश्चल रहन्छ, त्यस योगीलाई समाधिस्थ भनिन्छ ।१७२।

समाधिकालमा योगीले न सुन्छ, न सुघ्छ, न बोल्छ, न हेर्छ, न त कसैले छोएको थाहा पाउँछ र न त मनले नै कुनै कल्पना गर्दछ ।१७३।

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
ध्यायतः शिवमात्मस्थं समाधिस्थस्य योगिनः ॥१७५॥

प्राणायामाद् भवेत् क्षिप्रं सर्वपापपरिक्षयः ।
सर्वेन्द्रियवशीकारः प्रत्याहारेण जायते ॥१७६॥

मनसः परमं स्थैर्यं धारणातः प्रवर्तते ।
ध्यानेन प्रलयं गच्छेदनैश्वर्यगुणाष्टकम् ॥१७७॥

प्रसादाभिमुखी प्रीता भवेज्जप्येन देवता ।
समाधिना च सर्वत्र प्रज्ञालोकः प्रवर्तते ॥१७८॥

न केही कुरा खेलाउँछ, न केही बुझ्दछ र काठजस्तै निश्चल निश्चेष्ट ईश्वरमा मात्र लीन भएको योगी समाधिस्थ कहलाउँछ ।१७४।

आत्मामा रहेका शिवको ध्यान गरिरहेका समाधिमा लीन योगीको उपमा हावा विनाको निश्चल वत्ती हुन सक्दछ । ।१७५।

प्राणायामद्वारा सम्पूर्ण पापहरूको नाश हुन्छ र प्रत्याहारद्वारा सम्पूर्ण इन्द्रियहरू वशमा पर्दछन् ।१७६।

धारणाद्वारा मन अत्यन्त स्थिर हुन्छ र ध्यानद्वारा निर्दयता आदि आठ गुणयुक्त दारिद्र्य नष्ट हुन्छ र ऐश्वर्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

प्राप्त हुन्छ। ।१७७। CC0. In Public Domain. Digitization by eGangotri

जपद्वारा आराध्य देव कृपाभिमुख तथा प्रसन्न हुन्छन् र समाधिद्वारा सबैतिर बुद्धिको प्रकाश फैलन्छ।१७८।

एवमभ्यस्यतः पुंसः षडङ्गं योगसाधनम् ।
तदन्तराया नश्यन्ति मृगाः सिंहभयादिव ।।१७९।।

आलस्यं व्याधयस्तीव्राः प्रमादध्यानसंशयाः ।
अनवस्थितचित्तत्वमश्रद्धाभ्रान्तिदर्शनम् ।।१८०।।

दुःखानि दौर्मनस्यञ्च विषयेषु च लोलता ।
इत्येवमादिकाः प्रोक्ता योगविघ्नाः स्वभावतः ।।१८१।।

अत्यन्तोत्साहयुक्तस्य जपध्यानरतस्य च ।
तदन्तराया नश्यन्ति सर्वे विघ्नाः शनैः शनैः ।।१८२।।

उपशान्तेषु विघ्नेषु समाधिस्थस्य योगिनः ।
उपसर्गाः प्रवर्तन्ते दिव्यास्ते सिद्धिसूचकाः ।।१८३।।

यसरी छ अङ्ग भएको योगसाधनाको अभ्यासमा संलग्न भएका मानिसका सबै विघ्नबाधाहरू सिंहको डरले मृग भागे भैं भाग्दछन् ।१७९।

आलस्य, तीव्ररोगहरू, प्रमाद, ध्यानमा उत्पन्न हुने सन्देहहरू, चित्तको अस्थिरता, श्रद्धाहीनता र भ्रम हुनु, दुःखहरू, मन स्वच्छ नहुनु, विषयहरूमा चञ्चलता आउनु आदि योगमा आइलाग्ने स्वाभाविक विघ्नहरू हुन् ।१८०-१८१।

अत्यन्त उत्साहले युक्त तथा जप र ध्यानमा संलग्न व्यक्तिहरूका ती विघ्नहरू सुस्त सुस्त आफै नष्ट भएर जान्छन् ।१८२।

विघ्नहरू शान्त भएपछि समाधिस्थ योगीका लागि दिव्यसिद्धिका सूचक उपसर्गहरू आइलाग्दछन् ।१८३।

प्रातिभः श्रावणो वार्ता दर्शनास्वादवेदनाः ।
षडुपसर्गा योगस्य परित्यागे च सिद्धयः ।।१८४।।

प्रार्थयन्ति च तान्देवा भोगैर्दिव्यैश्च योगिनम्[७७] ।
नृपाश्च पृथिवीदानैर्धनैश्चान्यैर्धनाधिपाः ।।१८५।।

७७ ग. योगिनः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उपतिष्ठन्ति रत्नानि धनानि च महान्ति च ।
वेदादिसर्वशास्त्राणि स्वयमेव भवन्ति च ॥१८६॥

अभीष्टच्छन्दोहृदयं काव्यं चास्य प्रवर्तते ।
रसायनानि सर्वाणि दिव्याश्चौषधयः स्वयम् ॥१८७॥

समस्तानि च शिल्पानि कलाः सर्वाश्च विन्दति ।
नागाः सुरेन्द्रकन्याश्च प्रणिपत्य नमन्ति च ॥१८८॥

प्रतिभा, सुनाइ, वार्ता, दर्शन, आस्वाद र संवेदना यी योगका छ उपसर्गहरू हुन्छन् । यिनीहरूको परित्याग गर्ने हो भने सिद्धिहरू प्राप्त हुन्छन् ।१८४।

ती योगीहरूसँग देवताहरूले दिव्य भोगद्वारा, राजाहरूले पृथ्वीदानद्वारा र अन्य धनपति मानिसहरूले धनद्वारा प्रार्थना गर्दछन् ।१८५।

सम्पूर्ण रत्नहरू र ठूला धनराशिहरू आफै आइलाग्दछन् भने वेदादि सबै शास्त्रहरू स्वयं ज्ञानका विषय हुन्छन् ।१८६।

आफूले चाहेको जस्तो छन्दलाई आत्मसात् गरेको काव्य आफै त्यस योगीमा प्रवृत्त हुन्छ । सबै रसायनहरू र सबै दिव्य ओखतीहरू स्वयं आइलाग्दछन् ।१८७।

महामहोदधेर्यद्वद् भग्नाज्जायन्ति विप्रुषः ।
योगैश्वर्योदधेस्तद्वद् विप्रुषः प्रातिभादयः ॥१८९॥

प्रातिभादिषु क्षुद्रेषु गुणेष्वासक्तचेतसः ।
सम्भवेत्परमैश्वर्यमक्षयं सार्वकामिकम् ॥१९०॥

तस्माद्गुणांश्च भोगांश्च देवासुरमहीभृताम् ।
तृणवद्यस्त्यजेत् सर्वानीशस्तस्य प्रसीदति ॥१९१॥

ततः प्रसन्ने देवेशे[७८] बुद्धिमत्त्वात्प्रवर्तते[७९] ।
अणिमादिगुणैश्वर्यं सर्वज्ञत्वञ्च योगिनः ॥१९२॥

समस्त सिपहरू र सबै कलाहरू त्यस योगीमा आहित हुन्छन् भने नागहरू र देवकन्याहरूले झुकेर प्रणाम गर्दछन् ।१८८।

---

७८ ग. प्रसन्ना देवेशि । घ. प्रसन्ने देवेश । ङ. प्रसन्नदेवेश ।

७९ क, ख, ग. बुद्धिः सत्वात् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

जसरी महासागरबाट उद्भिएका [illegible] थोपा बन्दछन् त्यसैगरी योगको ऐश्वर्यरूपी सागरमा प्रातिभ आदि उपसर्गहरू मात्र थोपाहरू हुन् ।१८९।

CC0. In Public Domain. Digitization by eGangotri

प्रातिभ आदि छ उपसर्गहरू क्षुद्र छन् र ती क्षुद्र गुणहरूमा आसक्ति भएकाहरूले सम्पूर्ण मनोरथ पूरा गर्ने र नष्ट नहुने ऐश्वर्यलाई प्राप्त गर्न सक्दछन् ।१९०।

त्यसरी देवता, दैत्य र राजाहरूका ती गुण र भोगहरूलाई जसले सिन्को सरह मानेर ती सबैलाई त्यागिदिन्छ भगवान् शिव त्यससँग अत्यन्त प्रसन्न हुन्छन् ।१९१।

बुद्धिमत्ताबाट भगवान् शिव प्रसन्न हुँदा योगीमा अणिमा आदि गुणहरूद्वारा ऐश्वर्य र सर्वज्ञता प्रवृत्त हुन्छ ।१९२।

सर्वज्ञश्च तनुं त्यक्त्वा शुद्धः शान्तः सदा सुखी ।
निर्द्वन्द्वः परिपूर्णश्च मुक्तः स्वात्मनि तिष्ठति ॥१९३॥

अनुग्रहाय चान्येषां यदि देहं न सन्त्यजेत् ।
अणिमादिगुणैश्वर्यैः सन्तिष्ठेच्छिववत्प्रभुः ॥१९४॥

दाता[८०] हर्ता च कर्ता च भोक्ता च प्रकृतेर्वशी ।
ज्ञानाञ्जनोपदेष्टा च कुज्ञानावृतचेतसाम् ॥१९५॥

इत्येवमिच्छया भोगान् भुक्त्वा ज्ञानं प्रकाश्य च ।
प्रलयान्ते तनुं त्यक्त्वा स्वात्मन्येवावतिष्ठते ॥१९६॥

यस्मात् सौख्यञ्च मोक्षञ्च योगादुभयमाप्नुयात् ।
तस्मात् सर्वं परित्यज्य जपेद् ध्यायेच्च शङ्करम्[८१] ॥१९७॥

सर्वज्ञ भएको योगी शरीरलाई छोडेर शुद्ध, शान्त, सुखी, द्वन्द्वविहीन, सबैतिरबाट पूर्ण र मुक्त भएर आफैमा विद्यमान रहन्छ ।१९३।

यदि अरूलाई कृपा गर्नका लागि शरीर त्याग्दैन भने पनि अणिमा आदि गुण तथा ऐश्वर्यहरूले युक्त योगी शिवतुल्य समर्थ भएर रहन्छ ।१९४।

दाता, हर्ता, कर्ता, भोक्ता, प्रकृतिलाई वशमा पार्ने र अज्ञानबाट आच्छन्न मानिसहरूलाई ज्ञानरूपी अञ्जनको उपदेश गर्ने योगी आफ्नो इच्छा अनुसार भोगहरूलाई भोगेर, ज्ञानहरूलाई प्रकाशित गरेर, प्रलयकालमा

---

८० ख. दाता ।

८१ ग. ध्यायेत्सदा शिवम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
शरीरलाई त्यागेर आफ्नै आत्मामा अवस्थित रहन्छ ।१९५-१९६।

जुन योगबाट सुख र मोक्ष दुबै प्राप्त हुन्छ, त्यसैले सबै कुरा त्यागेर त्यस योगका अधिष्ठाता शिवजीकै जप र ध्यान गर्नू ।१९७।

ये संश्रिता ज्ञानमयीं[८२] सुनावं ते यान्ति पारं भवसागरस्य ।
तिष्ठन्ति मग्ना भवसागरेऽस्मिन् पुत्रेषु दारेषु गृहेषु सक्ताः ॥१९८॥

ध्यानेन मोक्षम्परमञ्च सौख्यं विन्दन्ति सर्वे पुरुषाः स्त्रियश्च ।
अनेन देहेन लभन्ति केचित् सिद्धांश्च भोगान् प्रलये च मुक्तिम् ॥१९९॥

इदं परं पापहरं पवित्रं ज्ञानामृतं मृत्युविनाशनञ्च ।
विज्ञाय यः प्राणिहिताय दद्याज्जगद्गुरुस्तेन समः कुतोऽन्यः ॥२००॥

स एव वन्द्यः प्रतिपूजनीयः स एव माता जगतः पिता च ।
स एव बन्धुः स गुरुः शिवश्च ज्ञानामृतं यः परमं प्रदद्यात् ॥२०१॥

इति श्री शिवधर्मोत्तरे ज्ञानयोगो नाम दशमोऽध्यायः ।

जो ज्ञानको डुँगा चढ्दछन् तिनले भवसागर तर्दछन् । जो छोराछोरी, पत्नी तथा घरमा आसक्त भएर बस्दछन्, ती यस संसाररूपी समुद्रमै डुबिरहन्छन् ।१९८।

सबै स्त्री पुरुषहरूले ध्यानद्वारा सुख र मोक्ष दुबै प्राप्त गर्दछन्, केही सिद्धहरूले यसै शरीरबाट भोगहरू र प्रलयमा मोक्ष पाउँदछन् ।१९९।

परम पाप नाशक, अत्यधिक पवित्र र मृत्युको विनासक यस ज्ञानरूपी अमृतलाई जसले आफूले बुझेर प्राणीहरूको हितका लागि प्रदान गर्दछ त्यसभन्दा ठूलो जगद्गुरु अरू को हुन सक्दछ ?२००।

जसले परम ज्ञानरूपी अमृत प्रदान गर्दछ त्यो नै वन्दनीय पूजनीय हुन्छ, त्यो नै जगत्‌को आमाबुबा र बन्धु हो र त्यो नै गुरु तथा शिव पनि हो ।२०१।

शिवधर्मोत्तरमा ज्ञानयोग नामको दशौं अध्याय सकियो ।

---

८२ ग. ज्ञानमय ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ प्रायश्चित्तनिरूपणं नामैकादशोऽध्यायः

अथ पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ।
कृत्वा शौचं तथा स्नानं शिवाग्निगुरुपूजकः ॥१॥

उत्थाय पश्चिमे यामे सुगृहीतकमण्डलुः ।
धौतपादुकमाक्रम्य मैत्रं कुर्याद्यथाक्रमम् ॥२॥

दीक्षाविनीतश्चित्तज्ञ[1]स्तोयदानविधानवित् ।
सहायः शौचकार्येषु तदभावात्कमण्डलुः ॥३॥

वाचं नियम्य यत्नेन ष्ठीवनोत्कासवर्जितः ।
शिरः प्रावृत्य तत्कुर्यादन्तर्धाय[2] तृणैर्महीम् ॥४॥

अब शिवधर्मोत्तरमा प्रायश्चित्तनिरुपण नाम गरेको एघारौं अध्याय प्रारम्भ हुन्छ।

शिव, अग्नि तथा गुरुको पूजा गर्ने मानिसले पापबाट शुद्ध हुनका लागि शौचादि क्रिया र स्नान गरेर प्रायश्चित्त गर्नू ।१।

पछिल्लो प्रहरमा उठेर राम्रोसँग कमण्डलु समातेर धोएका खराउ लगाएर क्रमैसँग मलमूत्र त्याग गर्नू ।२।

शौचक्रिया गर्दा आफूद्वारा दीक्षित अत एव विनम्र आफ्नो मनको कुरालाई राम्रोसँग बुझ्ने पानी हाल्ने कुरामा निपुण कुनै शिष्य सहयोगी हुनुपर्दछ। त्यस किसिमको सहयोगी न भएमा कमण्डलुको प्रयोग गर्नु पर्दछ ।३।

दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्री ह्युदङ्मुखः ।
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥ ५॥

मार्जनं वामहस्तेन वीरणाद्यैरयाज्ञिकैः ।
विण्मूत्रमुत्क्षिपेत्तत्र छायायामात्मनो न च ॥६॥

नानिलानलदेवानां गोब्राह्मणजलम्प्रति ।
जन्तुशाद्वल[3]भस्मास्थिकृष्णच्छायां विवर्जयेत् ॥७॥

---

१ ग. विनीतचित्त ।
२ क. अन्तर्द्धार्य । ख. अन्ताद्धान ।
३ क, घ. शार्दूल ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

पादावसेचनं[४] मूत्रं पुरीषं ष्ठीवनञ्च यत् । CC-0. In Public Domain. Digitization by eGangotri
दूरादावसथात्सर्वं यच्चान्यद् विकृतम्भवेत् ॥८॥

मौन रहेर यत्नपूर्वक थुकाइ र खोकीबाट विहीन भएर शिरमा कपडा बेह्रेर घाँसले भुँइ छोपेर मलमूत्र त्याग गर्नू ।४।

दाहिने कानमा जनै राखेर दिउस, बिहान र साँझका सन्ध्याहरूमा उत्तरतिर फर्केर रातिमा दक्षिणतिर फर्केर मलमूत्र त्याग गर्नू ।५।

यज्ञमा प्रयोग नहुने उशीर आदि झारहरूद्वारा बायाँ हातले सफा गरेर आफ्नो छाया बाहेकका ठाउँहरूमा मलमूत्र फ्याँक्नू ।६।

हावा तथा अग्नि आदि देवताहरू, गाई, ब्राह्मण, जलतिर, प्राणीहरू, गौचरन आदि ठाउँ, खरानी, हाड र कालो छाया आदिमा मलमूत्र नफ्याँक्नू ।७।

खुट्टा धोएको पानी, मल, मूत्र, थुक र यस्तै अन्य विकार या मलहरू बस्तीभन्दा टाढा फ्याँक्नु पर्दछ ।८।

गृहीतशिश्नश्चोत्थाय समायुक्तकमण्डलुः ।
शौचं कुर्यान्मृदाम्भोभिर्गन्धलेपापनुत्तये ॥९॥

तिस्रो लिङ्गे मृदो योज्यास्त्वेकैकान्तरमृत्तिका ।
आमलीफलमात्रं तु पञ्च वामकरे तथा[५] ॥१०॥

मृदस्तिस्रः कराभ्यां तु मूत्रोत्सर्गे भवेच्छुचिः ।
पञ्चापाने[६] मृदो योज्या तास्त्रिरन्तरमृत्तिका[७] ॥११॥

दशवामकरे देयाः पाण्योः सप्त तथोभयोः ।
उपस्पर्शनकाले तु तिसृभिः क्षालयेत्करौं ॥१२॥

लिङ्ग समातेर, उठेर, कमण्डलुको समायोजनका साथ दुर्गन्धवस्तुहरूको लेपको सफाइका लागि माटो र पानीले धोएर शुद्ध तुल्यानू ।९।

लिङ्गमा तीनपटक माटो लगाउनू एक पछि अर्को पछि अर्को लगाउँदै जानू । बायाँ हातमा पाँच पटक अमलाको धूलाले सफा गर्नू ।१०।

---

४ ग. पादावसेवनम् ।
५ ग. यथा ।
६ क, घ. पञ्चमाने । ख. पञ्चपाणे ।
७ क. स्त्रिरन्तरमृत्तिकाः । ग. तन्निरन्तरमृत्तिकाः ।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

लघुशङ्का गएमा दुबैहातमा तीन पटक माटो लगाएर सफा गर्ने हो भने सफा हुन्छ। दीर्घशङ्का जाने हो भने अपानवायु जाने ठाऊँ अर्थात् गुदद्वारमा तीनको अन्तरमा पाँच पाँच पटक माटो लगाएर सफा गर्नू ।११।

बायाँ हातमा दश पटक र दुबै हातमा सात पटक सफा गर्नू र आचमन गरेपछि तीन पटक हात धुनु ।१२।

जङ्घाशौचे[८] मृदस्तिस्र एकैकान्तरमृत्तिका ।
अक्षिणी नासिका कर्णौ तिस्रः संशोध्य हस्तयोः ॥१३॥

कर्दमामेध्यमूत्राद्यैर्दिग्धेऽङ्गे[९] सप्तपञ्चधाः ।
क्षालिते वारिणा पूर्वं स तिस्रोऽन्तरमृत्तिकाः ॥१४॥

आमणिबन्धनात् पाणिं मृत्तोयेन विशोधयेत् ।
अन्तः कृत्वा भुजौ सम्यग् बहिर्ज्जानूर्विधाय च ॥१५॥

उद्धृतानुष्णफेनाभिः पूताभिर्वस्त्रचक्षुषा ।
हृद्गमाभिरशब्दाभिस्त्रिश्चतुर्वारमाचमेत्[१०] ॥१६॥

परिमृज्य द्विराचम्य द्वादशाङ्गानि चालभेत् ।
तूष्णीमेव ततो भूयः शिवमन्त्रेण पूर्ववत् ॥१७॥

जाँघको पवित्रताका लागि एक पटक माटो लगाई पखालेर फेरि माटो लगाउँने पखाल्ने यसरी तीन पटकसम्म धुनू। आँखा, नाक र कान तीनैलाई हातहरूले तीन पटक सफा गर्नू ।१३।

हिलो, अपवित्र, पिशाब आदि शरीरमा लाग्न गएमा पैंतीस पटक पानीले पखालेर तीन तीन पटकको अन्तरमा माटो लगाएर सफा गर्नू ।१४।

घुँडा बाहिर र बाहुहरूलाई भित्र पारेर मणिबन्धसम्म हातलाई माटो र पानीले धुनू। १५।

तातो वा फिज पनि नभएको नदी आदिबाट निकालिएको आँखाले राम्ररी हेरेर कपडाले छानेर सफा पारिएको पानीले हृदयसम्म जाने र शब्द नआउने गरी तीन चार पटक आचमन गर्नू ।१६

आचमेद् ब्रह्मतीर्थेन ब्रह्मसूत्री ह्युदङ्मुखः ।
तदन्तरान्तरे पाणिमाप्लाव्याप्लाव्य चाम्भसा ॥१८॥

वस्त्रशौचं प्रवक्ष्यामि तच्छुद्धौ शुद्ध्यते यतः ।
<u>वस्त्रशौचविहीनात्मा</u> शुचिरप्यशुचिर्भवेत् ॥ १९॥

८ ग. शौच।
९ ग. मदङ्गे।
१० ग, घ. आचरेत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवकार्याय योग्यानां प्रत्यहं शौचमिष्यते ।
वाससामितरेषाञ्च शौचं कुर्यान्मलागमे ॥२०॥

शुचिना तोरणङ्कार्यं वंश[११]दण्डत्रयेण तु ।
तत्र वासांसि निर्णिज्य[१२] सम्यग्बद्धानि शोषयेत् ॥२१॥

चारैतिर मार्जन गरेर दुई पटक आचमन गर्नू र पहिले बताइएको शिवमन्त्रले बाह्र अङ्गहरूको मौन रहेर स्पर्श गर्नू ।१७।

यज्ञोपवित धारी उत्तरतिर फर्केको अभ्यासकर्ताले बीच बीचमा पानीले हात भिजाउँदै भिजाउँदै ब्रह्मतीर्थद्वारा आचमन गर्नू ।१८।

अब म लुगाहरू पवित्र तुल्याउने तरिका बताउँने छु किनभने लुगा शुद्ध भएमा नै मानिस शुद्ध हुने छ। यदि लुगा चोखा छैनन् भने चोखो मानिस पनि अपवित्र हुन्छ ।१९।

देवताको पूजा आदिका लागि प्रयोग गरिने लुगाहरूलाई प्रत्येक दिन धोएर पवित्र बनाउनु पर्दछ। अन्य सामान्य अवस्थामा पहिरने लुगाहरू पनि मैला भए भने धुनु पर्दछ ।२०।

सफा तीन वटा बाँसका लठ्ठीहरूले लुगा सुकाउने तोरण बनाउनू र त्यसमा लुगाहरू सफा गरेर नखस्ने गरी सुकाउनू ।२१।

खगैर्वाऽदूषिते वृक्षे निर्मले वा शिलातले ।
दूर्वाजाले शुचौ वापि क्षालितेषु तृणेषु वा ॥२२॥

विण्मूत्रशुक्रदिग्धानां मृत्तोयेन विशोधनम् ।
कार्यमादौ ततः क्षारैर्गोमूत्राद्यैश्च शोधनम् ॥२३॥

मृद्वारि तावदादेयं गन्धलेपौ हि तद्गतौ ।
तस्मात्तान् दूरतो यावत्सर्वासु द्रव्यशुद्धिषु ॥२४॥

कौशेयाविकयोरुष्णैः क्षौमाणां गौरसर्षपैः ।
श्रीफलैरंशुपट्टानां कुतपानामरिष्टकैः ॥२५॥

चैलवद्रज्जुवेत्राणां पक्षचामरचर्मणाम् ।
वल्कलानाञ्च सर्वेषां शुद्धिः कार्या विजानता ॥२६॥

११ क. स्वंश । ग. स्वाङ्ग ।
१२ क. निर्निक्ष्य । ख. निकृत्य । ङ. निर्मिद्य ।

Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चराहरूले विष्ठा नगरेको रूखमा, सफा ढुङ्गामा, पवित्र दुवो भएको ठाउँमा अथवा पानीले पखालिएको घास उम्रेको ठाउँमा लुगा धोएर सुकाउँनू।२२।

दिशा, पिशाब तथा वीर्य आदिले लतपतिएका लुगाहरूलाई पहिले माटो र पानीले सफा गर्नु पर्दछ र पछि भस्म गहुँत आदिले शुद्ध तुल्याउँनु पर्दछ।२३।

त्यसमा रहेका दुर्गन्ध वा टाँसिएका चिजहरू जबसम्म हट्तैनन् तबसम्म माटो र पानीले धोइरहनु पर्दछ। सम्पूर्ण द्रव्यहरूकै शुद्धिमा यो प्रक्रियालाई अपनाउँनु पर्दछ।२४।

रेशमी र उनी कपडाहरूको घामले, कडाइ गरेका कपडाहरूको सेतो सर्स्यूँले, रेशमी पछ्यौराहरूको अमलाहरूले र पाटका लुगाहरूलाई रिठाले सफा गरेर शुद्ध बनाउनु पर्दछ।२५।

विदलालाबुपात्राणां[१३] वस्त्रवच्छुद्धिरिष्यते।
गोवालैर्घर्षणञ्चैषां[१४] विशेषः परिकीर्तितः॥२७॥

कांस्यायस्ताम्ररौप्याणां त्रपुसीसकयोरपि।
शुद्धिः शौचार्थिना कार्या भस्मक्षाराम्लवारिभिः॥२८॥

निर्लेपं काञ्चनं रौप्यमद्भिः पात्रं विशुद्ध्यति।
मण्यश्मशंखशुक्तीनां शौचं तैजसवत्स्मृतम्॥२९॥

रजःस्वलासूतिकाद्यैर्मूत्राद्यैश्चापि दूषितम्।
अग्नेरपाञ्च संयोगात्तैजसं शुद्धिमाप्नुयात्॥३०॥

विज्ञ मानिसले लुगाहरू झैं डोरीहरू, वेतबाट बनेका सामग्रीहरू, प्वाँखहरू, चामरहरू, छालाहरूबाट बनेका सामग्रीहरू र सबैखाले रूखका बोक्राबाट बनेका लुगाहरूको समेत शुद्धि गर्नु पर्दछ।२६।

चोयाले बनेका डोका, डाला आदि र लौका आदिबाट बनेका तुम्बा आदि पात्रहरूको शुद्धता पनि कपडाहरूको शुद्धता झैं गर्न सकिन्छ। गाई वा गोरुका केश वा रौंहरूले घोटेर पनि चोयाका पात्र तथा तुम्बा आदिका पात्रहरूलाई शुद्ध पार्न सकिन्छ। २७।

भाँडाहरू शुद्ध पार्न चाहने मानिसहरूले काँस वा फलाम, तामो, चाँदी, राङ्‌ तथा सीसाका भाँडाहरूलाई खरानी, नुनिलो र अमिलो पानीले सफा गर्नु पर्दछ।२८।

लेप नलगाईएका सुनका तथा चाँदीका भाँडाहरू पानीले शुद्ध गर्न सकिन्छ। मणि, पत्थर, शङ्ख तथा सिपीहरूको शुद्धि सुन चाँदीका भाँडाहरू झैं पानीबाट हुन्छ।२९।

१३ क. विदलालाबुधात्राणाम्। ग. विदलालांबुपात्राणाम्।
१४ ग. गोपालैर्वर्षणम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

शूद्रोच्छिष्टस्य पात्रस्य त्रिःकृत्वा परिमार्जनम् । CC-0. In Public Domain. Digitization by eGangotri
शौचं वै पूतकामेन कर्तव्यं तैजसस्य तु ॥३१॥

द्रव्याणामिह सर्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
पलालतृणकाष्ठानां प्लवनाच्छुद्धिरिष्यते ॥३२॥

स्रुवादिचरुपात्राणां मुसलोलूखलस्य च ।
शूर्पगोरसभाण्डानां शुद्धिरुष्णेन वारिणा ॥३३॥

शृङ्गास्थिदारुदन्तानां तक्षणैः परिशोधनम् ॥
अत्यन्तोपहतानान्तु गोमूत्रेणोदकेन तु ॥३४॥

रजस्वला तथा प्रसूति आदिद्वारा र मूत्र आदिद्वारा दूषित भएका धातुका भाँडाहरूलाई अग्नि र पानीको संयोगबाट शुद्ध गर्नु पर्दछ ।३०।

शुद्रले जुठो पारेका धातुका भाँडाहरूलाई शुद्ध गर्न चाहने मानिसले तीन पटक सफा गरेमा चोखिन्छन् ।३१।

पराल, घाँस र काठहरू पानीमा डुब्ने हो भने शुद्ध हुन्छन् किनभने सबै द्रव्यहरूको शुद्धि पानीमा डुब्नाले हुन्छ ।३२।

स्रुवा आदि होममा प्रयोग हुने होमका भाँडाहरूको मुशल, ओखल, सुपो र ठेकी, गाबु आदि गोरसका भाँडाहरूको तातो पानीले शुद्धि हुन सक्दछ ।३३।

सिङ, हाड, काठ र दाँतहरूबाट बनेका पात्रहरूलाई ताछेर वा खुर्केर चोख्याउनु पर्दछ भने ती पात्रहरू अत्यन्त पातला छन् भने गउँत र पानीले धोएर चोख्याउँनु पर्दछ ।३४।

संहतानाञ्च द्रव्याणां प्रोक्षणाच्छुद्धिरिष्यते ।
असंहतद्रव्यशौचं कार्यं प्रत्यात्मिकं सदा ॥३५॥

वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ।
तावन्मात्रं समुद्धृत्य शेषः प्रोक्षणमर्हीति ॥३६॥

अम्भसाल्पीयसा कार्यं मृदा चैव विशोधनम् ।
शाकमूलफलाद्यानां धान्यवच्छुद्धिरिष्यते ॥३७॥

गोकीटमक्षिकाद्यैर्वा कृमिसंस्पर्शनेषु च ।
छागोपजिघ्रणाच्छुद्धिरन्यस्यादि्भश्च प्रोक्षणात् ॥३८॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

खरोष्ट्रश्वश्रृगालाद्यैर्बिड्वराहावलेहने[१५] ।
तन्मात्रमन्नमुद्धृत्य[१६] शेषं संस्कारमर्हति ॥३९॥

परस्पर टाँसिएका पदार्थहरू पुछेर मात्र चोखिन्छन् भने अलग अलग भएर रहेका द्रव्यहरूलाई प्रत्येकलाई छुट्टाछुट्टै सफा गर्नु पर्दछ।३५।

लुगा तथा धानका राशहरूमा कुनै एक अंशमा फोहोर हुन्छ भने त्यत्तिमात्रलाई निकालेर बाँकीमा पानी छर्किदिँदा चोखो हुन्छ।३६।

यसरी लुगा र धानका राशहरू चोख्याउँदा थोरै पानी र माटाले शुद्ध गर्नु पर्दछ। साग, कन्दमूल तथा फलादिहरूको शुद्धि पनि धान्य आदिको शुद्धि झैं गर्नु पर्दछ।३७।

गाई, कीरा, माखाहरू र अन्य कमिला आदिले छुँदा वा बाख्राले मुख हाल्दा पानी छर्केर चोख्याउनु पर्दछ।३८।

दीप्तोल्मुकेन संस्पृश्य त्रिस्थगोघ्रातमेव च[१७] ।
सुवर्णतोयसंस्पृष्टं शुद्धमेव न संशयः ॥४०॥

मक्षिकाकेशसम्मिश्रं पटान्तोपहतञ्च[१८] यत् ।
रजःपिपीलिकायुक्तं भुञ्जानोऽन्नमवक्षुतम्[१९] ॥४१॥

तावन्मात्रं समुद्धृत्य प्रोक्षयेदम्भसा ततः ।
आज्याभिघातनाच्छुद्धि[२०]र्भस्मक्षेपेण वा भवेत् ॥४२॥

भूमिस्थमुदकं शुद्धं वितृष्णा यत्र गौर्भवेत् ।
अव्याप्तं यदमेध्येन[२१] गन्धवर्णरसान्वितम् ॥४३॥

गधा, उँट, कुकुर, स्याल आदि र सुँगुरले धेरै मात्रामा राखिएको अन्नको राशलाई मुख हालेमा वा जुठ्याएमा त्यत्तिमात्र निकालेर फाल्नु र अरूलाई सफा गर्नू।३९।

---

१५ ग अवलेपने।
१६ ग तावनमात्रं समुद्धृत्य।
१७ ग. त्रिसप्तधौतमेव च।
१८ ग. पदान्तोपहतश्च।
१९ क. अवक्ष्यताम्। ग अवक्ष्यति।
२० क, ख, घ. आज्याभिधारणाच्छुद्धि । ग. आज्ञाभिधारणाच्छुद्धि।
२१ ग. आव्यातपदमध्येन।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

बलेको अगुल्टाले छोएर वा तीनपटक गाईलाई सुँघाएर अथवा सुनपानी छर्केर वस्तुहरू शुद्ध हुन्छन् यसमा कुनै संशय छैन ।४०।

CC-0. In Public Domain. Digitization by eGangotri

माखो वा कपालका रौं मिसिएको, लुगाको छेउँ डुबेको, धूलो वा कमिलाले युक्त भएको र खाँदाखेरि आछ्यूँ आएको अनाजलाई त्यतिमात्रै झिकेर फाल्नु र त्यसपछि बचेकोलाई पानीले सेचन गर्नू र घ्यू हाल्नू वा खरानी छर्कर्नू ।४१-४२।

अपवित्र नभएको तथा सुगन्ध आउने स्वच्छ वर्ण र मिठासले युक्त जमिनमा रहेको पानी जसलाई पिउँदा गाई मजासँग अघाउन सक्दछ । कम्तिमा त्यतिमात्रामा भएको पानी शुद्ध मानिन्छ ।४३।

न मुखाद्विप्रुषोच्छिष्टं कुर्युरङ्गं न चोद्गताः[२२] ।
न श्मश्रूणि गतानास्यं[२३] न दन्तान्तरसंस्थिताः ॥४४॥

पादौ स्पृशन्ति ये वापि पराचमनबिन्दवः ।
ते पार्थिवसमा ज्ञेया न तैरप्रयतो भवेत् ॥४५॥

पीत्वा भुक्त्वा च सुप्त्वा च सम्प्रभाष्याधमैः सह ।
ष्ठीवित्वाध्ययनादौ च शुचि[२४]रप्याचमेत् पुनः ॥४६॥

द्रव्यहस्तसमुच्छिष्टस्तन्निधायाद्भिराचमेत्[२५] ।
द्रव्यशुद्धिश्च पूर्वोक्ता कार्या द्रव्यानुरूपतः ॥४७॥

मुखबाट निस्केका छिटाहरू जुठो हुँदैन । मुखबाट निस्केका थुकका छिटाहरूले शरीरका कुनै अवयवलाई पनि जुठो बनाउँदैनन् । ती थोपाहरूबाट जुँगा दाह्रीहरू पनि जुठा मानिदैनन् भने दाँतहरूको बीचमा रहेको जुठोले मुखलाई जुठो बनाउँदैन ।४४।

अरूले आचमन गर्दा झरेका पानीका थोपाहरू खुट्टामा पर्दछन् भने ती माटाका डल्ला सरह पवित्र हुन्छन् । तिनीहरूबाट मानिस अपवित्र हुँदैन ।४५।

पानी आदि पिएर, कुनै खाद्यवस्तु खाएर, सुतेर, अधमहरूसँग कुराकानि गरेर वा थुकेर तथा अध्ययनको आरम्भमा पवित्रै भए पनि फेरि आचमन गर्नुपर्दछ ।४६।

कुनै वस्तु हातमा लिएको बेलामा अपवित्र भयो भने त्यसलाई विसाइसकेपछि पानीले आचमन गर्नू र त्यो द्रव्य पनि अपवित्र भएको छ भने कुन द्रव्य हो पहिले द्रव्य शुद्धिमा बताइएको नियमानुसार त्यसलाई चोख्याउनू ।४७।

---

२२ ग. मुखोद्विप्रूषोच्छिष्टं कुर्यारङ्गन्न वेङ्गताः । क, ख, घ. मुखाद्विप्रूषोच्छिष्टं कुर्यूरङ्गन्न चेद्गताः ।

२३ क, ग, घ, ङ. गतान्नास्यम् ।

२४ क, ग, घ. शुद्धि ।

२५ ग. निध्यायाङ्गिराचमेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गोशकृन्मूत्रवल्मीकमृत्तिकाभस्मवारिभिः[२६] ।
वेश्मायतनलिङ्गानां कार्यमेतद्विशोधनम् ॥४८॥

मार्जनोल्लेखनैः सेकैर्गोनिसेकैर्जलेन च[२७] ।
इति पञ्चविधाशुद्धिर्भूमौ कार्या विजानता ॥४९॥

ग्रामाद्धस्तशतङ्गत्वा नगराच्च चतुर्गुणम् ।
मही[२८] सर्वत्रमेध्यास्यान्निर्लेपा यत्र दृश्यते ॥५०॥

शुचिराकरजन्द्रव्यं कारुहस्तः शुचिः सदा ।
प्रसवे च शुचिर्वत्सः शकुनिः फलपातने ॥५१॥

गोवर, गहुँत, धमिराको गोलाको माटो, खरानी र पानीले घर, यज्ञशाला र प्रतिमा आदिको शुद्धि गर्नू ।४८।

विज्ञले कहाँ के ठीक हुन्छ राम्रोसँग जानेर, बढारेर, खुर्केर, पानी छर्केर, गहुँत छर्केर वा पानीले पखालेर पाँच किसिमले भुइँलाई शुद्ध पार्नु पर्दछ ।४९।

गाउँबाट सयहात र शहरबाट त्यसको चारगुणा अर्थात् चारसय हात पर गएर जहाँ भुइँ निर्लिप्त देखिन्छ त्यो ठाउँ पवित्र हुन्छ ।५०।

खनिजद्रव्यहरू शुद्धि विना पनि पवित्र हुन्छन्, मिस्त्रीको हात सधैं चोखो हुन्छ, प्रसूतिकै समयमा पनि बाच्छो पवित्र हुन्छ भने चराले झारेको फल पनि अपपवित्र हुँदैन ।५१।

विप्रागौर्मक्षिकाश्चाजा[२९]च्छायाग्निसूर्यरश्मयः ।
रजोभूर्वायुरापश्च मेध्यानि स्पर्शने[३०] सदा ॥५२॥

नगरं ग्रामरथ्यां वा परिभ्रम्य गृहाद्वहिः ।
पादौ प्रक्षाल्य मृत्तोयैर्गृहान्तः प्रविशेत्ततः ॥५३॥

शिरस्नानं प्रकुर्वीत स्रवन्तीषु विशेषतः ।
मृद्गोमयैः समुद्घृष्य त्रिः शरीरं समन्ततः ॥५४॥[३१]

---

२६ क, ग, घ. वारिणा ।
२७ घ. वा ।
२८ ग. गृही ।
२९ ग. विप्रगोमक्षिकाश्चाज ।
३० ग. स्पर्शनम् ।
३१ घ. पङ्क्तिरियं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्नानवस्त्रं समुत्सृज्य द्वितीयं परिधाय च ।
तेन स्नात्वा कषायाद्यैर्वस्त्रमन्यत्समाददेत् ।।५५।।

ब्राह्मणहरू, गाई, माखा, बाख्राहरू, छाया, आगो, सूर्यका किरणहरू, धूलो, भुइँ, हावा र पानी यिनीहङ्को स्पर्शले कुनै पनि वस्तु अपवित्र हुँदैन ।५२।

घरभन्दा बाहिर शहर अथवा गाउँको बाटोमा घुमेर फर्के पछि माटो र पानीले खुट्टा धोएर घरभित्र पस्नू ।५३।

नुहाउँदा विशेष गरेर बगिरहेका नदीहरूमा शिर धोएर स्नान गर्नू र शरीरलाई चारैतिरबाट माटो र गोबरले तीन पटक घोटेर नुहाउनू ।५४।

पहिले स्नान गरेको वस्त्रलाई हटाएर अर्को वस्त्र धारण गर्नू र कषाय अर्थात् टर्रो आदि पदार्थद्वारा पुनः स्नान गरी पुनः अर्को वस्त्र धारण गर्नू ।५५।

सोपवीतः[३२] समाचम्य पानीयमभिमन्त्रयेत् ।
एकविंशतिवारांश्च शिवमन्त्रेण भावितः ।।५६।।

ध्यायमानः शिवं शान्तं शनैः स्नानं समाचरेत् ।
आचम्य चात्मनः कुर्यादभिषेकं ततः पुनः ।।५७।।

कुम्भेन पर्णपुटकैः करद्वयपुटेन वा ।
जपन्नेकादशात्मानं स्थापयेद्येन वा पुनः ।।५८।।

विघ्ना[३३]लक्ष्मीविशुद्ध्यर्थमभिषिञ्चन् समन्ततः ।
आरभ्य[३४] प्रोक्षयेद् भूयस्तावदेवात्मना शिरः[३५] ।।५९।।

यज्ञोपवीतले युक्त भई आचमन गरेर शिवमन्त्रको एक्काइस पटक जप गरी पानीलाई अभिमन्त्रित गर्नू ।५६।

शान्त शिवजीको ध्यान गर्दै हतार नगरेर स्नान गर्नू र आचमन गरेर पुनः आफूमा जलको सेचन गर्नू ।५७।

कलशबाट, पातको दुनाबाट वा अञ्जलिबाट आफ्नो अभिषेक गर्दै एघार पटक शिवमन्त्रको जप गरी पुनः आफूलाई स्थिर गर्नू ।५८।

विघ्न र दरिद्रताको शमनका लागि चारैतिरबाट सेचन गर्दै आफैले शिरदेखि सबैतिर पटक पटक जल छर्नू ।५९।

---

३२ ग. सोपनीयः ।
३३ ग. विद्या ।
३४ घ. आचम्य ।
३५ ग. तावदेवा च ना शिर ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गृहे च परिजप्तेन स्नानं कुम्भेन कारयेत् ।
एवं भवति[३६] सुस्नातः सर्वपापविवर्जितः ॥६०॥

सर्वतीर्थाभिषेकस्य श्रद्धधानः फलं लभेत् ।
सन्ध्यात्रयपरिभ्रष्टः शिवैकादशिकात्रयम् ॥६१॥

जप्त्वा शुद्धिमवाप्नोति स्नानहीनश्च तज्जपेत् ।
पर्वण्यपूज्य देवेशं गुरुमग्निञ्च भक्तितः ॥६२॥

अदत्वा च बलिन्तत्र शिवस्याष्टशतञ्जपेत् ।
पत्रं पुष्पं फलं मूलमन्नपानाद्यमौषधम् ॥ ६३॥

अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम् ।
अनिवेद्य प्रभुञ्जानः प्रायश्चित्ती भवेन्नरः ॥६४॥

घरमा स्नान गर्न परेमा अभिमन्त्रित पानीको घडाबाट स्नान गर्नू । यसरी राम्रोसँग स्नान गरेको मानिस सम्पूर्ण पापहरूबाट मुक्त हुन्छ ।६०।

श्रद्धापूर्वक स्नान गर्नाले सम्पूर्ण तीर्थहरूको स्नानको फल प्राप्त हुन्छ र प्रातः, मध्याह्न र साँझको सन्ध्याकर्मबाट विमुख भएमा शिवमन्त्रलाई एघार एघार गरी तीन पटक जपेमा शुद्ध हुन्छ भने स्नान गर्न नसकेमा पनि शिवमन्त्रको एघार पटक जप गर्नुपर्दछ । औंसी, पूर्णिमा र प्रतिपदा आदिको सन्धि आदिमा भगवान् शिवको पूजा र गुरु तथा अग्निको भक्तिपूर्वक पूजा गर्न नसकेमा शिवमन्त्रको आठ सय पटक जप गर्नू । पत्र, पुष्प, फल, अन्न, पेयपदार्थ आदि ओखतीमूलो अन्य जेसुकै खाद्यपदार्थ खानका लागि तयार गरिएका छन् ती सबै भगवान् शिवलाई न चढाएर नखानू । यदि कसैले शिवलाई नचढाएर खान्छ भने त्यस मानिसले प्रायश्चित्त गर्नु पर्दछ ।६१-६४।

शिवाष्टशतजप्तेन पूजया च विशुद्ध्यति ।
अनस्थिप्राणिसङ्घातं हत्वैकादशिकाञ्जपेत् ॥६५॥

हत्वा च पक्षिणः सर्वांस्त्रिरेकादशिकाम्पुनः[३७] ।
सर्पमार्जारनकुलं श्वानमुष्ट्रं खरं हयम् ॥६६॥

गजाद्यांश्च मृगान् सर्वान् हत्वा वाष्टशतञ्जपेत् ।
जपेदष्टसहस्रन्तु क्षत्रविड्गोवधे पुनः ॥६७॥

---

३६ ग. भावेन ।
३७ ख. जपेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिवाग्निगुरुपूजा च योगिन्द्रद्विजभोजनम् ।
हत्वा शूद्रं स्त्रियं बालं शिवं पञ्चशतं जपेत् ॥६८॥[३८]

जपेदष्टसहस्रञ्च सच्छूद्रस्य[३९] प्रमारणे ।
सद्वृत्तः शिवभक्तश्च नाद्यात् मृतकसूतके ॥६९॥

शिवलाई अर्पण नगरेर भोजन गरेमा आठसय शिवमन्त्रको जपका साथ पूजा गरेमा शुद्ध हुन्छ भने हाड नभएका प्राणीहरूको हत्या हुन गएमा एघार पटक शिवमन्त्रको जप गर्नुपर्दछ ।६५।

पक्षीहरूको हत्या गरेमा एघार एघार पटक शिवमन्त्रको जप गर्नू । सर्प, बिरालो, न्याउरी मुसो, कुकुर, ऊँट, गधा, घोडा, हात्ती वा मृग आदि कुनै पनि प्राणीको हत्या हुन गएमा आठ सय शिवमन्त्रको जप गर्नू र यदि क्षत्रिय, वैश्य वा गाईको वध हुन गएमा आठ हजार शिवमन्त्रको जप गर्नू ।६६-६७।

शूद्र, स्त्री तथा बालकको हत्या हुन गएमा पाँच सय शिवमन्त्रको जपका साथै शिव, अग्नि तथा गुरुको पूजा र योगिन्द्र तथा ब्राह्मणहरूलाई भोजन गराउनू ।६८।

संस्कारेषु च सर्वेषु गृहेषु किमुतान्यतः ।
सूतके न तु भोक्तव्यन्नैत्यकञ्च विवर्जयेत् ॥७०॥

भुक्त्वा प्रमादतः स्नेहाच्छिवस्याष्टशतञ्जपेत् ।
श्वविड्वराहचण्डालैर्दुर्जनैः कपिकुक्कुटैः ॥७१॥

उलूकगृध्रकाकाद्यैः स्पृष्टमन्नन्न भक्षयेत् ।[४०]
शिवैकादशजप्तेन गव्येन[४१] हविषा बुधः ॥७२॥

पीतेन शुद्ध्यते क्षिप्रमभोज्याहारदूषितः ।
तीर्थयात्राविशुद्धात्मा सद्वृत्तः शिवभावितः ॥७३॥

पुत्रैरपि न भुञ्जीत सार्द्धं क्रूरैरधार्मिकैः ।
महापातकशुद्ध्यर्थं सहस्राणि जपेद्दश ॥७४॥

---

३८ ङ. ६७ पद्यस्योत्तरार्द्धं ६८ पद्यञ्च नास्ति ।
३९ ग. स शूद्रस्य । घ. सर्वत्रस्य ।
४० घ. ७० पद्यस्योत्तरार्द्धं ७१ पद्यञ्च नास्ति ।
४१ घ. हव्येन ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

किन्तु सज्जन प्रकृतिको शूद्रलाई मारेमा आठहजार जप गर्नू । कहिल्यै पनि मृतकको आशौच र सूतकको आशौच भएका घरमा सच्चरित्र शिवभक्तले नखानू। ६९।

सबै संस्कारहरूमा, सबै घरहरूमा, सूतकमा, भोजन गर्नु हुँदैन भने नित्यकर्महरू पनि सूतक नसकिंदा सम्म गर्नु हुँदैन ।७०।

प्रमादवश वा अत्यधिक स्नेहका कारणले सूतक लागेको घरमा खाना खाएमा आठ सय शिवमन्त्रको जप गर्नू। कुकुर, सुँगुर, चण्डाल, दुर्जन, बाँदर, कुखुरो, लाटोकोसेरो, गिद्ध र कौवा आदिले छोएको अन्न न खानू। यस्तै खान नहुने आहारबाट दूषित भएमा बुद्धिमान् पुरुषले गव्य र हविष्य पान गर्नुका साथै एघार पटक शिवमन्त्रको जप गर्नाले शुद्ध हुन्छ र तीर्थयात्राद्वारा अन्तःकरण शुद्ध भएको सच्चरित्र र शिवभावनाले युक्त हुनु पनि आवश्यक छ ।७१-७३।

प्राणायामैस्त्रिसंन्ध्यञ्च शिवमग्निञ्च पूजयेत् ।
रेतोमूत्रपुरीषाणि प्राश्य पीत्वा च वारुणीम् ॥७५॥

भुक्त्वा चान्नमभोज्यानां गत्वा चाप्यन्त्यजां स्त्रियम् ।
जप्त्वा शिवायुतं सम्यक् पूर्वोक्तविधिना बुधः ॥७६॥

पञ्चगव्यं सकृत् पीत्वा सर्वपापैः प्रमुच्यते ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिरनुक्रमात् ॥७७॥

जपेत् त्रिः पञ्चब्रह्मेण ॐकारेण कुशोदकम् ।
पलाशपद्मिनीपत्रे ताम्रपात्रेऽथवा स्थितम् ॥७८॥

क्रूर र धर्मविहीन पुत्रहरूका साथमा पनि भोजन गर्नु हुदैन । यस किसिमका महापातकबाट शुद्ध हुनका लागि दश हजार शिवमन्त्रको जप गर्नु पर्दछ ।७४।

कथञ्चित् वीर्य, मूत्र तथा मलको प्राशन हुन गएमा वा मदिरा पिएमा प्रातः, मध्याह्न र साँझ तीन वटै सन्ध्यामा प्राणायामका साथ शिव तथा अग्निको पूजा गर्नू ।७५।

भोजनका लागि निषिद्ध मानिसहरूको अन्न खाएमा वा शूद्र स्त्रीसँग सहवास गरेमा बुद्धिमान् पुरुषले पहिले वताएको विधि अनुसार दश हजार शिवमन्त्रको जप गरेर पञ्चगव्यको पान गरेर सबै पापबाट मुक्त हुन्छ।

गाईको गहुँत, गोबर, दूध, दही र घ्यू प्रत्येकलाई क्रमैसँग पाँच पाँच ॐकारहरूले तीन तीन पटक जपद्वारा अभिमन्त्रण गर्नू र ॐकारद्वारा नै पलाश अथवा कमलका पातको दुनामा अथवा तामाको भाँडामा राखेको कुशयुक्त पानीलाई समेत एकै पात्रमा राखी फेरि आठ सय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कृत्वैकस्थं शिवेनैव जपेदष्टशतं पुमः ।
अहोरात्रोषितः स्नातः शिवस्य पुरतः स्थितः ॥७९॥

ॐकाराद्येन मन्त्रेण प्राङ्मुखस्तच्छनैः पिबेत् ।
पीतमात्रो भवेत्पूतः सम्पूर्णः शशिनिर्मलः ॥८०॥

ब्रह्महत्यादिकैः पापैः सर्वैरेवाशु मुच्यते ।
मातापितृसमुद्भूतं सहजागन्तुकञ्च यत् ॥८१॥

अस्थिमज्जागतं पापं ब्रह्मकूर्चः क्षणाद्दहेत् ।
अष्टम्यां ब्रह्मकूर्चेन स्नापयित्वा सकृच्छिवम् ॥८२॥

पीत्वा च पातकैर्मुक्तः शिवलोके महीयते ।
तस्मात् प्रतिचतुर्मासं ब्रह्मकूर्चं पिबेद् बुधः ॥८३॥

सर्वपापविशुद्ध्यर्थं सर्वपातकनाशनम् ।
प्रायश्चित्तं शिवप्रोक्तं न देयं यस्य कस्यचित् ॥८४॥

शिवमन्त्रको जप गर्नू । दिनरात व्रत पूर्वक जागा रही प्रातः स्नान वरी शिवमूर्तिका अगाडि बसेर ॐकारले युक्त शिवमन्त्र पाठ गरी तयार गरिएको ब्रह्मकूर्चलाई पूर्वतिर फर्केर सुस्तरी अभिमन्त्रित ब्रह्मकूर्चरूप पञ्चगव्यको पान गर्नू । त्यसको पानबाट मात्र मानिस पवित्र पूर्ण र चन्द्रमा झैं स्वच्छ तथा कान्तिले युक्त हुन्छ ।७६-८०।

उक्त विधिपूर्वक पञ्चगव्यको पानद्वारा तत्काल ब्रह्महत्यादि पापहरूबाट मुक्त हुन्छ । आमा बुबाबाट उत्पन्न, सहज, आगन्तुक र हाड मासीमा रहेका जे जति पापहरू छन् सबैलाई ब्रह्मकूर्चले एकछिनमा जलाई दिन्छ । अष्टमीका दिन ब्रह्मकूर्चद्वारा एक पटक शिवलाई स्नान गराएर त्यसको पान गर्दा सम्पूर्ण पापहरूबाट मुक्त भई शिवलोकमा प्रतिष्ठित हुन्छ । त्यसैले विद्वान् मानिसले प्रत्येक चार महिनामा ब्रह्मकूर्च पिउनु पर्दछ ।८१-८३।

एतद्रहस्यं परमं प्रायश्चित्तं स्वयं बुधः ।[४२]
कुर्यात् प्रच्छन्न[४३]पापेषु प्रकाशे प्रार्थयेद् गुरुम् ॥८५॥

शिवज्ञानमिदं[४४] शान्तं महापातकनाशनम् ।
प्रणिपत्य गुरुं पश्चात् प्रार्थयेच्छुद्धिमात्मनः ॥८६॥

---

४२ घ. ८४ पद्यं ८५ पद्यस्य पूर्वार्द्धं च नास्ति ।
४३ ख. प्रसन्न ।
४४ ग. शिवज्ञानविदम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इति श्री शिवधर्मोत्तरे प्रायश्चित्तनिरूपणं नामैकादशोऽध्यायः ।

सम्पूर्ण पापको विशुद्धिका निमित्त सम्पूर्ण पापहरूलाई नाश गर्न सक्षम ब्रह्मकूर्च नामक प्रायश्चित्तको उपदेश भगवान् शिवले गरेका हुन् । अत एव यसको विधान जुन सुकै व्यक्तिका लागि गर्नु हुँदैन । ८४।

यो रहस्यपूर्ण प्रायश्चित्तको विधानलाई विद्वान् मानिसले थाहा नपाइएका अथवा गोपनीय पापहरूका लागि स्वयं गर्नू र प्रकाशमा आएका पापहरूको प्रशमनका लागि ब्रह्मकूर्च हेतु गुरुसँग प्रार्थना गर्नू ।८५।

यस शान्त तथा महापापहरूलाई नाश गर्न सक्षम शिवज्ञानलाई प्राप्त गर्न गुरुलाई प्रणाम गरिसकेपछि आफ्नो शुद्धिका लागि प्रार्थना गर्नू ।८६।

शिवधर्मोत्तरमा प्रायश्चित्तनामक एघारौं अध्याय सकियो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ गोलोकमाहात्म्यं नाम द्वादशोऽध्यायः

श्रुत्वैतत्परमं गुह्यं गवान्देहसमुद्भवम् ।
ब्रह्मकूर्चस्य माहात्म्यमगस्तिः पुनरब्रवीत् ॥१॥

भगवन् ! श्रोतुमिच्छामि गोलोकः कीदृशः पुनः ।
प्राप्यते कर्मणा केन कियत्यध्वनि संस्थितः ॥२॥

स्कन्द उवाच

श्रूयतामभिधास्यामि नमस्कृत्य महेश्वरम् ।
गोमातृलोकं परमं सर्वकामसमन्वितम् ॥३॥

अधस्तात्सर्वलोकानां नरकाः क्रमशः स्थिताः ।
पातालानि ततः सप्त पातालपतयस्तथा ॥४॥

यावत्प्रमाणं स्वादूदं परिच्छिन्नं महीतले ।
तावत्प्रमाणान्येवाधः कूपाकाराणि तानि तु ॥५॥

अब शिवधर्मोत्तरमा गोलोक नाम गरेको बाह्रौं अध्याय प्रारम्भ हुन्छ ।

अत्यन्त गोपनीय गाईका शरीरबाट उत्पन्न भएको ब्रह्मकूर्च (विशेष विधिबाट तयार पारिएको पञ्चगव्य) को महत्त्वलाई सुनेर अगस्तिले फेरि भने ।१।

हे भगवन् ! गोलोक कस्तो छ, कति टाढाको बाटोमा गोलोक रहेको छ र कुन कर्म गर्नाले गोलोक प्राप्त हुन्छ यो सबै सुन्न चाहन्छु ।२।

स्कन्दजी भन्दछन्

हे अगस्तिमुनि ! सुन्नुहोस् भगवान् महेश्वरलाई नमस्कार गरेर सम्पूर्ण कामनाहरूले युक्त भएको परम गोमाताका लोकको बारेमा भन्नेछु ।३।

सम्पूर्ण लोकहरूका तल क्रमशः नरकहरू विद्यमान छन् त्यसपछि सातपातालहरू र तिनका सात स्वामीहरू रहेका छन् ।४।

तेषां प्रत्येकमुत्सेधः प्रमाणं परिकीर्तितम् ।
योजनानां सहस्राणि दश तन्त्रार्थवित्तमैः ॥६॥

सहस्रयोजनं तेषां दलाभ्यन्तरनेमयः ।
सुषिराणाम्प्रमाणञ्च सहस्राणि नवैकशः ॥७॥

तेषां रुचिरमधस्तात्नामत[1]स्तन्महातलम् ।

---

१ ग. मम्भोधिस्तामत ।

CC0. In Public Domain. Digitization by eGangotri
दिव्यद्रव्योपसम्पन्नं श्रीमच्चामीकरद्युति ।।८।।

नागराजः सदैवास्ते तस्मिन् कृतनिकेतनः ।
अनन्तोऽनन्तधामा च मुचुकुन्दो नृपो वली ।।९।।

ततो रसातलं नाम शिलासङ्घात[२]भूमिकम् ।
वासुकेर्नागराजस्य तत्र चारु महापुरम् ।।१०।।[३]

पृथ्वीमा जति परिमाणमा स्वादपूर्ण पेय जल छ त्यत्तिनै मात्रामा तल कुवाको आकारमा पाताल आदि लोक रहेका छन् ।५।

लोक सम्बन्धि शास्त्रका विज्ञहरूले यी प्रत्येक पाताल आदि लोकहरूको विस्तारलाई दशहजार योजन अर्थात् चालिस हजार कोष बताएका छन् ।६।

ती पाताल आदि लोकहरूको एक एक पाटोको सीमा एक हजार योजन अर्थात् चार हजार कोष छ भने ती लोकहरूको कुवाको जस्तो एक एक प्वालको नौहजार योजन अर्थात् छत्तीस हजार कोष परिधि रहेको छ ।७।

ती लोकहरूमा तल सुन्दर महातल नाम गरेको लोक रहेको छ त्यो लोक दिव्य सम्पदाहरूले युक्त, शोभासम्पन्न र सुनको जस्तो कान्तिले युक्त छ ।८।

त्यस महातल लोकमा अनन्त नाम गरेका असीमित तेजले युक्त नागराजले आफ्नो वास बनाएका छन् भने मान्धाताका छोरा मुचुकुन्द र राजा वली पनि त्यहीँ बस्तछन् ।९।

पुरं सुलोम्नस्तत्रैव दानवाधिपतेर्महत् ।
सुपर्णतश्च दैत्यानामन्येषाञ्च महात्मनाम् ।।११।।

तत्र तलातलं नाम शर्करार्चितभूमिकम् ।
नागानां स्वस्ति[४]कादीनां निवासस्तत्र कीर्तितः ।।१२।।

दानवाधिपतीनाञ्च तत्रैव निलयाः कृताः ।
वैरोचनहिरण्याक्षप्रभृतीनां महात्मनाम् ।।१३।।

ततः सुतलमित्युक्तं पातालं पीतभौमिकम् ।[५]
तस्य चोर्ध्वञ्च सर्वेषां मृण्मयूयेव तलक्षितिः ।।१४।।

असुराधिपतेस्तत्र कालनेमेर्महत्पुरम्[६] ।
चारुचामीकरप्रख्यं वैनतेयस्य चापरम् ।।१५।।

---

२ क, ख, घ, ङ. संहात ।
३ ग. पूर्वार्द्धोत्तरार्द्धयो व्यत्येनोल्लेखो वर्तते ।
४ ग. खलि ।
५ घ. १२ पद्यस्योत्तरार्द्धात् १४ पद्यस्य पूर्वार्द्धं यावत् नास्ति ।
६ ख. महापरम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्यसपछि ढुङ्गाहरूको राशिले युक्त भूँइ भएको रसातल नाम गरेको लोक छ त्यहाँ नागराज वासुकिको सुन्दर महानगर छ।१०।

दानवराज सुलोमाको ठूलो शहर पनि त्यहीं छ भने सुपर्ण नाम गरेका दैत्याधिपतिदेखि लिएर अन्य अनेक महात्मा दैत्यहरूका आवास पनि त्यहीं छन्।११।

बग्रेटो युक्त भूँइ भएको तलातल नाम गरेको लोक छ जहाँ स्वस्तिक आदि नागहरूको वासस्थान रहेको छ।१२।

त्यहाँ नै वैरोचन, हिरण्य आदि महान् दानवाधिपतिहरूका वासस्थानहरू रहेका छन्।१३।

पहेंलो भूँइ भएको सुतल नाम गरेको लोक छ, त्यसमाथि रहेका सबै लोकहरूको भुइँ माटाले नै युक्त रहेको छ।१४।

त्यस सुतल नामक पातालमा असुरराज कालनेमिको ठूलो नगर रहेको छ र त्यहीं नै उज्ज्वल सुनको जस्तो चम्कने गरुडको अर्को नगर पनि रहेको छ।१५।

ततश्च नितल[७]न्नाम पातालं रक्तभूतलम्।
तस्मिन् महान्तको नागो दानवाश्च कृतालयाः ॥१६॥

तारकाग्निमुखस्तत्र अनुह्लादश्च[८] दानवः।
निवसन्ति कृतावासाः प्रह्लादस्तु तथैव च ॥१७॥

पातालं वितल[९]न्नाम शुक्लक्षितितलन्ततः।
[१०]कम्बलाश्वतरौं नागौसहितौ यत्र तिष्ठतः ॥१८॥

महाजम्भहयग्रीवप्रभृतीनां महात्मनाम्।
वीराणामसुरेन्द्राणान्निवासस्तत्र कल्पितः ॥१९॥

कृष्णक्षितितलन्तस्मात्पातालन्तलसंज्ञितम्।
शङ्कुकर्णमहानादनमुचीनां निकेतनम् ॥२०॥

पातालसप्तकादूर्ध्वं सप्तद्वीपा मही स्थिता[११]।
समुद्रैः सप्तभिर्युक्ता पर्वतैः समलङ्कृता ॥२१॥

त्यसपछि रातो भूँइ भएको नितल नाम गरेको पाताल छ। त्यसमा महान्तक नाम गरेको नाग र धेरै दानवहरूले आ-आफ्ना आवास बनाएका छन्।१६।

तारक, अग्निमुख, अनुह्लाद आदि नाम गरेका दानवहरूले त्यहाँ आवास बनाएर बस्दछन् भने प्रह्लाद

---

७ ग. वितलम्।
८ ख, घ, ङ. अनुक्रादश्च । ग अनुक्रा(ह्ला)।
९ ग. त्रितलम्।
१० घ. अम्बलाश्व।
११ ख, ग, ङ. स्थिताः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

पनि त्यहीं बस्दछन् ।१७।

CC0. In Public Domain. Digitization by eGangotri

त्यसपछि सेतो भूँइ भएको वितल नाम गरेको पाताल छ, जहाँ कम्बल र अश्वतर नाम गरेका नागहरू मिलेर बस्दछन् ।१८।

त्यहीं महाजम्भ, हयग्रीव आदि महान् वीर असुरराजहरूको निवास पनि विद्यमान छ ।१९। त्यसपछि कालो भूँइ भएको तलनाम गरेको पाताल छ, जहाँ शङ्कुकर्ण, महानाद तथा नमुचि आदि दानवहरूको आवास छ ।२०।

जम्बूद्वीपो महीमध्ये प्लक्षद्वीपस्ततः परः ।
तृतीयः शाल्मलीद्वीपः कुशद्वीपश्च तद्वहिः ।।२२।।

क्रौञ्चद्वीपश्च परतः शाकद्वीपश्च तद्वहिः ।
परतः पुष्करद्वीपः सप्तमः परिकीर्तितः ।।२३।।

क्षारोदश्चेक्षुरसोदः सुरोदश्च घृतोदधिः ।
दध्युदः[१२] क्षीरपूर्णश्च स्वादूदः सप्तमः स्मृतः ।।२४।।

अत्र द्वीपसमुद्राणां द्विगुणाद् द्विगुणोत्तरः ।
प्रमाणं विस्तरो ज्ञेयो नियुतः प्रथमः स्मृतः ।।२५।।

सात वटा पातालभन्दा माथि सातद्वीप र सात समुद्रहरूले युक्त तथा धेरै पर्वतहरूले अलङ्कृत पृथ्वी विद्यमान छ ।२१।

पृथ्वीका माझमा जम्बूद्वीप रहेको छ भने त्यसभन्दा पर प्लक्षद्वीप रहेको छ। त्यसपछि तेस्रो शाल्मलीद्वीप रहेको छ भने त्यसका बाहिरपट्टि कुशद्वीप विद्यमान छ ।२२।

त्यसभन्दा पर पाँचौं क्रौञ्चद्वीप र त्यसका बाहिरतिर शाकद्वीप रहेको छ भने त्यसभन्दा पर सातौं पुष्करद्वीप रहेको बताइएको छ ।२३।

क्षारोद (नुनिलो पानी भएको), इक्षुरसोद (गुलियो पानी भएको), सुरोद (मादक पानी भएको), घृतोद (घ्यूको सागर), दध्युद(दहीको सागर), क्षीरसागर (दूधको सागर) र सातौं स्वादूद (मीठो पिउने पानी भएको) यी सात समुद्र हुन् ।२४।

यी द्वीप र समुद्रहरूको उपर्युक्त क्रममा क्रमैसँग दुई दुई गुणा बढी नाप र विस्तार रहेको छ भने पहिलो द्वीप र पहिलो समुद्रको विस्तार एक लाख रहेको छ। अर्थात् जम्बूद्वीप र क्षारोदसमुद्रको विस्तार एक लाखको छ भने प्लक्षद्वीपको र इक्षुरसोदसमुद्रको दुई लाख शाल्मलीद्वीपको र सुरोदसमुद्रको चार लाख कुशद्वीपको घृतोदसमुद्रको आठ लाख यसैक्रमले प्रत्येक अघिल्लो भन्दा पछिल्लोको मान दुई दुई गुणा बढी छ भनी जान्नू ।२५।

हिमवान् हेमकूटश्च निषधश्चेति दक्षिणे ।
नीलः श्वेतश्च श्रृङ्गी च मेरोरुत्तरतस्त्रयः ।।२६।।

मध्ये मेरुः स्थितः षण्णां जम्बूद्वीपस्य मध्यतः ।

१२ क, ख, ग, घ, ङ. दध्योदः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

माल्यवान् पर्वतो ज्ञेयः पश्चिमे गन्धमादनः ॥२७॥
CC0. In Public Domain. Digitization by eGangotri

एते पर्वतराजानो जम्बूद्वीपे नव स्थिताः ।
प्लक्षद्वीपादिषु ज्ञेयाः सप्त सप्तैव पर्वताः ॥२८॥

पुष्करद्वीपमध्ये च पर्वतो बलयाकृतिः ।
एकः स्थितः समन्ताच्च नामतो मानसोत्तरः ॥२९॥

बहिरेकशिला[13] नाम स्वादूदस्य व्यवस्थिता[14] ।
उर्वी[15] करतलाकारा[16] काञ्चनैः परिमण्डला ॥३०॥

हिमालय, हेमकूट र निषध यी तीन पर्वतहरू सुमेरुपर्वतको दक्षिण दिशामा रहेका छन् भने नील, श्वेत र शृङ्गी यी तीन पर्वतहरू उत्तरतिर रहेका छन् ।२६।

यी छ वटा पर्वतहरू र जम्बूद्वीपको मध्यभागमा सुमेरुपर्वत रहेको छ। सुमेरुको पश्चिमदिशामा माल्यवान् र गन्धमादनपर्वत रहेका छन् ।२७।

यसरी जम्बूद्वीपमा हिमालय, हेमकूट, निषध, नील, श्वेत, शृङ्गी, माल्यवान्, गन्धमादन र सुमेरु यी नौ पर्वत रहेका छन् भने बाँकी प्लक्ष आदि छ द्वीपहरूमा सात सात पर्वतहरू रहेका छन् ।२८।

पुष्करद्वीपको माझमा चारैतिर गोलाकार भएको मानसोत्तर नाम गरेको एउटा पर्वत विद्यमान छ ।२९।

स्वादूद अर्थात् मीठो पानी भएको समुद्रको बाहिरतिर एकशिला नाम गरेको पर्वत विद्यमान छ जसको भूँइ हत्केलाको जस्तो आकृति भएको र सुनले घेरिएको छ ।३०।

आरुद्रसन्निवेशान्ता निवेश्या विबुधक्षितिः[17] ।
तस्याः प्रमाणं निर्दिष्टं दशयोजनकोटयः ॥३१॥

लोकालोक इति ख्यातस्तत्पर्यन्ते समन्ततः ।
स्थितो हेममयः श्रीमानचलः परिमण्डलः ॥३२॥

योजनानां सहस्राणि दशैवोर्द्ध्वं[18] समुच्छ्रितः ।
तावदेव च विस्तीर्णस्तदर्द्ध्वं[19] भानुमान्यतः ॥३३॥

प्रकाशयति तेजोभिः परभागे विहन्यते ।

---

१३ ग. एकशिरा ।

१४ ग, ङ. व्यवस्थितः । घ. व्यवस्थिताः ।

१५ ग. उर्वा ।

१६ ङ. करतराकारा ।

१७ ग. निवेश्या विबुधाक्षितिः ।

१८ ग. अधश्चोर्ध्वम् ।

१९ ग. तदूर्ध्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

लोकालोक इति प्रोक्तस्ततोऽसावचलो[20] महान्[21] ॥३४॥

CC-0. In Public Domain. Digitization by eGangotri

लोकालोकावसानोऽयं भूर्लोकः परिकीर्तितः ।[22]
गन्धर्वयक्षरक्षोभिः पिशाचैश्च निषेवितः ॥ ३५॥

पृथिवीदेखि माथि भगवान् रुद्रको निवाससम्म वासयोग्य देवभूमि छ । त्यसको नाप दश करोड योजन रहेको छ ।३१।

त्यस देवभूमिको परिधिमा लोकालोक नाम गरेको पर्वत विद्यमान छ र त्यो पर्वत शोभाले परिपूर्ण, स्वर्णमय र चारैतिर घेरा बनाएर रहेको छ ।३२।

यो लोकालोक पर्वत दश हजार योजन अर्थात् चालीस हजार कोस माथितिर उठेको छ भने त्यत्तिनै मात्रामा चारैतिर फैलिएको छ । त्यसको आधा भागलाई सूर्यले आफ्ना तेजहरूद्वारा प्रकाशित गर्दछ भने अर्को भागमा सूर्यको प्रकाश छेकिन्छ त्यसैले अन्धकार युक्त रहन्छ । यसकारण यसलाई लोकालोक भनिएको छ र त्यसकारण नै यो पर्वत ठूलो मानिन्छ ।३३-३४।

लोकालोकपर्वतको सीमासम्म भूलोक रहेको छ जहाँ गन्धर्व, यक्ष, राक्षस तथा पिशाचहरू रहन्छन् ।३५।

मनुष्यैः पशुभिश्चैव मृगैः[23] पक्षिसरीसृपैः ।
स्थावरैर्विविधाकारैर्भूतैर्युक्तस्तु षड्विधैः ॥३६॥

भूर्लोकतो भुवर्लोको यावदादित्यमण्डलम् ।
अनिकेता वसन्त्यस्मिन् वसुरुद्राः सभाष्कराः ॥३७॥

आदित्यमण्डलादूर्ध्वं प्रोक्तः[24] स्वर्लोक[25] आध्रुवात्[26] ।
विमानकोटयस्तस्मिन्नष्टाविंशतिरासते ॥ ३८॥

मेढीभूतो[27] विमानानां सर्वेषामुपरि ध्रुवः ।
उद्यन्ते[28] यत्र बद्धानि क्रमेणानिलमण्डले[29] ॥३९॥

योजनानां महीपृष्ठादुर्ध्वं[30] पञ्चदश ध्रुवः ।

---

२० घ. ततस्सर्वाचलो ।
२१ ख. भवेत् ।
२२ ग. ३४औं पद्य र ३५औं पद्यको पूवार्द्ध छैन ।
२३ ग. भूमेः ।
२४ ख. प्रोक्तम् ।
२५ क, ख, घ, ङ. स्वर्लोकम् ।
२६ ग. आध्रुवम् ।
२७ ग. मेधीभूतः ।
२८ ग. समुह्य ।
२९ ग, घ. मण्डलम् ।
३० ग. पृष्ठे ऊर्ध्वम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

नियताश्चानिलस्कन्धाः सप्तैवानुमार्गे[31] स्थिताः ।।४०।।

CC-0. In Public Domain. Digitization by eGangotri

यसै भूलोकमा मनुष्य, पशु, मृग, पक्षी, सर्प आदि जङ्गम र अनेक आकारका छ किसिमका स्थावर (वनस्पति, ओषधि, लता, त्वक्सार, वीरुध र द्रुम) प्राणीहरू रहन्छन् ।३६।

भूलोकपछि आदित्यमण्डलसम्म भुवर्लोक रहेको छ जहाँ घर नभएका वसुहरू, रुद्रहरू र सूर्यहरू बस्ने गर्दछन् ।३७।

आदित्यमण्डलभन्दा माथि ध्रुवलोकसम्म स्वर्लोक रहेको छ। त्यसमा अठ्ठाइस विमानहरूका पङ्क्तिहरू रहेका छन् ।३८।

सबै विमानहरूको मियोको रूपमा रहेको ध्रुव सबैभन्दा माथि रहेको छ। जससँग आवद्ध भएर वायुमण्डलमा विमानहरू रहेका हुन्छन् ।३९।

पृथिव्यां प्रथमः स्कन्धः स्थित आमेघमण्डलात् ।
आवहो नाम मेघानां व्युहनावाहनादिकृत्[32] ।। ४१।।

द्वितीयः प्रवहो नाम विवद्धः सूर्यमण्डले ।
तृतीय उद्वहो वायुस्कन्ध इन्दौ प्रतिष्ठितः ।।४२।।

चतुर्थः संवहस्कन्धः स्थितो नक्षत्रमण्डले ।
ग्रहेषु पञ्चमः सोऽपि विवहः[33] परिकीर्तितः ।।४३।।

स्कन्धः परावहः षष्ठः स्थितः सप्तर्षिमण्डले ।
वायुः परिवहोनाम निवद्धः सप्तमो ध्रुवे ।। ४४।।

करोत्युत्प्लवनादीनि वर्षणादीनि चावहः[34] ।
उपरिष्टात् स्थितः षण्णां विमानोद्वहनक्रियाम् ।।४५।।

पृथ्वीतलभन्दा पन्ध्रयोजन अर्थात् साठी कोसमाथि ध्रुव रहेको छ। त्यसैमा उत्तरतिर हावाका नियत सात मार्गहरू विद्यमान छन् ।४०।

पृथ्वीमा मेघमण्डलसम्म मेघहरूलाई उडाउने र धारण गर्ने आवह नाम गरेको वायुको पहिलो स्कन्ध (मार्ग) विद्यमान छ ।४१।

द्वितीय वायुस्कन्धको नाम प्रवह हो जो सूर्यमण्डलमा रहेको छ। तृतीय उद्वहनाम गरेको वायुमार्ग चन्द्रमामा प्रतिष्ठित छ ।४२।

चौथो वायुस्कन्ध संवह हो जो नक्षत्रमण्डलमा रहन्छ र विवह नाम गरेको पाँचौ वायुस्कन्ध अन्य ग्रहहरूमा रहन्छ ।४३।

---

३१ ग. उत्तराः ।

३२ ग. व्याहारावाहनादिषट् ।

३३ ख. विवहः ।

३४ ख. चाहवः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

छैठौं परावह नाम गरेको वायुस्कन्ध सप्तर्षिमण्डलमा रहेको छ भने परिवह नाम गरेको सातौं वायुस्कन्ध ध्रुवमा आबद्ध छ ।४४।

CC0. In Public Domain. Digitization by eGangotri

आवह नाम गरेको वायुस्कन्धले छ वटा वायुदेखि माथि उठेर वस्तुहरूलाई उछाल्ने, वर्षाउने र विमानहरूलाई धारण गर्ने काम गर्दछ ।४५।

योजनानां ध्रुवात्कोटिमहर्ल्लोकः समुच्छ्रितः ।
विनिवृत्ताधिकाराणामधिवासो महात्मनाम् ॥४६॥

विंशतिः कोटयोऽष्टौ च सुराणामधिकारिणाम् ।
जनाः स्वर्ल्लोकमागम्य नियोगात्पद्मजन्मनः ॥४७॥

स्थित्वा मन्वन्तरन्तत्र स्वव्यापारावसायिते ।
आरोहन्ति महर्ल्लोकमागच्छन्त्यपरे जनाः ॥४८॥

ब्रह्मणो दिवसेनेत्थं देववर्गाश्चतुर्दश ।
क्रमेण कृत्वा कर्माणि महर्लोके वसन्ति ते ॥४९॥

कोटिद्वयं महर्ल्लोकाज्जनलोकः समुच्छ्रितः ।
साध्या नाम सुरास्तस्मिन् वसन्ति सुखिनः सदा ॥५०॥

योजनानान्तपोलोकश्चतस्रः कोटियोजनाः ।
प्रजानाम्पतयस्तत्र मानसा ब्रह्मणः सुताः ॥५१॥

ध्रुवभन्दा एक करोड योजनमाथि महर्लोक छ जहाँ फलाधिकारबाट निवृत्त भैसकेका महात्माहरूको अधिष्ठान छ ।४६।

कमलबाट जन्मेका ब्रह्माको अह्रन खटनबाट अठ्ठाइस करोड अधिकारी देवताहरू र मानिसहरू स्वर्लोकमा आएर एक मन्वन्तर सम्म आफ्नो कर्म व्यापारको फल बाँकि रहँदासम्म त्यहाँ रहेर महर्लोकमा जान्छन् र त्यहाँ अर्थात् स्वर्गलोकमा अरू मानिसहरू आउँछन् ।४७-४८।

ब्रह्माको एक दिन अर्थात् एक हजार युगसम्म चौध वटा देववर्गहरू क्रमैसँग शुभकर्म गरेर महर्लोकमा वस्दछन् ।४९।

महर्लोकभन्दा दुई करोड योजन माथि जनलोक छ, साध्य नाम गरेका देवताहरू सधैं सुखी भएर त्यस लोकमा वस्दछन् ।५०।

महर्लोकभन्दा चार करोड योजनमाथि तपोलोक रहेको छ जहाँ ब्रह्माका मानसपुत्रहरू प्रजापतिका रूपमा प्रतिष्ठित छन् ।५१।

सत्यलोकस्तपोलोकात्कोटयः षट्समुच्छ्रिताः ।
आस्ते परिवृतस्तत्र सुराणामीश्वरैर्विराट् ॥ ५२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मलोकाद् विष्णुलोको[३५] द्विगुणेन समुच्छ्रितः ।
विस्तरेण तदूर्ध्वञ्च दिव्यभोगः समन्वितः ॥५३॥

विष्णुलोकाच्च परतः श्रीमच्छिवपुरं महत् ।
द्वात्रिंशत्कोटिविस्तीर्णन्तदर्द्धेन समुच्छ्रितम् ॥५४॥

सूर्यायुतप्रतीकाशं सर्वकामसमन्वितम् ।
अनेकाकारविन्यासरचनाद्युपशोभितम् ॥५५॥

सर्वरत्नचितैर्द्रव्यै[३६]स्तप्तजाम्बूनदप्रभैः ।
सहस्रगुणभोगैश्च तदूर्ध्व[३७]गुणभौमिकम् ॥५६॥

तपोलोकभन्दा छ करोड योजनमाथि सत्यलोक रहेको छ, त्यहाँ देवताका अधिपतिहरूद्वारा परिवृत विराट्स्वरूप भगवान् वस्तछन् ।५२।

सत्यलोकभन्दा माथि ब्रह्मलोक र सत्यलोक र ब्रह्मलोकको दूरीभन्दा दुई गुणा बढी दूरीमा माथि र त्यत्ति नै विस्तारले युक्त दिव्यभोगले परिपूर्ण विष्णुलोक रहेको छ ।५३।

विष्णुलोकभन्दा पर महान् शिवलोक रहेको छ, जो बत्तीस करोडयोजन सम्म फैलिएको र त्यसको आधा सोह्रकरोडयोजन माथि रहेको छ ।५४।

दशहजारसूर्यहरूको जस्तो प्रकाश भएको, सम्पूर्ण चाहनाहरूलाई पूर्ण गर्न सक्ने क्षमताले युक्त, अनेक आकारका विशेष किसिमका वस्तुहरूद्वारा सजाइएको, अत्यन्त शोभासम्पन्न र महान् शिवलोक छ ।५५।

सम्पूर्ण रत्नहरू जडित, खारिएको सुनको जस्तो चमक भएका द्रव्यहरूद्वारा र हजारौं गुणा भोगहरू र ऊर्ध्वगामी गुणसम्पन्न भूँइले युक्त शिवलोक छ ।५६।

अप्सरोगणसङ्कीर्णैः सर्ववाद्यसमन्वितैः ।
गीतनृत्यरसोपेतैरप्रमेयगुणान्वितैः ॥ ५७॥

मनोजवैरसंख्यैश्च[३८] परिवारसमन्वितैः ।
विमानैः सर्वतो व्याप्तं ताराभिरिव चाम्बरम् ॥ ५८॥

क्वचिद्दोलागृहै रम्यैः किङ्किणीरवकान्वितैः ।
बुद्बुदैरर्द्धचन्द्रैश्च घण्टाचामरभूषितैः ॥५९॥

मणिमुक्तावितानैश्च छत्रैश्च मणिदण्डकैः ।
सर्वरत्नचितैः शुभ्रैर्मुक्ताहारैश्च शोभितैः ॥ ६०॥

---

३५ ग. तस्योपरि ब्रह्मलोकः ।

३६ क. दिव्यैः ।

३७ क, ख, ग, घ, ङ. तदर्द्ध ।

३८ घ. मनोजवैरसंख्यैश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri
(महासिंहासनैर्दिव्यैः सर्वरत्नविभूषितैः ।[३९])
क्वचित्पुष्पगृहैर्व्याप्त[४०]मसंख्येयगुणान्वितैः ।
सदापुष्पफलैर्वृक्षैः क्वचिद्व्याप्तं मनोरमैः ।६१।

पुष्पोद्यानैर्महारम्यैर्दिव्यगन्धगुणान्वितैः ।
अमृतस्यन्दिनीभिश्च नदीभिरुपशोभितम् ।।६२।।

सम्पूर्ण वाद्यवादनहरूका साथ गीत र नाचहरूको रसमा डुबेका असंख्य गुणहरूले युक्त अप्सराहरूको लर्को लागेकाएवं ताराहरूद्वारा गगनतल व्याप्त भएझैं असंख्य परिवारले युक्त, मनको जस्तो तीव्र वेग भएका विमानहरूद्वारा शिवलोक व्याप्त छ । ५७-५८।

कहीं घुँघुराहरूको मधुर ध्वनिले युक्त, घण्ट तथा चामरहरूले विभूषित, अर्धचन्दका जस्ता र पानीका फोकाहरू जस्ता मणि तथा मोतीहरू जडित झालरहरू भएका मणिकै डण्डी भएका छत्रहरूले र सबै रत्नहरू जडित सेता मोतीका मालाहरूले शोभायमान सुन्दर झुलाघरहरूले युक्त शिवलोक छ ।५९-६०।

(अनेक रत्नहरू जडिएका ठूला ठूला सिंहासनहरूले युक्त झुलाघरहरू रहेको शिवलोक छ ।)
कहीं असंख्येय गुणहरूले युक्त फुलेका लतागृहहरूले व्याप्त छ भने कहीं सधैं फूल र फलहरूले लटरम्म मनोहारी रूखहरूले युक्त छ ।६१।

हेमरत्नचिता[४१] वाप्यः सोपानैः स्फटिकप्रभैः ।
सितरक्तासितैः पीतैः शुक्लवर्णैः सुगन्धिभिः ।।६३।।

पञ्चवर्णैश्च मृदुभिः पद्मैः शोभितकाञ्चनैः ।
सदा विकसिताम्लानैः[४२] श्रीमद्भिः पञ्चहस्तकैः ।।६४।।

दशद्वादशहस्तैश्च विंशहस्तैश्च शोभनैः ।
नालैर्मरकतप्रख्यैः पुष्पैश्च सुमनोहरैः ।।६५।।

पूर्णा नीलोत्पलैश्चान्या दीर्घिकाश्च क्वचित् क्वचित् ।
सिंहव्याघ्रमुखैर्दिव्यैर्गजवाजिमुखाननैः[४३] ।।६६।

गोमुखैश्छागवदनैर्नानाविहङ्गरूपिभिः ।
एकवक्त्रैर्महावक्त्रैर्बहुवक्त्रैः सुवक्त्रकैः ।।६७।।

एकपादैस्त्रिपादैर्वा बहुपादैरपादकैः ।
वामनैर्जटिलैर्मुण्डैर्दीर्घग्रीवैर्महोदरैः ।।६८।।

---

३९ घ. पङ्क्तिरियमधिका ।
४० ग. प्राप्य ।
४१ घ. देवरत्नचिता ।
४२ ग. विकसितास्नानैः ।
४३ ग. मुखान्वितैः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कतै अत्यन्त रमणीय तथा दिव्य वासनाको गुणले परिपूर्ण फूलका बगैंचाहरू र कहीं अमृतवाहिनी नदीहरूले शोभायमान छ।६२।

कतै सुन र रत्न जडित स्फटिक जस्ता स्वच्छ कान्ति भएका सिढीहरूले युक्त जलकुण्ड छन् भने कतै सेता, राता र काला कतै पहेंला कतै सेतैसेता, वासनाले परिपूर्ण परागहरूले युक्त कोमल कमलहरूले व्याप्त साना पोखरीहरू र कतै सधैं फुल्ने कहिल्यै नवैलिने सधैं शोभाले परिपूर्ण पाँच हाते, दश हाते, बाह्र हाते र बीस हाते मरकतमणिका जस्ता डाँठ र अत्यन्त आकर्षक फूलहरूले युक्त र कतै नीलकमलहरूले भरिभराउ साना पोखरीहरू रहेका छन् । ६३-६६।

महाकायैर्महानासैर्महाकर्णैरकर्णिकैः ।
नानारूपाकृतिधरैर्नानाभरणभूषितैः ॥६९॥

नानावेशधरैर्दिव्यैः कामरूपैर्महाबलैः ।
नानाप्रभावसंयुक्तैर्नानाशास्त्रविशारदैः ॥७०॥

असंख्यातैर्गणैर्व्याप्तं स्त्रियश्चान्यास्तथाविधाः ।
कुब्जवामनिका दीर्घा वरदेहा वराननाः ॥७१॥

मुण्डाश्च विकटाः स्थूलाः सुरूपाश्चिपिटनासिकाः ।
लम्बोदरा ह्रस्वभुजा विनता ह्रस्वजानुकाः ॥७२॥

मृगेन्द्रवदनाश्चान्या गजवाजिमुखास्तथा ।
ह्रस्वकुञ्चितकेशाश्च सुन्दर्यः प्रियदर्शनाः ॥७३॥

अन्याश्च कामरूपिण्यः कोटिशः परिचारिकाः ।
बहिरन्तः प्रचारास्ता रमन्ते सर्वभूमिषु ॥७४॥

सिंह तथा वाघका जस्ता मुख भएका, अलौकिक हात्ती, घोडा आदिका जस्ता मुख भएका, गाईको र बाख्राको जस्ता मुख भएका, अनेकथरी पक्षिहरूको रूप धारण गरेका, एक मुखे, ठूलो मुख भएका, धेरै मुख भएका र राम्रो मुख भएका, एक खुट्टे, दुई खुट्टे, अनेक खुट्टे, खुट्टै नभएका, पुड्के, जटाधारी, कपाल खौरिएका, लामो घाँटी भएका, ठूलो भूँडी भएका, विशालकाय, ठुलो नाक भएका, ठूला कान भएका, कानै नभएका, अनेक किसिमका रूप र आकार भएका, अनेक किसिमका गहनाहरू लगाएका, अनेक किसिमको वेश धारण गरेका, दिव्य, स्वेच्छाले रूप परिवर्तन गर्न सक्ने, अत्यन्त शक्तिशाली, अनेक किसिमका प्रभावले परिपूर्ण, अनेक शास्त्रमा विद्वत्ता हासिल गरेका, असंख्य गणहरूले शिवपुर व्याप्त छ। त्यस शिवपुरका अन्य स्त्रीहरू पनि त्यस्तै विचित्र किसिमका छन् ।६६-७१।

कुप्रो परेका, पुड्का, अग्ला, राम्रो जिउ भएका, राम्रो मुख भएका, कपाल खौरेका, बाङ्गा-टेढा, मोटा, सुन्दर रूप भएका, चेप्टो नाक भएका, लामो पेट भएका, साना हातहरू भएका, झुकेका, छोटा घुँडा भएका, सिंहको जस्तो मुख भएका र कुनै कुनै हात्ती र घोडाको जस्तो मुख भएका,

विचित्रा भूमयस्तत्र वज्रवैदूर्यसन्निभाः ।
क्वचित्सुवर्णसङ्काशाः क्वचिन्मरकतप्रभाः ॥७५॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्फटिकेन्द्रनीलवर्णाः पद्मरागनिभाः क्वचित् ।
चन्द्रमण्डलसङ्काशाः क्वचिदिन्दीवरप्रभाः ॥७६॥

अम्लानैः पञ्चवर्णैश्च महापद्मैरलङ्कृताः ।
क्वचिच्च विविधै रम्यैः कुसुमैरुपशोभिताः ॥७७॥

एवं विभिन्नवर्णाभा भूमयोऽतीव शोभनाः ।
रमन्ते यासु सततं स्त्रीभिः सार्द्धं शिवाश्रिताः ॥७८॥

नीलोत्पलदलश्यामाः पद्मपत्रायतेक्षणाः ।
तप्तचामीकराकाराः शुद्धश्यामास्तथापराः ॥७९॥

प्रियङ्गुश्यामवर्णाश्च दिव्यगन्धमनोहराः[४४] ।
कृशोदर्यःसुजङ्घास्ताः[४५] सुरूपाः प्रियदर्शनाः ॥८०॥

सानो घुमेको कपाल भएका, देख्दा राम्रा लाग्ने सुन्दरीहरू र अन्य कतिपय कामरूपिणी सेविकाहरू छन् र उनीहरू बाहिर भित्र सबै ठाउँमा घुम्दै रमाउँछन् ।७२-७४।

त्यहाँ भूँइ पनि बज्र र वैदूर्यमणिका जस्ता विचित्रका छन्, कहीं सुनका जस्ता, कहीं मरकतमणिको जस्तो नीलो कान्ति भएका, कहीं स्फटिक र इन्द्रनीलमणिको जस्तो वर्ण भएका र कहीं पद्मरागमणिको जस्तो रातो कान्ति भएका भूँइहरू छन् । कहीं चन्द्रमण्डलको जस्तो समुज्ज्वल कान्ति भएका, कहीं इन्दीवरकमलको जस्तो श्यामकान्ति भएका, कहिल्यै नवैलाउने पाँचवटा वर्णले युक्त भएका, ठूला ठूला कमलहरूले विभूषित भएका र कहीं अनेक किसिमका सुन्दर फूलहरूले शोभायमान शिवलोकका भूँइहरू छन् ।७५-७७।

कहीं अनेक किसिमका रमणीय फूलहरूले शोभायमान विभिन्न वर्ण भएका अत्यन्त सुन्दर भूँइहरू विद्यमान छन् जहाँ शिवाश्रित मानिसहरू स्त्रीहरूका सँगमा निरन्तर रमाउँदछन् ।७८।

मत्तमातङ्गगामिन्यः स्तनभारविनामिताः ।
मदालसाः सुकेशाश्च सर्वावयवशोभिताः[४६] ॥८१॥

चित्रवस्त्रपरीधाना दिव्याभरणभूषिताः ।
सोल्लापोल्लापकुशला गीतवाद्यरतिप्रियाः ॥८२॥

दन्तत्विषा रञ्जितगण्डदेशाः स्वात्मप्रभाभासितगात्रयष्ट्यः ।
स्वाभाविकैस्ता सुरत[४७]प्रयोगैः प्रहृष्टचित्ता रमयन्ति नार्यः ॥८३॥

नृत्यप्रयोगैर्मधुरैश्च गेयैस्तन्त्रीनिबन्धैर्विविधैश्च वाद्यैः ।
हास्यैः स्मितैर्लोचनविभ्रमैश्च क्रीडाप्रयोगैर्विविधैस्तथान्यैः ॥८४॥

---

४४ ख, ग. मनोरमाः ।
४५ ख, ग. सुसङ्घा(धा) ।
४६ ख, ग, घ. शोभनाः ।
४७ ग. ललित ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ती स्त्रीहरू कस्ता छन् भने कुनै नीलकमलको दल जस्तै श्यामवर्णका र पद्मपत्रका जस्ता ठूला आँखा भएका, कुनै खारिएको सुनको जस्तो आकृति भएका र कुनै शुद्धरूपमा श्यामवर्णका, कुनै प्रियङ्गुको जस्तो श्याम वर्ण भएका, अलौकिक सुगन्धले आनन्दित गर्ने, पातलो कम्मर र राम्रा जाँघ भएका, सुन्दर रूप र हेरिरहूँ जस्तो लाग्ने मत्त हात्तीको जस्तो हिडाइ भएका, स्तनको भारले झुकेका, मदले गर्दा आलस्ययुक्त राम्रो केश र सबै अङ्गहरू सुन्दर भएका, विचित्र किसिमको पहिरन गरेका, अलौकिक गहनाहरूले सुशोभित, वातचितमा अत्यन्त प्रवीण, नाच गान र रतिलाई मनपराउने खालका छन् ।७९-८२।

दाँतको कान्तिले गालाहरूलाई प्रकाशित गरिरहेका, आफ्नो भित्री कान्तिद्वारा शरीररूपी यष्टिमा चमक छरिरहेका, स्वाभाविक हावभावद्वारा आनन्दित भैरहेका नारीहरूले शिवभक्तहरूलाई आनन्दित तुल्याउँछन् ।८३।

नृत्यको प्रयोग र वीणाका तारहरूसँग बाँधिएका मीठा गीतहरू, अनेक किसिमका वाद्यहरू, हास, परिहास, मुस्कान, आँखाका हाउभाउ त्यस्तै अन्य धेरै क्रीडाप्रयोगहरूद्वारा नारीहरूले शिवपुरमा शिवभक्तहरूलाई आनन्दित तुल्याउँछन् ।८४।

इति दिव्यगुणोपेतैः स्त्रीसहस्रैर्मनोरमैः ।
असंख्यातैः पुरं व्याप्तमीश्वरस्य समन्ततः ॥ ८५॥

तन्मध्ये सर्वतोभद्रं दिव्यमायतनं महत् ।
शुद्धस्फटिकसङ्काशमाद्यस्थानमुमापतेः ॥८६॥

तत्रास्ते भगवान् सोमः पूज्यमानो गणेश्वरैः ।
सिद्धैश्च स्थानसम्प्राप्तैर्ब्रह्मविष्ण्वाग्निवायुभिः ॥८७॥

ईश्वरायतनस्याधः श्रीमान् धर्मवृषः स्थितः ।
यत्र वीरवृषस्तत्र नित्यं[४८] गोमातरः स्थिताः ॥८८॥

गोलोकः शिवलोकश्च एक एव ततः स्मृतः ।
ये गुणा रुद्रलोकस्य गोलोकस्यापि ते गुणाः ॥८९॥

यसरी अलौकिक गुणहरूले युक्त भएका मनलाई आनन्दित गर्ने असंख्य हजारौं हजार स्त्रीहरूद्वारा भगवान् शिवको लोक चारैतिर व्याप्त छ ।८५।

शिवलोकको बीचमा चारैतिर ढोका भएको अलौकिक शुद्धस्फटिक झैं निर्मल, भगवान् उमापति शिवको पहिलो ठूलो विश्रामस्थल छ ।८६।

त्यहाँ गणेश्वर, सिद्ध र आ-आफ्नो ठाउँ पाएका ब्रह्मा, विष्णु, अग्नि र वायुहरूद्वारा पूज्यमान भगवान् शिवजी रहनुहुन्छ ।८७।

भगवान् शिवको विश्रामस्थानभन्दा तल शोभाले परिपूर्ण शिवको वाहन धर्मवृष(साँढे) बस्दछन् जहाँ यी वीर शिववाहन बस्दछन् त्यहीं सधैं गौमाताहरू पनि रहन्छन् ।८८।

---

४८ ग. क्षित्याम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

त्यसकारण गोलोक र शिवलोक एउटै मानिएको छ। जे जे गुणहरू शिवलोकमा रहन्छन् ती सबै गुणहरू गोलोकमा पनि रहन्छन् ।८९।

CC0. In Public Domain. Digitization by eGangotri

नन्दा सुभद्रा सुरभी सुशीला सुमनाश्च ताः ।
इति गोमातरः पञ्च शिवलोके व्यवस्थिताः ॥९०॥

एता दिव्या जगद्धात्र्यः सर्वलोकस्य मातरः ।
तर्प्पयन्ति जगत् कृत्स्नं नित्यमात्मरसामृतैः ॥९१॥

अवतीर्य शिवस्थानादीश्वरेच्छावशानुगाः ।
उपकाराय सर्वेषामिमं लोकं समाश्रिताः ॥९२॥

तृणानि खादन्ति वसन्त्यरण्ये पिबन्ति तोयान्यपरिग्रहाणि ।
दुह्यन्ति वाह्यन्ति पुनन्ति पापं गवां रसैर्जीवति जीवलोकः ॥९३॥

कुतस्तेषां हि पापानि येषां गृहमलङ्कृतम् ।
सततं बालवत्साभिर्गोभिः श्रीभिरिव स्वयम् ॥९४॥

यस शिवलोकमा नन्दा, सुभद्रा, सुरभी, सुशीला र सुमना यी नाम गरेका पाँच गौमाताहरू विद्यमान रहन्छन् ।९०।

यी गोमाताहरू ब्रह्माण्डका दिव्य धाईहरू र सम्पूर्ण लोकहरूका आमाहरू हुन् । यिनीहरूले सधैं आफ्नो दुग्धरसामृतद्वारा सम्पूर्ण ब्रह्माण्डलाई तृप्त पार्दछन् ।९१।

भगवान् शिवको इच्छाको अनुसरण गर्दै गौमाताहरू शिवलोकबाट झरेर सबैको उपकारका निमित्त यस पृथ्वीको आश्रय लिने गर्दछन् ।९२।

घाँस खान्छन्, वनमा बस्दछन्, कुनै मोल नपर्ने पानी पिउँदछन्, दूध दिन्छन्, भार, वंश वा जोताइ आदि कार्यको निर्वाह गर्दछन् र पापबाट चोख्याउँछन् र गोरसबाटै प्राणीहरूले जीवन पाउँछन् ।९३।

जुन मानिसहरूका घर निरन्तर बाच्छाबाच्छीसितका साक्षात् लक्ष्मी जस्ता गाईहरूले विभूषित हुन्छन् तिनीहरूलाई पापहरूले कसरी छुन सक्छन् ?।९४।

ये कुर्वन्ति गवां भक्तिं तृणतोयप्रदानतः ।
व्रणसंरोहणाद्यैश्च गवां लोकं व्रजन्ति ते ॥९५॥

तृणतोयप्रदेशेषु नीत्वा यत्नेन मातरः ।
ये रक्षन्ति सदा गोपाः शिवलोकं व्रजन्ति ते ॥९६॥

ये शिवाय गुरोर्वापि गां प्रयच्छन्ति भक्तितः ।[४९]

४९ घ. ८४ पद्यादारभ्य ९८पद्यस्य पूर्वार्द्धपर्यन्तं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

ते मोदन्ति शिवे लोके भोगैः कल्पायुतान्नराः ॥९७॥ CC0. In Public Domain. Digitization by eGangotri

निवेद्य गोरसं भक्त्या शक्त्या च[५०] शिवयोगिने ।
सर्वान् कामानवाप्नोति शिवलोकमितो गतः ॥९८॥

इहलोकसुखार्थाय परलोकहिताय च ।
सर्वस्वेनापि गान्तस्मादाददीत विपश्चितः[५१] ॥९९॥

जुन मानिसहरूले घास तथा पानी दिएर र घाउहरूको उपचार गरेर गाईको सेवा गर्दछन् ती मानिसहरू गोलोकलाई प्राप्त गर्दछन् ।९५।

जुन मानिसहरूले प्रशस्त घास र पानी भएको ठाउँमा लगेर यत्नपूर्वक गौमाताहरूको रक्षा गर्दछन् ती गाईका संरक्षक सधैं शिवलोक प्राप्त गर्दछन् ।९६।

जुन मानिसहरूले भक्तिपूर्वक शिव अथवा गुरुलाई गाई दान गर्दछन् ती मानिसहरू दशहजार कल्पसम्म नानाथरी भोगहरूले युक्त भएर शिवलोकमा रमाउँछन् ।९७।

जसले भक्तिपूर्वक तथा शक्ति अनुसार शिवयोगिलाई गोरस प्रदान गर्दछ ऊ यहाँबाट शिवलोक जान्छ र सम्पूर्ण चाहनाहरूलाई पूर्ण गर्दछ ।९८।

यसलोकमा सुख तथा धनका लागि र परलोकको हितका लागि बुद्धिमान् मानिसले सर्वस्व प्रदान गरेर पनि गाई ल्याएर पाल्नु पर्दछ ।९९।

अहो ! सुमहदाश्चर्यमहो ! सुष्ठु सुभाषितम् ।
यत् पवित्रश्च मृष्टश्च गोरसो बुद्धिवर्द्धनः[५२] ॥१००॥

गोमता निर्जिताः लोका मृष्टा[५३]शा गोमतार्जिताः ।
गोमता निर्जितः स्वर्गः समस्तं गोमता जितम् ॥१०१॥[५४]

गावो बन्धुर्मनुष्याणां गावश्च धनमुत्तमम् ।
गावो येषां गृहे नस्युरबन्धुरिव तद्गृहम् ॥१०२॥

स्पृष्ट्वा तु गावः शमयन्ति पापं दत्वा तु गावस्त्रिदिवं नयन्ति ।
संरक्षिताश्चोपनयन्ति वित्तं गोभिर्न तुल्यं धनमस्ति किञ्चित् ॥१०३॥

सम्पन्नमश्नाति ददाति नित्यं पापापहं मित्रविवर्द्धनञ्च ।
स एव चार्थः परिभुज्यते च गोभिर्न तुल्यं धनमस्ति किञ्चित् ॥१०४॥

---

५० ग. शिवाय ।

५१ ग. विपश्चितैः ।

५२ क, ख, घ, ङ. पवित्रश्च मृष्टश्च गोरसो बुद्धिवर्द्धनः ।

५३ ग. वृता ।

५४ क. इदं पद्यार्द्धं नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अहो ! ठूलो आश्चर्यको कुरा र अत्यन्त राम्रो भनाइ छ त्यो के भने गाईको दूध, दही, घीउ आदि पवित्र हुन्छ, मीठो हुन्छ र बुद्धिलाई बढाउँछ ।१००।

गाई पाल्ने मानिसले लोकहरूलाई जित्दछ र स्वच्छ चाहनाहरूलाई पूरा गर्दछ यद्वा स्वच्छ दिशाहरूलाई आफ्नो अधीनमा पार्दछ। स्वर्गलाई जित्दछ र गाई पाल्ने मान्छेले सम्पूर्ण वस्तुहरूलाई जित्दछ ।१०१।

गाई मानिसहरूको बन्धु हो, गाई नै उत्तम धन हो । जुन मानिसहरूको घरमा गाईहरू छैनन् त्यो घर बन्धु विहीन जस्तो हुन्छ ।१०२।

गाईहरूले छुदा पाप नाश गर्दछन्, दान दिँदा स्वर्ग लैजान्छन्, संरक्षण गर्दा धन प्रदान गर्दछन् त्यसैले यस संसारमा गाई बराबर अरू कुनै धन छैन ।१०३।

तृणानि शुष्काणि वने चरित्वा पीत्वा च तोयान्यमृतं स्रवन्ति ।
यद्गोमयाद्यैश्च पुनन्ति लोकान् गोभिर्न तुल्यं धनमस्ति किञ्चित् ॥१०५॥

स एव लोके परमं पवित्रं गवां रसं पुष्टिविवर्द्धनञ्च ।
अश्नाति नित्यं विविधान्नयुक्तमिष्टञ्चिरं येन शिवः प्रसादात्[५५] ॥१०६॥

गोमातृशालां यः कुर्यात् सुदृढामिष्टकामयीम् ।
मृत्पिण्डकाष्ठकुड्या[५६] वा सत्कपाटार्गलान्विताम् ॥१०७॥

सपिधानैर्गवाक्षैश्च चतुर्भिः समलङ्कृताम् ।
पश्चात् कुड्यञ्च कर्तव्यमुच्चैरेव गवाक्षकम् ॥१०८॥

सुपक्वैर्वंशविदलैः कटं कृत्वा समं दृढम् ।
गवामधः प्रदातव्यं येन मूत्रमधो व्रजेत् ॥१०९॥

गोपालले गोधनका माध्यमबाट पूर्णताका साथ मीठो खान्छ र अरूलाई पनि दिन्छ । गोधन पापहारी र मित्रको वर्द्धक छ । त्यो नै यथार्थ धन हो जसको पूर्णतया भोग गरिन्छ । त्यसैले गोधन बराबर अन्य कुनै धन हुँदैन ।१०४।

वनमा सुकेको घास चरेर र पानी पिएर अमृत वहाउँछन् (दूध दिन्छन्) र गोबर गोमूत्र आदिले संसारलाई पवित्र गर्दछन् । संसारमा गोधन बराबर अरू कुनै धन छैन ।१०५।

त्यो गोपालक मनुष्यले नै भगवान् शिवजीको कृपाबाट अनेक किसिमका अन्नहरूका साथ बल र बुद्धिलाई बढाउने अत्यन्त पवित्र मीठो गोरस सधैं चिर कालसम्म खान्छ ।१०६।

जसले गाईआमाका लागि राम्रो गोठ बनाउन चाहन्छ उसले ईटा, माटाको डल्ला वा काठहरूको भित्ता भएको राम्रा ढोका र आग्लोले युक्त, बन्द गर्न मिल्ने पछाडि उचाइमा चारवटा झ्यालहरूले युक्त बनाउनु पर्दछ ।१०७-१०८।

---

५५ क, ख, घ. शिवः प्रयत्नात् । ग. शिवः प्रसादात् (नवः प्रपान्नात्) । ङ. शिवः प्रसन्नात् ।

५६ ग. कुड्यम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

छिप्पिएका बाँसका कप्टेराहरूले सम्म र बलियो चटाई बनाएर गाई बस्ने भूँइमा विछाउनू, जसबाट गहुँत तल बगेर जाओस् ।१०९।

गोमयं तं गवाक्षैश्च क्षिप्त्वा दूरं पुनर्नयेत् ।
विकीर्य[५७] भस्मना सर्वं धूपयीत समन्ततः ॥११०॥

कृशवृद्धातुराणाञ्च पृथग्भावं प्रकल्पयेत् ।
पृथक् च बालवत्सानामितरेषां पृथग्भवेत् ॥१११॥

दम्यानड्वाहभद्राणां[५८] वसतिं कल्पयेत् पृथक् ।
गाः स्वपन्ति सुखेनैव वसन्ति च रमन्ति च ॥११२॥

रुद्रो ब्रह्मा च विष्णुश्च गोशालायां सदा यजेत् ।
विन्यस्य पूर्ववदनां पश्चात् कुड्यगवाक्षके ॥११३॥

सिंहारूढां महादुर्गां पञ्च नन्दादिमातरः ।
विघ्नेशं सोमनन्दिञ्च पूर्वादारभ्य विन्यसेत् ॥११४॥

त्यो गोबरलाई झ्यालहरूबाट बाहिर फालेर त्यहाँबाट पनि टाढा लग्नू र गाई बस्ने ठाउँमा खरानी छरेर चारैतिर धूप बाल्नू ।११०।

दुब्ला, बुढा र रोगी गाईहरूका लागि छुट्टै ठाउँ बनाउनू र साना वाच्छा भएका गाईहरूका लागि र अरू गाईहरूका लागि छुट्टै छुट्टै बस्ने ठाउँ बनाउनू ।१११।

दाउने वहर तथा गोरुहरूका लागि छुट्टै बस्ने ठाउँ बनाउनु पर्दछ र गाईहरूलाई पनि छुट्टै राख्नु पर्दछ । यसरी छुट्टाछुट्टै राख्दा गाईहरू सजिलैसँग निदाउँछन्, बस्छन् र रमाउँछन् ।११२।

भगवान् रुद्र, ब्रह्मा र विष्णु गौशालामा सधैं गाईको पूजा गर्दछन् । पछिल्तिर भित्ताका झ्यालमा पूर्वतिर मुख भएकी सिंहमा बसेकी महादुर्गा र नन्दा, सुभद्रा, सुरभी, सुशीला र सुमना पाँच गौमाताहरू, विघ्न नायक गणेश तथा सोमनन्दि अर्थात् नन्दिकेश्वर भगवान् शिवको पूर्वदेखि शुरु गरेर क्रमैसँग स्थापना गर्नू ।११३-११४।

नद्युभयतटाश्वत्थविल्ववल्मीकमृत्तिकाम् ।
पञ्चगव्येन संयोज्य देवान् पिण्डैः प्रकल्पयेत् ॥११५॥

द्वारशाखागवाक्षाभ्यां मृदा कार्यौ सुशोभनौ ।
नन्दीश्वरमहाकालौ वृषञ्चोच्चैर्बहिः स्थितम् ॥११६॥

यादृशोऽयं वृषेन्द्रः स्यात्सर्वावयवशोभनः ।
तद्दर्शनानुभावेन गवां स्युस्तादृशाः प्रजाः ॥११७।

अष्टम्यां स्नापनं कृत्वा भोजनञ्च प्रकामतः ।

---

५७ क, ख, घ, ङ. अवकीर्य ।
५८ क, ख, घ, ङ. यद्राणाम् । ग. य प्राणाम् (वृषाणाम्) ।न

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वस्ति वाच्यं ततश्चाग्रे[५९] प्रधानाङ्गां प्रवेशयेत् ।।११८।।

इति यः कारयेद् भक्त्या गोमातृगृहमीदृशम् ।
स विधूयाशु पापानि शिवलोके महीयते ।।११९।।

नदीका दुबै तटहरू, पिपल, बेल र धमिराको गोलाको माटो तथा गाईको दूध, दही, घीउ, गोबर र गहुँत मिलाएर तिनको पिण्डहरूद्वारा देवताहरूको मूर्ति बनाउनू ।११५।

गोठका ढोकाको शाखाको रूपमा रहेका झ्यालहरूमा माटाले सुन्दर नन्दिकेश्वर र महाकालका मूर्तिहरू बनाउनू र त्यसको बाहिरपट्टि अग्लो ठाउँमा बसेको शिवको वाहन साँढेको मूर्ति बनाउनू ।११६।

सम्पूर्ण अवयवहरूले युक्त जति सुन्दर वृषराज साँढेको मूर्ति बनाइन्छ त्यसैको दर्शनको महात्म्यले गाईहरूका त्यस्तै बाच्छाहरू जन्मन्छन् ।११७।

अष्टमी तिथिमा स्नान गराएर इच्छापूर्वक भोजन गराई स्वस्तिवाचन गरी सबैभन्दा पहिले मुख्य गाईलाई गोठभित्र प्रवेश गराउनू ।११८।

यसरी जसले गौमाताको यस किसिमको घर भक्तिपूर्वक बनाउँदछ ऊ सम्पूर्ण पापहरूलाई पखालेर शिवलोकमा प्रतिष्ठित हुन्छ ।११९।

बालसूर्यप्रतीकाशैः सर्वकामसमन्वितैः ।
काञ्चनैर्भवनैर्दिव्यैः सर्वरत्नोपशोभितैः ।।१२०।।

सप्तभौमैः पुरवरैः शतसंख्यैर्यथेप्सितैः ।
प्रत्येकमतिदिव्येन स्त्रीसहस्रेण संयुतैः ।।१२१।।

एतैरन्यैश्च विपुलैर्महाभोगैर्यथेच्छया ।
क्रीडते तत्र पुण्यात्मा यावदाचन्द्रतारकम् ।।१२२।।

ततः कालात् परिभ्रष्टः क्रमाद् भोगमवाप्नुयात् ।
हरिब्रह्मादि लोकेषु तदन्ते मेरुमूर्धनि ।।१२३।।

तस्मादपि च्युतः कालात् प्राप्नुयादुत्तरां कुरून्[६०]।
ततो भारतवर्षेऽस्मिन् राजा भवति धार्मिकः ।।१२४।।

सुरूपः सुभगः शूरः सर्वकामसमन्वितः ।
तत्र[६१] प्राग्वासनायोगात् पुण्यमाचरते पुनः ।।१२५।।

जसले यसरी विधिवत् गोठ बनाएर गाईको सेवा गर्दछ त्यो धर्मात्मा भरखर उदाएका सूर्यको जस्तो कान्ति

५९ घ. वाचनं तपश्चाये ।

६० ग. दुत्तरां कुरुम् ।

६१ ख, ग, घ. ततः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भएका, समस्त कामनाहरूलाई पूर्ण गर्ने, सुनले बनेका, सम्पूर्ण रत्नहरूले सुशोभित सातत‌ले भवनहरू र इच्छा गरिएअनुसारका सयौं संख्यामा रहेका नगरहरू जो अत्यन्त दिव्य शरीर भएका हजारौं स्वास्नी मानिसहरूले युक्त हुन्छन्, यी र यस्तै अन्य ठूला ठूला भोगहरूका साथ इच्छापूर्वक चन्द्र र ताराहरू रहँदासम्म क्रीडा गर्दछ।१२०-१२२।

त्यसपछि समय गतिका कारणले त्यसलोकबाट तल झरेपछि क्रमैसँग विष्णुलोक, ब्रह्मलोक आदिमा र अन्तमा सुमेरु पर्वतको शिखरमा भोगविलासहरूका साथ रमाउँदछ।१२३।

त्यो भोग सकेर समयवश त्यसबाट झरेपछि उत्तरकुरु भन्ने देशमा पुग्दछ र त्यसपछि यस भारतवर्षको धार्मिक, सुन्दर, आकर्षक, वीर, सम्पूर्ण चाहनाहरूलाई पूरा गर्न सक्ने राजा बन्दछ र त्यसपछि पहिलेको संस्कारका कारणले फेरि पनि धर्म गर्दछ।१२४-१२५।

यश्च ग्रीष्मे गवां गोष्ठं जलाश्रयसमीपतः ।
कुर्याद् वृक्षाकुले स्थाने तत्रैकत्र चिरन्न च[६२] ॥१२६॥

गवामेकत्र संवासे दोषः स्याद् गोमयोष्मणा ।
तस्मान्नैकत्र वसतिं चिरं ग्रीष्मे प्रकल्पयेत् ॥१२७॥

नान्यस्थानं यदा पश्येद् गवां ग्रीष्मे सुशोभनम् ।
पूर्वमेव तदा स्थानं यत्नाच्छोध्यं दिने दिने ॥१२८॥

यः शोधयेत् गवां बाट[६३]मात्मीयं वा परस्य वा ।
स प्रदाय गवां सौख्यं शिवलोके महीयते[६४] ॥१२९॥

दुःखं कृत्वा भवेद्[६५] दुःखं सुखं कृत्वा लभेत् सुखम् ।
तस्माद्धि सर्वसत्त्वानां सुखार्थी सुखमाचरेत् ॥१३०॥

जसले गर्मीयाममा जलाशयका नजिक रूखहरू भएको ठाउँमा गाईको गोठ बनाउँदछ उसले त्यस ठाउँमा लामो समयसम्म गाई राख्नु हुँदैन किनभने गर्मीयाममा गाईहरूलाई एकै ठाउँमा राख्दा गोबरको तातोले गाईलाई रोग लाग्न सक्दछ। त्यसैले गर्मीयाममा धेरै समयसम्म गाईमाताको एकै ठाउँमा बास बनाउनु हुँदैन।१२६-१२७।

यदि गर्मीयाममा गाई गोठ बदलिरहनका लागि राम्रो ठाउँ भेटिएन भने पनि साँझ गाई वास बस्नुभन्दा पहिले नै त्यो ठाउँलाई यत्नपूर्वक दिनदिनै सफा गर्नु पर्दछ।१२८।

जसले आफ्नो वा अर्काको गाईको गोठ, परिसर वा मार्गलाई सफा गर्दछ ऊ गाईहरूलाई सुख प्रदान गरेर शिवलोकमा प्रतिष्ठित हुन्छ।१२९।

अरूलाई दुःखको स्थिति निर्माण गर्दा दुःख प्राप्त हुन्छ भने अरूलाई सुख दिंदा सुख नै मिल्दछ। त्यसैले सुख चाहने मानिसले सम्पूर्ण प्राणीहरूको सुखका लागि काम गर्नू।१३०।

---

६२ ग. नरः।

६३ क. यः शोध्येत गवां वात। ख, ङ. यः शोध्येत गवां बाट। ग. यैः शोध्यते (यः शोधयत्) गवां बाट। घ. यः शोध्येत गवां वाच।

६४ ख, ग. प्रमोदते।

६५ ख,ग, घ. लभेद्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
अप्येकं क्षणमुत्पाद्य सुखमार्तस्य देहिनः ।
प्राप्नोति सुमहत् सौख्यमब्दकोटिं शिवे पुरे ॥१३१॥

तस्माद् गाश्चारयेद्[६६] ग्रीष्मे तृणवृक्षजलान्विते ।
वर्षास्वकर्दमस्थाने गिरिवृक्षसमीपतः ॥१३२॥

हेमन्ते तु दिवाकाशे रात्रौ च प्रसरन्नयेत् ।
निस्तृणेऽपि गवां स्थाने प्रसरेण धृतिर्भवेत् ॥१३३॥

ग्रीष्मे त्रिष्पाययेद्[६७] गाश्च स्वादुतोयं हि तद्धितम् ।
क्षारभूः सलिलं क्षारं ग्रीष्मादन्यत्र गोहितम् ॥१३४॥

एवं यः पाययेद् गाश्च स गोपश्चारयीत च[६८] ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥१३५॥

पीडित प्राणीलाई एकछिन मात्र पनि कसैले सुख दिन सक्दछ भने उसले शिवलोकमा करोडौं वर्षसम्म अत्यन्त सुख पाउँछ।१३१।

त्यसैले गर्मी याममा घास, रूखहरू र पानीले युक्त भएको ठाउँमा, वर्खामा हिलो नभएको ठाउँमा, पहाड वा रुखका नजिक गाईहरूलाई चराउनू।१३२।

हेमन्त आदि जाडो समयमा दिउस खुला आकाशमा अर्थात् घाम ताप्ने गरी र रात्रीमा समुदायमा गाईलाई राख्नु पर्दछ। घास पराल आदि नभएको ठाउँमा पनि समुदायमा गाईहरूले धैर्य प्राप्त गर्दछन्।१३३।

गर्मीयाममा तीनपटक पानी खुवाउनु पर्दछ र यस समयमा मीठो पानी गाईका लागि हितकर हुन्छ। गर्मीयाम बाहेक अरू समयमा नुनिलो ठाऊँ र नुनिलो पानी हितकर हुन्छ।१३४।

यसरी समयको ख्याल गरेर जुन गोपालकले पानी खुवाउँदछ र चराउँदछ त्यो सम्पूर्ण पापहरूबाट मुक्त भएर शिवलोकमा प्रतिष्ठित हुन्छ।१३५।

यः साम्रं दन्तुरं[६९] स्तम्भं गोषु मध्ये क्वचित्क्वचित् ।
कण्डूयनार्थं निखनेच्छिवलोकं स गच्छति ॥१३६॥

अनाथां दुर्बलां गाञ्च रोगादिपरिपीडिताम् ।
मृतवत्सामदुग्धाभिर्मातृभिश्च विवर्जिताम् ॥ १३७॥

स्वकीयान् परकीयान् वा वत्सान् यः परिपालयेत् ।
विधूय सर्वपापानि शिवलोके महीयते ॥१३८॥

दुग्धलोभहतप्रज्ञा ये वत्सान् क्षीरजीविनः ।

---

६६ घ. गां चारयेत् ।
६७ ग. त्रिष्पाययेत् ।
६८ ख. चारयीतरः । ग. चारयीत च ।
६९ ख. सार्द्रं दन्तुरम् । ग. स्तम्भं (सास्त्रं) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

निष्पीडयन्ति पापिष्ठाः[७०] पीड्यन्ते नरकेषु ते ।।१३९।।
CC-0. In Public Domain. Digitization by eGangotri

निश्वसन्ति गृहे येषां दह्यमानाः क्षुधाग्निना ।
निर्दुग्धा निर्दयैर्वत्साः पच्यन्ते नरकेषु ते ।। १४०।।

विक्रोशन्तः क्षुधाविष्टाः शुष्ककण्ठोष्ठतालुकाः ।
नरकाग्नौ प्रपच्यन्ते वर्षकोटिशतन्नराः।।१४१।।

जसले आँपको दाँते अर्थात् खम्रो खामो गाईका माझ माझमा कतै कतै गाईलाई कन्याउनका लागि गाड्दछ त्यो मानिस शिवलोक जान्छ ।१३६।

अनाथ, दुर्बल, रोगहरूले पीडित, बाच्छो मरेकी गाई, आमाको दुध नआउने र आमा विनाकी बाच्छी तथा आफ्ना वा अर्काका वाच्छाहरूको जुन गोपालकले राम्रोसँग लालन पालन गर्दछ ऊ सम्पूर्ण पापहरू पखालेर शिवलोकमा प्रतिष्ठित हुन्छ ।१३७-१३८।

दूधको लोभले बुद्धिहराएका जुन गोपालकहरूले दूधबाट मात्र जीवन धानेका भर्खरका बाच्छा बाच्छीहरूलाई पीडा दिन्छन् ती पापीहरू नरकहरूमा पीडा भोग्दछन् ।१३९।

जुन मानिसहरूका घरमा निर्दयी मानिसहरूले गाईमाताको सबै दूध दुहेर भोकको आगोले डढ्दै बाच्छा-बाच्छीहरू जीवन विताइरहेका हुन्छन् ती मानिसहरू नरकहरूमा पकाइन्छन् ।१४०।

नरकेभ्यः समुत्तीर्णाः सावशेषेण कर्मणा ।
यत्र यत्राभिजायन्ते तत्र तत्र[७१] बुभुक्षिताः ।।१४२।।

योनिकोटिसहस्रेषु परिभ्रम्य क्रमात्पुनः ।
मनुष्यलोके जायन्ते दरिद्राः परतर्जकाः ।। १४३।।

तस्मान्न पीडयेद् वत्सानपुष्टान् क्षीरतृष्णया ।
वत्से तृप्ते यदधिकं तत्क्षीरं निर्दुहेत् पुनः ।।१४४।।

द्वौ मासौ न दुहेद्वत्सांस्तृतीयेऽर्धन्दुहेत च ।
दुहेच्चतुर्थं निःशङ्कस्तस्य लालान्तु[७२] वर्जयेत् ।।१४५।।

बन्धनं बालवत्सानां कर्णग्राहञ्च वर्जयेत् ।
शीतवर्षातपत्राणं कार्यं निष्कर्दमं समम् ।।१४६।।

जुन मानिसहरूले बाच्छाबाच्छीहरूको भागको दूध दुहेर उनीहरूलाई भोकै सताउँदछन्, ती मानिसहरू रुदै भोकले अत्तालिएका घाँटी, ओठ र तालु सुकेका नरकाग्निमा सय करोड वर्षसम्म पकाइन्छन् ।१४१।

नरकहरूको यातनाबाट पार पाइसके पनि अवशिष्ट कर्मका कारणले ती पापीहरू जहाँ जहाँ जन्म लिन्छन् त्यहाँ त्यहाँ भोकले पीडित भएर रहन्छन् ।१४२।

---

७० ४६२ ग. ते गोभिः

७१ क. तत्रा ।

७२ ख. लोभन्तु । ग. लालांस्तु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यसरी बाच्छाहरूलाई पर्याप्त दूध खान नदिने र अरूलाई तर्साउने पापीहरू हजार करोड योनिहरूमा क्रमैसँग वास गर्दै अन्तमा मनुष्यलोकमा पनि दरिद्र भएर जन्मन्छन् ।१४३।

त्यसैले दूधको चाहनाले आँत नपुरिएका बाच्छाबाच्छीहरूलाई उनको भागको दूध दुहेर दुःख दिनु हुँदैन। बाच्छाबाच्छी तृप्त भएको अवस्थामा बचेको दूधमात्र दुहुनु पर्दछ ।१४४।

दुई महिनासम्म दूध बाच्छाहरूलाई छोड्नु पर्दछ, दुहुनु हुँदैन। तेस्रो महिनादेखि आधा दूध दुहुन सकिन्छ भने चौथो महिनादेखि निःशङ्कोच दूध दुहुन सकिन्छ तर गाई पगार्दा बाच्छाको र्‍याललाई त्याग्नु पर्दछ ।१४५।

यूकापनयनं धूपं[७३] कुर्यात्कण्डूयनं सदा ।
कृमिरोगक्षुधादिभ्यः सर्वयत्नेन पालनम्[७४] ॥१४७॥

य एवं बालवत्सानामुपकाराय वर्तते ।
इहाप्नोति परं सौख्यं परत्र च शिवं पुरम् ॥ १४८॥

गाम[७५]भोज्यगृहं प्राप्तान् नृपतिर्यः समुद्धरेत् ।
कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥१४९॥

यः स द्विजः प्रयत्नेन गाम[७६]भोज्यात्समुद्धरेत् ।
प्रतिग्रहाद्युपायेन शिवलोके महीयते ॥१५०॥

भरखरका बाच्छाहरूलाई बाँध्नु र कान समात्नु हुँदैन। जाडो वर्खा र घामबाट उनीहरूलाई जोगाउनु पर्दछ र उनीले बस्ने ठाऊँ समथल र हिलो नभएको हुनुपर्दछ ।१४६।

जुम्रा, किर्ना आदि हटाइदिनुका साथै बाच्छा राख्ने ठाऊँमा धूपाइदिनु पर्दछ र उनीहरूलाई सधैं कन्याइदिनु पर्दछ। कीराहरू, रोगहरू र भोकप्यास आदिबाट सम्पूर्ण यत्नद्वारा रक्षा गर्नुपर्दछ ।१४७।

यसरी जो भरखरका बाच्छाहरूको उपकारका लागि प्रवृत्त हुन्छ, उसले यस लोकमा अत्यन्त सुख पाउँनुका साथै मरेपछि शिवलोकलाई प्राप्त गर्दछ ।१४८।

भोजन नभएको घरमा पुगेकी गाईको जुन राजाले उद्धार गर्दछ त्यो राजा आफ्ना एक्काइस कुलको उद्धार गरेर शिवलोकमा प्रतिष्ठित हुन्छ ।१४९।

जुन ब्राह्मणले दान आदि उपायहरूले भोजन व्यवस्था गरी गाईको भोकबाट यत्नपूर्वक उद्धार गर्दछ उसले शिवलोकमा प्रतिष्ठा प्राप्त गर्दछ ।१५०।

यः प्रदद्यात्सुधबलं शिवमर्च्य[७७] महावृषम् ।
विस्तीर्णोरस्कमुच्चांशं[७८] समुन्नतबृहत्कटिम् ॥१५१॥

७३ ग. धूमम्
७४ ग. पालयेत् ।
७५ ग. ग्राम ।
७६ ग. ग्राम ।
७७ क, ग. शिवसन्ध्या । ङ. शिवसंध्यम् ।
७८ ग. विस्तीर्णारक्तमुच्चाग्रम् । घ. सस्तीर्णोरस्कमुच्चाशम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ऊर्ध्व[७९]कुञ्चितशृङ्गाग्रमल्प[८०]शृङ्गान्तरन्तथा ।
स्थूलाल्प[८१] शृङ्गयुक्तं वा सर्वावयवशोभनम् ॥१५२॥

रक्तपीतैश्च कुसुमैः कुङ्कुमाद्यैश्च वर्णकैः ।
यथाशोभं समालभ्य विभवैः पूजयेद् वृषम् ॥१५३॥

किङ्किणीरवकोपेतं[८२] घण्टिका चामरान्वितम् ।
स्वस्तिकैरर्द्धचन्द्रैश्च नानारत्नैश्च शोभितम् ॥१५४॥

अष्टाङ्गुलप्रविस्तीर्णां हेमपट्टविनिर्मिताम्[८३] ।
राजतीं चार्मणीं वापि मालामुरसि विन्यसेत् ॥ १५५॥

जसले शिवको पूजा गरेर ठूलो साँढे दान गर्दछ (ऊ शिवलोकमा प्रतिष्ठित हुन्छ) कस्तो साँढे भने सेतो चाक्लो छाती भएको, अग्लो जुरो भएको, उन्नत र ठूलो कटिभाग भएको, माथितिर सिङका टुप्पा घुमेको, दुबै सिङको फरक कम भएको अथवा मोटा र साना सिङ भएको, सम्पूर्ण अङ्गहरू सुन्दर भएको त्यस्तो साँढेलाई राता-पहेला फूलहरूले र केसर आदि सुगन्धित द्रव्ययुक्त चन्दनहरूले शोभायमान हुने गरी विलेपन गर्नू र धनसम्पदाहरूले पूजा गर्नू ।१५१-१५३।

घुँघुराहरूले युक्त घण्ट तथा चामरले शोभायमान स्वस्तिक तथा आधा चन्द्रमाका चित्रहरूका साथै अनेक किसिमका रत्नहरूले शोभायमान साँढेको पूजा गर्नू ।१५४।

आठ अङ्गुल चाक्लो सुनको पट्टि राखेर बनाइएको चाँदीको अथवा छालाको माला छातीसम्म आउने गरी लगाईदिनू ।१५५।

तद्विधां पृष्ठमालाञ्च पुच्छान्तककुदाश्रिताम् ।
नानाभरणसंयुक्तामुदरार्द्धप्रलम्बिनीम् ॥१५६॥

हैमराजतकौपं[८४] वा नानारत्नोपशोभितम् ।
कार्यं श्रृङ्गद्वयन्तस्य सद्वस्त्रचामरान्वितम् ॥१५७॥

पट्टं शिरसि सौवर्णं चन्द्रचन्द्रक[८५]भूषितम् ।
चामराश्वत्थपत्रैश्च बध्नीयाद् द्रव्यसंयुतम् ॥१५८॥

ग्रैवेयकेण दिव्येन नानारत्नोपशोभिना ।
घण्टां कांस्यमयीं शुद्धां गले वध्नीत सुस्वनाम् ॥ १५९।

---

७९ ग. ऊध्वम् ।
८० ग. महा ।
८१ ग. स्थूलाग्र ।
८२ ख. रवसंयुक्तम् ।
८३ ख. विभूषिताम् ।
८४ क. हेमराजतकौपम् । ख, ग, घ, ङ. हेमराजतकौषम् ।
८५ क, ख, ग, घ. चन्द्रिक ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

खुरैः सुवर्णकै रौप्यैः केयूराङ्गदभूषितम् ।
पट्टवस्त्रैर्विचित्रैश्च यथाशोभमलङ्कृतम् ॥ १६०॥

त्यस्तै किसिमको आठ अङ्गुल चाक्लो सुनको पट्टिमा बनाइएको चाँदी वा छालाको जुडोदेखि पुच्छरसम्म लामो र पेटको आधा भागसम्म झुण्डिएको अनेक किसिमका आभारणहरूले युक्त भएको माला ढाडमा लगाउनू ।१५६।

सुनको चाँदीको वा अन्य कुनै धातुको अनेक रत्न जडित दुईवटा सिङ बनाउनू र सिङलाई राम्रा कपडा र चमरले युक्त बनाउनू ।१५७।

चन्द्रमाको चित्र र मयूरका प्वाँखहरूले युक्त सुनको पट्टी चमर, पीपलको पात र केही धन टाउकोमा बाध्नू ।१५८।

अनेक किसिमका रत्नहरूले युक्त दिव्य मालाका साथ राम्रो बज्ने शुद्ध काँसको घण्ट घाटीमा बाँध्नू ।१५९।

वितानध्वजमालाभिर्गेयवाद्यादिमङ्गलैः ।
दोधूयमानञ्चमरैः[८६] शिवाय विनिवेदयेत् ॥१६१॥

यावत्तद्रोमसंख्यानं तत्प्रसूतिकुलेषु च ।
तावद्युगसहस्राणि शिवलोके महीयते ॥ १६२॥

न च मानुष्यकं लोकमागच्छेत्पुनरध्रुवम् ।
ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते ॥१६३॥

एवं विधञ्च यो वृषं गोपतिं गाहन[८७]क्षमम् ।
वत्सिकाजननप्रायं बहुक्षीरावहङ्गवाम् ॥१६४॥

नानाभरणसंयुक्तं पूर्वशोभासमन्वितम् ।
गोमातरञ्च सम्पूज्य विसृजेच्छिवगोकुले ॥१६५॥

सुनबाट बनेका अथवा चाँदीका खुरहरू र अनेक वर्णका मसिना कपडाहरूद्वारा शोभा बढाउने गरी विभूषित तथा हातको माथिल्लो भागमा लगाउने केयूर र त्यसभन्दा तलतिर लगाउने अङ्गदनाम गरेका गहनाहरूले अघिल्तिरका खुट्टाहरूलाई सुशोभित गरेको साँढेलाई चँदुवा, ध्वजा-पतका र मालाहरू, गीत तथा बाजा आदिका मङ्गल धूनहरू, चमरहरू हल्लाउँदै भगवान् शिवलाई समर्पित गर्नू ।१६०-१६१।

यसरी शिवलाई वृष दान गर्ने मानिस जति त्यस साँढेका रौंहरूको संख्या हुन्छ र उसका सन्तानहरूका कुलहरूमा जन्मेका बाच्छाबाच्छीहरूको रौंहरूको संख्या हुन्छ त्यति हजार युगसम्म शिवलोकमा प्रतिष्ठित हुन्छ ।१६२।

फेरि ऊ यस अनिश्चित मनुष्यलोकमा फर्किँदैन र ज्ञानयोग प्राप्त गरेर त्यहीं मुक्त हुन्छ ।१६३।

८६ ख, ग. दोधूयमाश्चमरैः ।

८७ ख. रोहण । ग. ग्राहण ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यस किसिमको साँढेलाई जो गाईहरूको पति होस्, गर्भधारण गराउन समर्थ होस्, धेरै दूधदिने गाईहरूको उत्पादन गर्न सक्षम होस्, त्यस्तो साँढेलाई अनेक किसिमका अलङ्कारहरू युक्त

एवं यः सम्प्रदद्यात्तु वृषेन्द्रं शिवगोकुलम् ।[८८]
स पूर्वोक्तं लभेत् पुण्यं यत्सन्ध्यावृषदानतः ॥१६६॥

निवेद्य सद्गुणोपेतमनड्वाहं शिवाश्रमे ।
दशधेनुप्रदानस्य फलं शोभनमाप्नुयात् ॥१६७॥

उत्पाद्य सस्यानि तृणंश्चरन्ति तदेवभूयः सकलं[८९] वहन्ति ।
न भारखिन्नाः प्रवदन्ति किञ्चिदहो वृषैर्द्धार्यिति जीवलोकः ॥१६८॥

वृषाणाम्पृष्ठमारूढा ये गच्छन्ति नराधमाः ।
ते महाप्रलयं यावत् पच्यन्ते नरकाग्निषु ॥११६९॥

बनाएर पहिले भनिए अनुसार माला आदिले सुसज्जित गरेर गाईआमाको समेत पूजा गरेर शिवका गाईहरूको समुदायमा छोड्नू ।१६४-१६५।

यसरी जसले श्रेष्ठ साँढे शिव गोकुललाई प्रदान गर्दछ उसले त्यो शिवाश्रममा छोडेको साँढेको माध्यमबाट पहिले बताइएको अर्थात् हजारौं युगसम्म शिवलोकमा प्रतिष्ठा र मोक्ष प्राप्त गर्दछ ।१६६।

जसले राम्रो गुण भएको साँढे शिवाश्रममा दिन्छ उसले दश गाई दान गरे बराबर राम्रो फल पाउँछ ।१६७।

धान उत्पादन गरेर त्यसको परालमात्र खान्छन्, त्यही सम्पूर्ण धान सबै बोकेर घर पुर्‍याउँछन्, भारको बोझले पीडित भए पनि कुनै प्रतिक्रिया दिँदैनन्, केही भन्दैनन् । आश्चर्यको कुरा साँढेहरूले नै यस संसारलाई थेगेका छन् ।१६८।

जुन अधम मानिसहरू साँढेहरूको पिठ्यूँमा चढेर हिड्दछन् ती महाप्रलय नहुदासम्म नरकहरूका आगामा पकाइन्छन् ।११६९।

वृषपृष्ठेन गच्छन्तं जनं[९०] ज्ञात्वा यदा नृपः ।
न वारयेदुपेक्षेत पापं तस्यापि तत्समम् ॥१७०॥

ये वृषाः साधुभिर्मुक्तास्त्रिशूलाङ्काः शिवप्रियाः ।
तान् वाहयन्ति ये मूढाः पापाचारा नराधमाः ॥१७१॥

ते महाप्रलयं यावदशेषनरकाग्निषु ।
